मृता; ततः स क्षुल्लकः 'प्ररुदितः' रोदितुं लग्नः, तमेवं रुदन्तं दृष्ट्वा स साधुराह—मा रुदिहि, जीवति ते जननी; एवमुक्ते क्षुल्लकोऽपरे च साधवो भणन्ति—कथं पूर्वं मृतेत्युक्त्वा सम्प्रति जीवतीति भणसि ?; स प्राह—एषा शुनी मृता सा तव माता भवति। क्षुल्लको ब्रूते—कथमेषा मम माता ?; मृषावादिसाधुराह—सर्वेऽपि जीवा अतीते काले तव मातृत्वेन बभूवुः।

5 तथा च प्रज्ञप्तिसूत्रम्—

एगमेगस्स णं भंते ! जीवस्स सव्वजिया माइत्ताए पिइत्ताए भाइत्ताए भज्जत्ताए पुत्तत्ताए धूयत्ताए भूतपुव्वा ? हंता गोयमा ! एगमेगस्स जाव भूतपुव्वा (शत० उ०)।

तेनैव कारणेनैषा शुनी त्वदीया माता इति ॥ ६०७५ ॥ अथ पारिहारिकद्वारमाह—

ओसण्णे दट्ठूणं, दिट्ठा परिहारिग त्ति लहु कहणे।
10 कत्थुज्जाणे गुरुओ, वयंत-दिट्ठेसु लहु-गुरुगा ॥ ६०७६ ॥
छल्लहुगा उ णियत्ते, आलोएंतम्मि छग्गुरू होंति।
परिहरमाणा वि कहं, अप्परिहारी भवे छेदो ॥ ६०७७ ॥
किं परिहरंति णणु खाणु-कंटए सव्वे तुब्भे हं एगो।
सव्वे तुब्भे बहि पवयणस्स पारंचिओ होति ॥ ६०७८ ॥

15 कोऽपि साधुरुद्याने स्थितानवसन्नान् दृष्ट्वा प्रतिश्रयमागत्य भणति—मया पारिहारिका दृष्टा इति; साधवो जानते यथा—शुद्धपारिहारिकाः समागताः; एवं छलाभिप्रायेण कथयत एव मासलघु। भूयस्ते साधवः (ग्रन्थाग्रम् ७००० । सर्वग्रन्थाग्रम्—४०८२५ ।) पारिहारिकसाधुदर्शनोत्सुकाः पृच्छन्ति—कुत्र ते दृष्टाः ?; स प्राह—उद्याने; एवं भणतो मासगुरु। ततः साधवः पारिहारिकदर्शनार्थं चलिता व्रजन्तो यावद् न पश्यन्ति तावत् तस्य कथयत-
20 श्चतुर्लघु। तत्रगतैर्दृष्टेष्ववसन्नेषु कथयतश्चतुर्गुरु ॥ ६०७६ ॥

'अवसन्ना अमी' इति कृत्वा निवृत्तेषु तेषु कथयतः षड्लघवः। ते साधव ईर्यापथिकीं प्रतिक्रम्य गुरूणामालोचयन्ति—विप्रतारिता वयमनेन साधुनेति; एवं ब्रुवाणेषु तस्य षड्गुरु। आचार्यैरुक्तम्—किमेवं विप्रतारयसि ?; स वष्टोत्तरं दातुमारब्धः—परिहरन्तोऽपि कथमपरिहारिणो भवन्ति ?; एवं ब्रुवतश्छेदः ॥ ६०७७ ॥

25 साधवो भणन्ति—किं ते परिहरन्ति येन परिहारिका उच्यन्ते ?; इतरः प्राह—स्थाणुकण्टकादिकं तेऽपि परिहरन्ति; एवमुत्तरं ददतो मूलम्। ततस्तैः सर्वैरपि साधुभिरुक्तः—धृष्टोऽसि यदेवंगतेऽप्युत्तरं ददासीति; ततः स प्राह—सर्वेऽपि यूयमेकत्र भूता अहं पुनरेकोऽसहायो अतः पराजीये, न पुनः परिफल्गु मदीयं जल्पितम्; एवं भणतोऽनवस्थाप्यम्। अथ ज्ञानमदावलिप्त एवं ब्रवीति—सर्वेऽपि यूयं प्रवचनस्य बाह्याः; एवं सर्वानधिक्षिपन् पारा-
30 ञ्चिको भवति ॥ ६०७८ ॥ इदमेवान्त्यपदं व्याचष्टे—

१ धूयत्ताए सुण्हत्ताए सुहि-सयण-संबंध-संथुयत्ताए उववण्णपुव्वा ? हंता गोयमा ! एगमेगस्स णं जीवस्स सव्वजीवा जाव उववण्णपुव्वा। अत एतेनैव कार° कां० ॥
२ °ताः अतो वन्दनीयास्ते भगवन्तः; 'इति' एवं कां० ॥

किं छागलेण जंपह, किं मं [1]होप्पेह एवऽजाणंता ।
बहुएहिँ को विरोहो, सलभेहि व नागपोतस्स ॥ ६०७९ ॥

किमेवं छागलेन न्यायेन जल्पथ ?, बोत्कटवन्मूर्खतया किमेवमेव प्रलपथ ? इत्यर्थः । किं वा मामेवमजानन्तोऽपि "होप्पेह" गले धृत्वा प्रेरयथ ? । अथवा ममापि बहुभिः सह को विरोधः ? शलभैरिव नागपोतस्येति ॥ ६०७९ ॥ अथ घोटकमुखीद्वारमाह— 5

भणइ य दिट्ठ नियत्ते, आलोएँ आमं ति घोडगमुहीओ ।
माणुस सव्वे एगे, सव्वे बाहिँ पवयणस्स ॥ ६०८० ॥
मासो लहुओ गुरुओ, चउरो मासा हवंति लहु-गुरुगा ।
छम्मासा लहु-गुरुगा, छेओ मूलं तह दुगं च ॥ ६०८१ ॥

एकः साधुर्विचारभूमौ गत उद्यानोद्देशे वडवाश्चरन्तीरवलोक्य प्रतिश्रयमागतः साधूनां 10 विस्मितमुखः कथयति—शृणुत आर्याः ! अद्य मया यादृशमाश्चर्यं दृष्टम्; साधवः पृच्छन्ति—कीदृशम् ?; स प्राह—घोटकमुख्यः स्त्रियो दृष्टाः; एवं भणतो मासलघु । ते साधव ऋजुत्वभावाश्चिन्तयन्ति यथा—घोटकाकारमुखा मनुष्यस्त्रियोऽनेन दृष्टा इति; ततस्ते पृच्छन्ति—कुत्र तास्त्वया दृष्टाः ?; स प्राह—उद्याने; एवं ब्रुवतो मासगुरु । साधवः 'द्रक्ष्यामस्ताः' इत्यभिप्रायेण व्रजन्ति तदानीं कथयतश्चतुर्लघु । दृष्टासु वडवासु चतुर्गुरु । प्रतिनिवृत्तेषु साधुषु षड्- 15 लघु । गुरूणामालोचिते षड्गुरु । ततो गुरुभिः पृष्टो यदि भणति—आमम्, घोटकमुख्य एवैताः, यतो घोटकवद् दीर्घमधोमुखं च मुखं वडवानां भवतीति; एवं ब्रवीति तदा छेदः । ततः साधुभिर्भणितः—कथं ताः स्त्रिय उच्यन्ते ?; इतरः प्राह—यदि न स्त्रियस्तर्हि किं मनुष्याः ?; एवं ब्रुवाणस्य मूलम् । 'सर्वे यूयमेकत्र मिलिताः, अहं पुनरेक एव' एवं भणतोऽनवस्थाप्यम् । 'सर्वेऽपि प्रवचनस्य बाह्याः' इति भणतः पाराञ्चिकम् ॥ ६०८० ॥ ६०८१ ॥ 20

अथान्त्यं प्रायश्चित्तत्रयं प्रकारान्तरेणाह—

सव्वेगत्था मूलं, अहगं इक्कल्लगो य अणवट्ठो ।
सव्वे बहिभावा पवयणस्स वयमाणे चरिमं तु ॥ ६०८२ ॥

'यूयं सर्वेऽप्येकत्र मिलिताः' इति भणतो मूलमेव । 'अहमेककः किं करोमि ? इति भणतोऽनवस्थाप्यम् । 'सर्वेऽपि यूयं प्रवचनस्य बाह्याः' इति वदति पाराञ्चिकम् ॥ ६०८२ ॥ 25

इदमेवान्त्यपदं व्याख्याति—

किं छागलेण जंपह, किं मं [2]हंफेह एवऽजाणंता ।
बहुएहिँ को विरोहो, सलभेहि व नागपोयस्स ॥ ६०८३ ॥

गतार्था ॥ ६०८३ ॥ अथावश्यकगमनद्वारमाह—

गच्छसि ण ताव गच्छं, किं खु ण जासि त्ति पुच्छितो भणति । 30
वेला ण ताव जायति, परलोगं वा वि मोक्खं वा ॥ ६०८४ ॥

कोऽपि साधुः केनापि साधुना पृष्टः—आर्य ! गच्छसि भिक्षाचर्याम् ?; स प्राह—अवश्यं

---

१ होप्फेह ताभा० ॥ २ होप्पेह कां० ॥

गमिष्यामि; इतरेण साधुना भणितः—यद्येवं तत उत्तिष्ठ व्रजावः; स प्राह—न तावदद्यापि गच्छामि; इतरेण भणितम्—किं "खुः" इति वितर्के 'न यासि' न गच्छसि? त्वया हि भणितम्—अवश्यं गमिष्यामि; एवंपृष्टो भणति—न तावदद्यापि परलोकं गन्तुं वेला जायते अतो न गच्छामि, यद्वा मोक्षं गन्तुं नाद्यापि वेला अतो न गच्छामि; "अपिः" सम्भावने,
5 किं सम्भावयति? अवश्यं परलोकं मोक्षं वा गमिष्यामीति ॥ ६०८४ ॥

अथ "दिसासु" त्ति पदं व्याख्याति—

कतरिं दिसं गमिस्ससि, पुव्वं अवरं गतो भणति पुट्ठो ।
किं वा ण होति पुव्वा, इमा दिसा अवरगामस्स ॥ ६०८५ ॥

एकः साधुरेकेन साधुना पृष्टः—आर्य ! कतरां दिशं भिक्षाचर्यां गमिष्यसि?; स एवं-
10 पृष्टो ब्रवीति—पूर्वां गमिष्यामि । ततः प्रच्छकः साधुः पात्रकाण्युद्ग्राह्यापरां दिशं गतः, इतरोऽपि पूर्वदिग्गमनप्रतिज्ञाता तामेवापरां दिशं गतः, तेन साधुना पृष्टः—'पूर्वां गमिष्यामि' इति भणित्वा कस्मादपरामायातः?; स प्राह—किं वाऽपरस्य ग्रामस्येयं दिक् पूर्वा न भवति येन मदीयं वचनं विरुध्येत? ॥ ६०८५ ॥ अथैककुलद्वारमाह—

अहमेगकुलं गच्छं, वच्चह बहुकुलपवेसणे पुट्ठो ।
15 **भणति कहं दोण्णि कुले, एगसरीरेण पविसिस्सं ॥ ६०८६ ॥**

कश्चित् केनचिद् भिक्षार्थमुत्थितेनोक्तः—आर्य ! एहि व्रजावो भिक्षाम्; स प्राह—व्रजत यूयं अहमेकमेव कुलं गमिष्यामि; एवमुक्त्वा बहुषु कुलेषु प्रवेष्टुं लग्नः [1]ततोऽपरेण साधुना पृष्टः—कथम् 'एककुलं गमिष्यामि' इति भणित्वा बहूनि कुलानि प्रविशसि?; स एवं पृष्टो भणति—द्वे कुले एकेन शरीरेण युगपत् कथं प्रवेक्ष्यामि?, एकमेव कुलमेकस्मिन् काले प्रवेष्टुं
20 शक्यम् न बहूनीति भावः ॥ ६०८६ ॥ अथैकद्रव्यग्रहणद्वारमाह—

वच्चह एगं दव्वं, घेच्छं णेगगह पुच्छितो भणती ।
गहणं तु लक्खणं पोग्गलाण णऽण्णोसि तेणेगं ॥ ६०८७ ॥

कोऽपि साधुर्भिक्षार्थं गच्छन् कमपि साधुं भणति—व्रजावो भिक्षायाम्; स प्राह—व्रजत यूयम्, अहमेकमेव द्रव्यं ग्रहीष्यामि; एवमुक्त्वा भिक्षां पर्यटन् अनेकानाम्—ओदन-द्वितीयाङ्गा-
25 दीनां बहूनां द्रव्याणां ग्रहण कुर्वन् साधुभिः [2]पृष्टो भणति—"गहणं तु" इत्यादि, गतिलक्षणो धर्मास्तिकायः, स्थितिलक्षणोऽधर्मास्तिकायः, अवगाहलक्षण आकाशास्तिकायः, उपयोगलक्षणो जीवास्तिकायः, ग्रहणलक्षणः पुद्गलास्तिकायः, एषां च पञ्चानां द्रव्याणां मध्यात् पुद्गलानामेव ग्रहणरूपं लक्षणम् नान्येषां धर्मास्तिकायादीनाम्, तेनाहमेकमेव द्रव्यं गृह्णामि न बहूनीति ॥ ६०८७ ॥

30 व्याख्यातं द्वितीयद्वारगाथायाः (गा० ६०६७) पूर्वार्द्धम् । अथ "पडियाखित्ता गमणं, पडियाखित्ता य भुंजणय" त्ति पश्चार्द्धं व्याख्यायते—'प्रत्याख्याय' 'नाहं गच्छामि' इति प्रति-

१ ततो बहुकुलप्रवेशनेऽपरेण कां० ॥ २ पृष्टः—कथम् 'एकमेव द्रव्यं ग्रहीष्ये' इत्युक्त्वा बहूनि द्रव्याणि गृह्णासि?; ततोऽसौ भणति—"गहणं तु" कां० ॥

विध्य गमनं करोति, 'प्रत्याख्याय च' 'नाहं भुञ्जे' इति भणित्वा भुङ्क्ते; अपरेण च साधुना पृष्टो ब्रवीति—गम्यमानं गम्यते नागम्यमानम्, भुज्यमानमेव भुज्यते नाभुज्यमानम्। अनेन च पश्चार्द्धेन गमनद्वार-प्रत्याख्यानद्वारे व्याख्याते इति प्रतिपत्तव्यम्। इह च सर्वत्रापि प्रथमवारं भणतो मासलघु। अथाभिनिवेशेन तदेव निकाचयति तदा पूर्वोक्तनीत्या पाराञ्चिकं यावद् द्रष्टव्यम् ॥

तदेवं येषु स्थानेष्वलीकं सम्भवति यादृशी च तत्र शोधिस्तदभिहितम्। सम्प्रति 'येऽपाया 5 सापवादाः' (गा० ६०६४) इति द्वारम्—तत्राऽनन्तरोक्तान्यलीकानि भणतो द्वितीयसाधुना सहासङ्खडाद्युत्पत्तेः संयमा-ऽऽत्मविराधनारूपा सम्प्रपञ्चं सुधिया वक्तव्याः। अपवादपदं तु पुरस्ताद् भणिष्यते ॥

गतमलीकवचनम्। अथ हीलितादीन्यभिधित्सुः प्रथमतः प्रायश्चित्तमतिदिशति—

> एमेव य हीलाए, खिंसा-फरुसवयणं च वदमाणो । 10
>
> गारत्थि विओसविते, इमं च जं तेसि णाणत्तं ॥ ६०८८ ॥

एवमेव हीलावचनं खिंसावचनं परुषवचनमगारस्थवचनं व्यवशमितोदीरणवचनं च वदतः प्रायश्चित्तं मन्तव्यम्। यच्च तेषां नानात्वं तद् इदं भवति ॥ ६०८८ ॥

> आदिल्लेसुं चउसु वि, सोही गुरुगाति भिन्नमासंता ।
>
> पणुवीसतो विभाओ, विसेसितो बिदिय पडिलोमं ॥ ६०८९ ॥ 15

'आदिमेषु चतुर्ष्वपि' हीलित-खिंसित-परुष-गृहस्थवचनेषु शोधिश्चतुर्गुरुकादिका भिन्नमासान्ता आचार्यादीनां प्राग्वद् मन्तव्या। तद्यथा—आचार्य आचार्यं हीलयति चतुर्गुरु १ उपाध्यायं हीलयति चतुर्लघु २ भिक्षुं हीलयति मासगुरु ३ स्थविरं हीलयति मासलघु ४ क्षुल्लकं हीलयति भिन्नमासः ५। एतान्याचार्यस्य तपः-कालाभ्यां गुरुकाणि भवन्ति। एते आचार्यस्य पञ्च संयोगा उक्ताः, उपाध्यायादीनामपि चतुर्णामेवमेव पञ्च पञ्च संयोगा भवन्ति, सर्वसङ्ख्ययैते 20 पञ्चविंशतिर्भवन्ति। अत एवाह—'पञ्चविंशतिकः' पञ्चविंशभङ्गपरिमाणो विभागोऽत्र भवति। स च तपः-कालाभ्यां विशेषितः कर्तव्यः। द्वितीयादेशेन चैतदेव प्रायश्चित्तं प्रतिलोमं विज्ञेयम्, भिन्नमासाद्यं चतुर्गुरुकान्तमित्यर्थः। एवं खिंसित-परुष-गृहस्थवचनेष्वपि शोधिर्मन्तव्या ॥ ६०८९ ॥ अथ हीलितवचनं व्याख्याति—

> गणि वायए बहुस्सुए, मेहावाऽऽयरिय धम्मकहि वादी । 25
>
> अप्पकसाए थूले, तणुए दीहे य मडहे य ॥ ६०९० ॥

इह गणि-वाचकादिभिः पदैः सूचयाऽसूचया वा परं हीलयति। सूचया यथा—वयं न गणि-वृषभा अतः को नाम गणि-वृषभैः सहास्माकं विरोधः ?। असूचया यथा—कस्त्वं गणीनामसि ? किं वा त्वया गणिना निष्पद्यते ?; यद्वा—गणीभवन्नपि त्वं न किञ्चिद् जानासि, केन वा त्वं गणिः कृतः ? इति। एवं वाचकादिष्वपि पदेषु भावनीयम्। नवरम्—'वाचकः' 30 पूर्वगतश्रुतधारी, 'बहुश्रुतः' अधीतविचित्रश्रुतः, 'मेधावी' ग्रहण-धारणा-मर्यादामेधाविभेदात् त्रिधा, 'आचार्यः' गच्छाधिपतिः, 'धर्मकथी वादी च' प्रतीतः। "अप्पकसाए" त्ति बहुक-

१ °दा द्वितीयवारादिषु मासगुरुकादारभ्य पूर्वो° कां० ॥ २ °त्पत्तेः प्रवचन-संय° कां० ॥

षाया वयम्, को नामाऽल्पकषायैः सह विरोधः ?। "थूले तणुए" त्ति स्थूलशरीरा वयम्, कस्तनुदेहैः सह विरोधः ?। "दीहे य मडहे य" त्ति दीर्घदेहा वयं सदैवोपरि शिरोघट्टनं प्राप्नुमः, को मडभदेहैः समं विरोधः ?। एषा सूचा। असूचायां तु—बहुकषायस्त्वम्, स्थूलशरीरस्त्वम् इत्यादिकं परिस्फुटमेव जल्पति। एवमसूचया सूचया वा यत् परं हीलयति तदेतद् 5 हीलितवचनम् ॥ ६०९० ॥ अथ खिंसितवचनमाह—

गहियं च अहाघोसं, तहियं परिपिंडियाण संलावो।
अमुएणं सुत्तत्थो, सो वि य उवजीवितुं दुक्खं ॥ ६०९१ ॥

एकेन साधुना 'यथाघोषं' यथा गुरुभिरभिलापा भणिताः तथा श्रुतं गृहीतम्। स चैवं-गृहीतसूत्रार्थः प्रतीच्छकादीन् वाचयति। यदा च प्रतीच्छक उपतिष्ठते तदा तस्य जाति-10 कुलादीनि पृष्ट्वा पश्चात् तैरेव खिंसां करोति। इतश्च अन्यत्र साधूनां 'परिपिण्डितानां' स्वाध्यायमण्डल्या उत्थितानां संलापो वर्तते—कुत्र सूत्रार्थौ परिशुद्धौ प्राप्येते ?। तत्रैकस्तं यथाघोषश्रुतग्राहकं साधुं व्यपदिशति, यथा—अमुकेन सूत्रार्थौ शुद्धौ गृहीतौ परं स 'उपजीवितुं' सेवितुं 'दुःखं' दुष्करः ॥ ६०९१ ॥ कथम् ? इत्याह—

जह कोति अमयरुक्खो, विसकंटगवल्लिवेढितो संतो।
15 ण चइज्जइ अल्लीतुं, एवं सो खिंसमाणो उ ॥ ६०९२ ॥

यथा कोऽप्यमृतवृक्षो विषकण्टकवल्लीभिर्वेष्टितः सन् 'आलीतुं' आश्रयितुं न शक्यते एवमसावपि साधुः प्रतीच्छकान् खिंसन् नाश्रयितुं शक्यः ॥ ६०९२ ॥ तथाहि—

ते खिंसणापरद्धा, जाती-कुल-देस-कम्मपुच्छाहिं।
आसागता णिरासा, वच्चंति विरागसंजुत्ता ॥ ६०९३ ॥

20 यस्तस्योपसम्पद्यते तं पूर्वमेव पृच्छति—का तव जातिः ? किंनामिका माता ? को वा पिता ? कस्मिन् वा देशे सञ्जातः ? किं वा कृष्यादिकं कर्म पूर्वं कृतवान् ?; एवं पृष्ट्वा पश्चात् तान् पठतो हीना-ऽधिकाक्षराद्युच्चारणादेः कुतोऽपि कारणात् कुपितस्तैरेव जात्यादिभिः खिंसति। ततः 'ते' प्रतीच्छका जाति-कुल-देश-कर्मपृच्छाभिः पूर्वं पृष्टाः ततः खिंसनया प्रारब्धाः-त्याजिताः सन्तः 'सूत्रार्थौ ग्रहीष्यामः' इत्याशयाऽऽगताः 'निराशाः' क्षीणमनोरथा विरागसंयुक्ताः—

25 "दिट्ठा सि कसेरुमई, अणुभूया सि कसेरुमई।
[3]पीयं च ते पाणिययं, वरि तुह नाम न दंसणयं ॥"

इति भणित्वा स्वगच्छं व्रजन्ति ॥ ६०९३ ॥

सुत्त-ऽत्थाणं गहणं, अहगं काहं ततो पडिनियत्तो।
जाति कुल देस कम्मं, पुच्छति खल्लाड घण्णागं ॥ ६०९४ ॥

30 एवं तदीयवृत्तान्तमाकर्ण्य कोऽपि साधुर्भणति—अहं तस्य सकाशे गत्वा सूत्रार्थयोर्ग्रहणं करिष्ये, तं चाचार्यं खिंसनादोषाद् निवर्तयिष्यामि। एवमुक्त्वा येषामाचार्याणां स शिष्यस्ते-

१ "मडहं सिखरथयमेत्तं" इति चूर्णौ विशेषचूर्णौ च ॥ २ अल्लियतुं ताभा० ॥ ३ पीतं तुह पाणियं, वरि तउ णामु ण दंसणयं ॥ इति पाठः चूर्णौ ॥

ग्रामन्तिके गत्वा पृच्छति—योऽसौ युष्माकं शिष्यः स कुत्र युष्माभिः प्राप्तः ? । आचार्याः प्राहुः—**वइदिसनामकस्य नगरस्यासन्ने गोब्बरग्रामे** । ततोऽसौ साधुस्ततः प्रतिनिवृत्तो **गोब्बरग्रामं** गत्वा पृच्छति—अमुकनामा युवा युष्मदीये ग्रामे पूर्वं किमासीत् ? । ग्रामेयकैरुक्तम्–आसीत् । ततः—का तस्य माता ? को वा पिता ? किं वा कर्म ? । तैरुक्तम्—"खल्लाड धण्णागं" ति नापितस्य **धन्निका** नाम दासी, सा खल्वाटकोलिकेन सममुषितवती, तस्याः सम्बन्धी पुत्रोऽसौ ॥ ६०९४ ॥ 5

एवं श्रुत्वा तस्य साधोः सकाशं गत्वा भणति—अहं तवोपसम्पदं प्रतिपद्ये । ततस्तेन प्रतीच्छ्य पृष्टः—कुत्र त्वं जातः ? का वा ते माता ? इत्यादि । एवंपृष्टोऽसौ न किमपि ब्रवीति । तत इतरश्चिन्तयति—नूनमेषोऽपि हीनजातीयः । ततो निर्बन्धे कृते स साधुः प्राह—

थाणम्मि पुच्छियम्मिं, ह णु दाणि कहेमि ओहिता सुणधा । 10
साहिस्सऽण्णे कस्स व, इमाइँ तिक्खाइँ दुक्खाइं ॥ ६०९५ ॥

स्थाने भवद्भिः पृष्टे सति "ह णु दाणि" त्ति तत इदानीं कथयामि, अवहिताः शृणुत यूयम्, कस्यान्यस्य 'इमानि' ईदृशानि तीक्ष्णानि दुःखानि कथयिष्यामि ? ॥ ६०९५ ॥

वइदिस गोब्बरगामे, खल्लाडग धुत्त कोलिय त्थेरो ।
ण्हाविय धण्णिय दासी, तेसिं मि सुतो कुणह गुज्झं ॥ ६०९६ ॥ 15

वइदिसनगरासन्ने गोब्बरग्रामे धूर्त्तः कोलिकः कश्चित् खल्वाटः स्थविरः, तस्य नापितदासी **धन्निका** नाम भार्या, तयोः सुतोऽस्म्यहम्; एतद् गुह्यं कुरुत, मा कस्यापि प्रकाशयतेत्यर्थः ॥ ६०९६ ॥

जेट्ठो मज्झ य भाया, गब्भत्थे किर ममम्मि पव्वइतो ।
तमहं लद्धसुतीओ, अणु पव्वइतोऽणुरागेण ॥ ६०९७ ॥ 20

मम ज्येष्ठो भ्राता गर्भस्थे किल मयि प्रव्रजित इति मया श्रुतम् । ततोऽहमेवं लब्धश्रुतिको भ्रातुरनुरागेण तमनु–तस्य पश्चात् प्रव्रजितः ॥ ६०९७ ॥

एवं श्रुत्वा स खिंसनकारी साधुः किं कृतवान् ? इत्याह—

आगारविसंवइयं, तं नाउं सेसचिंधसंवदियं ।
णिउणोवायच्छलितो, आउंटण दाणमुभयस्स ॥ ६०९८ ॥ 25

'न मदीयस्य भ्रातुरेवंविध आकारो भवति' इत्याकारविसंवदितं ज्ञात्वा शेषैश्च–जात्यादिभिश्चिह्नैः संवदितं ज्ञात्वा चिन्तयति—अहो ! अमुना निपुणोपायेन छलितोऽहम्, यदेवमन्यव्यपदेशेन मम जात्यादिकं प्रकटितम् । ततः 'आवर्तनं' मिथ्यादुष्कृतदानपूर्वं ततो दोषादुपरमणम् । ततस्तस्मै सूत्रा-ऽर्थरूपस्योभयस्य दानं कृतमिति ॥ ६०९८ ॥

गतं खिंसितवचनम् । अथ परुषवचनमाह— 30

दुविहं च फरुसवयणं, लोइय लोउत्तरं समासेणं ।
लोउत्तरियं ठप्पं, लोइय वोच्छं तिमं णातं ॥ ६०९९ ॥

द्विविधं परुषवचनं समासतो भवति—लौकिकं लोकोत्तरिकं च । तत्र लोकोत्तरिकं स्थाप्यम्,

पश्चाद् भणिष्यत इत्यर्थः । लौकिकं तु परुषवचनमिदानीमेव वक्ष्ये । तत्र चेदं ज्ञातं भवति ॥ ६०९९ ॥

अन्नोन्न समणुरत्ता, वाहस्स कुडुंबियस्स वि य धूया ।
तासिं च फरुसवयणं, आमिसपुच्छा समुप्पण्णं ॥ ६१०० ॥

5 व्याधस्य कुटुम्बिनोऽपि च "धूताः" दुहितरौ अन्योन्यं समनुरक्ते, परस्परं सख्यौ इत्यर्थः । तयोश्च परुषवचनमामिषपृच्छया समुत्पन्नम् ॥ ६१०० ॥ कथम् ? इति चेद् उच्यते—

केणाऽऽणीतं पिसियं, फरुसं पुण पुच्छिया भणति वाही ।
किं खु तुमं पिताए, आणीतं उत्तरं वोच्छं ॥ ६१०१ ॥

[1]व्याधदुहित्रा पुद्गलमानीतम्, ततः कुटुम्बिदुहित्रा सा भणिता—केनेदं पिशितमानीतम् ? । 10 ततो 'व्याधी' व्याधदुहिता पृष्टा सती परुषवचनं भणति—किं खु ? त्वदीयेन पित्राऽऽनीतम् । कुटुम्बिदुहिता भणति—किं मदीयः पिता व्याधः येन पुद्गलमानयेत् ? । एवं लौकिकं परुषवचनम् । अथ 'उत्तरं' लोकोत्तरिकं वक्ष्ये ॥ ६१०१ ॥ प्रतिज्ञातमेवाह—

फरुसम्मि चंडरुद्दो, अवंति लाभे य सेह उत्तरिए ।
आलत्ते वाहित्ते, वावारिय पुच्छिय णिसिट्ठे ॥ ६१०२ ॥

15 परुषवचने चण्डरुद्र उदाहरणम्, अवन्त्यां नगर्यां शैक्षस्य लाभः तस्य सञ्जात इति तदुदाहरणस्यैव सूचा कृता । एतल्लोकोत्तरिकं परुषवचनम् । एतच्चैतेषु स्थानेषूत्पद्यते—"आलत्ते" इत्यादि, 'आलप्तो नाम' 'आर्य ! [2]किं तव वर्त्तते ?' इत्येवमाभाषितः १, 'व्याहृतः' 'इत एहि' इत्येवमाकारितः २, 'व्यापारितः' 'इदमिदं च कुरु' इति नियुक्तः ३, 'पृष्टः' 'किं कृतं ? किं वा न कृतम् ?' इत्यादि पर्यनुयुक्तः ४, 'निसृष्टः' 'गृहाण, भुङ्क्ष, पिब' इत्येव-20 मादिष्टः ५ । एतेषु पञ्चसु स्थानेषु परुषवचनं सम्भवति इति निर्युक्तिगाथासमासार्थः ॥ ६१०२ ॥

अथैनां[3] विवरीषुश्चण्डरुद्रदृष्टान्तं तावदाह—

ओसरणे सवयंसो, इब्भसुतो वत्थभूसियसरीरो ।
दायण त चंडरुद्दे, एस पवंचेति अम्हे त्ति ॥ ६१०३ ॥
भूतिं आणय आणीतें दिक्खितो कंदिउं गता मित्ता ।
25 वत्तोसरणे पंथं, पेहा वय दंडगाऽऽउट्टो ॥ ६१०४ ॥

उज्जयिन्यां नगर्यां रथयात्रोत्सवे 'ओसरणं' बहूनां साधूनामेकत्र मीलकः समजनि । तत्र सवयस्यो वस्त्रभूषितशरीरः इभ्यसुतः साधूनामन्तिके समायातो भणति—मां प्रव्राजयत । ततः साधवश्चिन्तयन्ति—एषः 'प्रपञ्चयति' विप्रतारयत्यस्मानिति । तैश्चण्डरुद्राचार्यस्य दर्शनं कृतम् "घृष्यतां कलिना कलिः" इति कृत्वा ॥ ६१०३ ॥

---

१ "वाहधूताए पोग्गलं आणीतं । कुडुंबियधूताए भणिता—केण तं आणीतं ? । इतराए भणितं—किं तुमं आणेहिसि ? । कुडुंबियधूया भणति—किं अहं वाहधूया ? । एवं असंखडं जातम् ।" इति चूर्णौ विशेषचूर्णौ च ॥ २ किमनाबाधं वर्त्तते तव ?' इत्येवमाचार्यादिनाऽऽभाषि° कां० ॥ ३ °नामेव भाष्यकारो विव° कां० ॥

ततश्चण्डरुद्रस्योपस्थितः—प्रव्राजयत मामिति । ततस्तेनोक्तम्—'भूतिं' क्षारमानय । ततस्तेन भूतावानीतायां लोचं कृत्वा दीक्षितः । ततस्तदीयानि मित्राणि 'क्रन्दित्वा' प्रभूतं रुदित्वा स्वस्थानं गतानि । वृत्ते च समवसरणे चण्डरुद्रेण शैक्षो भणितः—पन्थानं प्रत्युपेक्षस्व येन प्रभाते व्रजामः । ततः प्रत्युपेक्षिते पथि प्रभाते पुरतः शैक्षः पृष्ठतश्चण्डरुद्रः "वय" त्ति व्रजति । स च शैक्षो गच्छन् स्थाणावास्फिटितः । ततश्चण्डरुद्रो रुष्टः 'दुष्टशैक्ष!' इति भणन् शिरसि दण्डकेन ताडयति । शैक्षो मिथ्यादुष्कृतं करोति भणति च—सम्यगायुक्तो गमिष्यामि । ततश्चण्डरुद्रस्तदीयोपशमेनावृत्तश्चिन्तयति—अहो ! अस्याभिनवदीक्षितस्यापि कियान् शमप्रकर्षः ? मम तु मन्दभाग्यस्य चिरप्रव्रजितस्याप्येवंविधः परमकोटिमुपगतः क्रोधः; इति परिभावयतः क्षपकश्रेणिमधिरूढस्य केवलज्ञानमुत्पेदे ॥ ६१०४ ॥

एवं चण्डरुद्रस्य 'दुष्टशैक्ष!' इत्यादिभणनमिव परुषवचनं मन्तव्यम् । अथ 'आलप्तादिषु 10 पदेषु परुषं भवति' इति यदुक्तं तस्य व्याख्यानमाह—

तुसिणीए हुंकारे, किं ति व किं चडगरं करेसि त्ति ।
किं णिव्वुतिं ण देसी, केवतियं वा वि रडसि त्ति ॥ ६१०५ ॥

आचार्यादिभिरालप्तो व्याहृतो व्यापारितः पृष्टो निसृष्टो वा तूष्णीको भवति, हुङ्कारं वा करोति, 'किम् ?' इति वा भणति, 'किं वा चटकरं करोषि ?' इति ब्रवीति, 'किं निर्वृतिं न 15 ददासि ?' इति ब्रूते, 'कियद्वा रटिष्यसि ?' इति भणति । एते सर्वेऽपि परुषवचनप्रकाराः ॥ ६१०५ ॥ अथैतेष्वेव प्रायश्चित्तमाह—

मासो लहुओ गुरुओ, चउरो मासा हवंति लहु-गुरुगा ।
छम्मासा लहु-गुरुगा, छेदो मूलं तह दुगं च ॥ ६१०६ ॥

लघुको मासो गुरुको मासश्चत्वारो मासा लघवश्चत्वारो मासा गुरवः षण्मासा लघवः 20 षण्मासा गुरवः छेदो मूलं तथा 'द्विकम्' अनवस्थाप्यं पाराञ्चिकं चेति ॥ ६१०६ ॥

एतदेव प्रायश्चित्तं चारणिकया गाथाद्वयेन दर्शयति—

आयरिएणाऽऽलत्तो, आयरितो चेव तुसिणितो लहुओ ।
रडसि त्ति छग्गुरुंतं, वाहिते गुरुगादि छेदंतं ॥ ६१०७ ॥
लहुगाई वावारिते, मूलंतं चतुगुरुगाइ पुच्छिए णवमं । 25
णीसट्ठ छसु पतेसु, छल्लहुगादी तु चरिमंतं ॥ ६१०८ ॥

आचार्येण आलप्त आचार्य एव तूष्णीको भवति मासलघु । अथ हुङ्कारादिकं रटसीति पर्यन्तं करोति तदा षड्गुरुकान्तम् । तद्यथा—हुङ्कारं करोति मासगुरु, 'किम् ?' इति भाषते न 'मस्तकेन वन्दे' इति ब्रवीति चतुर्लघु, 'किं चटकरं करोषि ?' इति ब्रुवाणस्य चतुर्गुरु, 'किं निर्वृतिं न ददासि ?' इति भाषमाणस्य षड्लघु, 'कियन्तं वा कालं रटसि ?' इति ब्रुवतः षड्गुरु । 30

१ °राः । इह च परेणाभाषितस्य यत् तूष्णीकत्वं तत् तस्यासमाधाननिबन्धनतया परुषवचनमिव परुषवचनमित्युपमानाद् द्रष्टव्यम् ॥ ६१०५ ॥ अथै° कां० ॥ २ °चार्यः 'आर्य ! वर्त्ततेऽनाबाधं भवताम्' इत्युक्तः सन् एव तूष्णी° कां० ॥

व्याहृतस्य तूष्णीकतादिषु पदेषु मासगुरुकादारब्धं छेदान्तं ज्ञेयम् ॥ ६१०७ ॥

व्यापारितस्य चतुर्लघुकादारब्धं मूलान्तम् । पृष्टस्य चतुर्गुरुकादारब्धं 'नवमम्' अनवस्थाप्यम् । 'निसृष्टस्य' 'इदं गृहाण, भुङ्क्ष्व' इत्याद्युक्तस्य 'षट्स्वपि' तूष्णीकादिपदेषु षड्लघुकादारब्धं चरमं-पाराञ्चिकं तदन्तं ज्ञातव्यम् ॥ ६१०८ ॥ एवमाचार्येणा[3]चार्यस्यालप्तादिपदेषु शोधिरुक्ता । 5 अथाऽऽचार्येणैवालप्तादीनामुपाध्यायप्रभृतीनां[4] शोधिं दर्शयितुमाह—

एवमुवज्झाएणं, भिक्खू थेरेण खुड्डएणं च ।
आलत्ताइपएहिं, इक्किक्कपयं तु हासिज्जा ॥ ६१०९ ॥

'एवम्' आचार्यवदुपाध्यायेन भिक्षुणा स्थविरेण क्षुल्लकेन च समं आलप्तादिपदैः प्रत्येकं तूष्णीकतादिप्रकारषट्के यथाक्रममेकैकं प्रायश्चित्तपदं ह्रासयेत् । तद्यथा—आचार्य उपाध्याय-10 मनुरूपेणाभिलापेनालपति ततो यदि उपाध्यायस्तूष्णीक आस्ते तदा गुरुभिन्नमासः, हुङ्कारं करोति मासलघु[5], एवं यावत् 'किमेतावन्मात्रमारटसि ?' इति भणतः षड्लघु । व्याहृतस्यैतेष्वेव तूष्णीकादिषु पदेषु लघुमासादारब्धं षड्गुरुकान्तम्, व्यापारितस्य गुरुमासादिकं छेदान्तम्, पृष्टस्य चतुर्लघुकादिकं मूलान्तम्, निसृष्टस्य चतुर्गुरुकादिकमनवस्थाप्यान्तं द्रष्टव्यम् । एवमाचार्येणैव भिक्षोरालप्तादिषु पदेषु[6] लघुभिन्नमासादारब्धं मूलान्तम्, स्थविरस्य गुरुविंशतिरात्रि-15 न्दिवादारब्धं छेदान्तम्, क्षुल्लकस्य लघुविंशतिरात्रिन्दिवादारब्धं षड्गुरुकान्तं प्रायश्चित्तं प्रतिपत्तव्यम् ॥ ६१०९ ॥ एवं तावदाचार्यस्याचार्यादिभिः पञ्चभिः पदैः समं चारणिका दर्शिता । साम्प्रतमुपाध्यायादीनां चतुर्णामप्याचार्यादिपदपञ्चकेन चारणिकां दर्शयति—

आयरियादभिसेगो, एक्कगहीणो तदिक्किणा भिक्खू ।
थेरो तु तदिक्केणं, थेरा खुड्डो वि एगेणं ॥ ६११० ॥

20 आचार्याद् 'अभिषेकः' उपाध्याय आलापादिपदानि कुर्वाणश्चारणिकायामेकेन प्रायश्चित्तपदेन हीनो भवति । तद्यथा—उपाध्याय आचार्यमालपति 'क्षमाश्रमणाः ! कथं वर्तते ?' इत्यादि, एवमालप्त आचार्यस्तूष्णीक आस्ते भिन्नमासो गुरुकः, हुङ्कारं करोति मा[7]सलघु, एवं

---

१ 'व्याहृतस्य तु' 'इत आगच्छत' इत्येवमाकारितस्य तूष्णीकतादिषु पदेषु मासगुरुकादारब्धं छेदान्तं ज्ञेयम् ॥ 'व्यापारितस्य' 'इदं कुरु इदं मा कुरु' इति नियुक्तस्य चतुर्लघुकादारब्धं मूलान्तम् । 'पृष्टस्य' 'किं कृतम् ? किं वा न कृतम्' इत्यादिपर्यनुयुक्तस्य चतुर्गुरुकादारब्धं कां० ॥ २ °त्याद्यादिष्टस्य 'ष° कां० ॥ ३ °णालपितादेराचार्यस्य तूष्णीकतादिपदेषु कां० ॥ ४ °नां तूष्णीकतादिपदेषु शो° कां० ॥ ५ °घु, 'किम्' इति भाषते मासगुरु । 'किं चटकरं करोषि ?' इति ब्रुवाणस्य चतुर्लघु । 'किं निर्वृतिं न ददासि ?' इति जल्पतश्चतुर्गुरु । 'किमेताव° कां० ॥ ६ °षु प्रत्येकं तूष्णीकतादिभिः पदैर्लघु° कां० ॥ ७ मासलघु, 'किम् ?' इति भाषते मासगुरु, 'किं चटकरं करोषि ?' इति भणति चतुर्लघु, 'किं निर्वृतिं न ददासि ?' इति ब्रुवतश्चतुर्गुरु, 'कियद्वाऽऽरटसि ?' इति जल्पतः षड्लघु । एवं व्याहृत-व्यापारित-पृष्ट-निसृष्टपदेष्वपि यथाक्रमं मासलघु-मासगुरु-चतुर्लघु-चतुर्गुरुकमारब्धमनेनैव चारणिका° कां० ॥

तेनैव चारणिकाक्रमेण तावद् नेयं यावद् उपाध्यायेनाचार्यस्य निसृष्टस्य 'किमेतावदारटसि ?' इतिब्रुवाणस्यानवस्थाप्यम् । अथोपाध्याय उपाध्यायमालपति तत आलप्तादिषु पञ्चसु पदेषु तूष्णीकतादिभिः षड्भिः पदैः प्रत्येकं चार्यमाणैर्लघुभिन्नमासादारब्धं मूले तिष्ठति । एवमुपाध्यायेनैव भिक्षोरालप्तादिषु पदेषु तूष्णीकतादिभिरेव पदैर्गुरुविंशतिरात्रिन्दिवादारब्धं छेदान्तम्, स्थविरस्य लघुविंशतिरात्रिन्दिवादारब्धं षड्गुरुकान्तम्, क्षुल्लकस्य गुरुपञ्चदशरात्रिन्दिवादारब्धं 5 षड्लघुकान्तं द्रष्टव्यम् । यदा तु भिक्षुराचार्यादीनालपति तदा ततः—उपाध्यायादेकेन पदेन हीनो भवति, सर्वचारणिकाप्रयोगेण लघुपञ्चदशरात्रिन्दिवादारब्धं प्रायश्चित्तं मूले तिष्ठतीत्यर्थः । यदा तु स्थविर आलपति तदा ततः—भिक्षोरेकेन पदेन हीनो भवति, सर्वचारणिकाप्रयोगेण गुरुदशरात्रिन्दिवादारब्धं छेदे तिष्ठतीत्यर्थः । यदा तु क्षुल्लक आचार्यादीनालपति तदा सोऽप्येकेन पदेन हीनो भवति । तद्यथा—क्षुल्लक आचार्यमालपति यदि आचार्यस्तूष्णीका- 10 दीनि पदानि करोति तत आलप्तादिषु पञ्चसु पदेषु लघुविंशतिरात्रिन्दिवादारब्धं षड्गुरुके तिष्ठति । एवं क्षुल्लकेनैवोपाध्यायस्यालप्तादिषु पदेषु तूष्णीकतादिभिः षड्भिः पदैः प्रत्येकं चार्यमाणैर्गुरुपञ्चदशकादारब्धं षड्लघुकान्तम्, भिक्षोर्लघुपञ्चदशकादारब्धं चतुर्गुरुकान्तम्, स्थविरस्य गुरुदशकादारब्धं चतुर्लघुकान्तम्, क्षुल्लकस्य लघुदशकादारब्धं मासगुरुकान्तं प्रायश्चित्तं भवति । एवं सर्वचारणिकाप्रयोगेण लघुदशकादारब्धं षड्गुरुके तिष्ठतीति ॥ ६११० ॥ 15

एवं तावन्निर्ग्रन्थानामुक्तम् । अथ निर्ग्रन्थीनामतिदिशन्नाह—

भिक्खुसरिसी तु गणिणी, थेरसरिच्छी तु होइ अभिसेगा ।
भिक्खुणि खुड्डसरिच्छी, गुरु-लहुपणगाइ दो इयरा ॥ ६१११ ॥

इह निर्ग्रन्थीवर्गेऽपि पञ्च पदानि, तद्यथा—प्रवर्तिनी अभिषेका भिक्षुणी स्थविरा क्षुल्लिका च । तत्र 'गणिनी' प्रवर्तिनी सा भिक्षुसदृशी मन्तव्या । किमुक्तं भवति ?—प्रवर्तिनी प्रवर्तिनी- 20 प्रभृतीनां पञ्चानामन्यतमामालप्तादिभिः प्रकारैरालपति, सा चाऽऽलप्यमाना तूष्णीकादिपदषट्कं करोति ततो भिक्षावालपति यदाचार्यादीनां प्रायश्चित्तमुक्तं तत् तासां प्रवर्तिनीप्रभृतीनां मन्तव्यम् । अथाभिषेका प्रवर्तिन्यादीनामन्यतरामालपति सा च तूष्णीकादिपदानि करोति ततः स्थविरे आलपति यदाचार्यादीनां प्रायश्चित्तमुक्तं तत् तासां द्रष्टव्यम्, अत एवाह—स्थविरसदृक्षा अभिषेका भवति । अथ भिक्षुणी प्रवर्तिनीप्रभृतिकामालपति सा च तूष्णी- 25 कादीनि करोति ततः क्षुल्लके आलपति यदाचार्यादीनां प्रायश्चित्तमुक्तं तत् तासामपि यथाक्रमं ज्ञेयम्, अत एवाह—भिक्षुणी क्षुल्लकसदृशी । अथ स्थविरा प्रवर्तिनीप्रभृतिकामालपति ततः प्रवर्तिन्यास्तूष्णीकादिपदषट्कं कुर्वाणाया गुरुपञ्चदशकादिकं षड्लघुकान्तम्, अभिषेकाया लघुपञ्चदशकादिकं चतुर्गुरुकान्तम्, भिक्षुण्या गुरुदशकादिकं चतुर्लघुकान्तम्, स्थविराया लघुदशकादिकं मासगुरुकान्तम्, क्षुल्लिकाया गुरुपञ्चकादिकं मासलघुकान्तं ज्ञेयम् । अथ क्षुल्लिका 30

१ ताश्चालप्यमानास्तूष्णीकतादिपदषट्कं कुर्वन्ति ततो भिक्षावालपति यदाचार्यादीनां प्रायश्चित्तमुक्तं तत् तासां द्रष्टव्यम् । अथाभिषेकया आलपितादिप्रकारपञ्चकेन प्रवर्तिनीप्रभृतयः पञ्चापि जल्पिताः सन्तस्तूष्णीकतादिपदषट्कं कुर्वन्ति ततः स्थविरे का० ॥

प्रवर्तिनीप्रभृतिकामालपति सा च तूष्णीकादीनि पदानि करोति ततः प्रवर्तिन्या लघुपञ्चदशकादिकं चतुर्गुरुकान्तम्, अभिषेकाया गुरुदशकादिकं चतुर्लघुकान्तम्, भिक्षुण्या लघुदशकादिकं मासगुरुकान्तम्, स्थविराया गुरुपञ्चकादिकं मासलघुकान्तम्, क्षुल्लिकाया लघुपञ्चकादिकं गुरुभिन्नमासान्तं मन्तव्यम् । अत एवाह—"गुरु-लहुपणगाइ दो इयर" त्ति 'इतरे' स्थविरा-
5 क्षुल्लिके तयोर्द्वयोरपि यथाक्रमं गुरुपञ्चकादिकं लघुपञ्चकादिकं च प्रायश्चित्तं भवति ॥६१११॥

इह परुषग्रहणेन निष्ठुर-कर्कशे अपि सूचिते, ततस्तयोः प्रायश्चित्तं दर्शयितुं परुषस्य च प्रकारान्तरेण शोधिमभिधातुमाह—

लहुओ य लहुसगम्मि, गुरुगो आगाढ फरुस वयमाणे ।
णिट्ठुर-कक्कसवयणे, गुरुगा य पतोसओ जं च ॥ ६११२ ॥

10 'लहुसके' स्तोके परुषवचने सामान्यतोऽभिधीयमाने मासलघु । आगाढपरुषं वदतो मासगुरु । निष्ठुरवचने कर्कशवचने चत्वारो गुरवः । यच्च ते परुषं भणिताः प्रद्वेषतः करिष्यन्ति तन्निष्पन्नं प्रायश्चित्तम् ॥ ६११२ ॥

अथ किमिदं निष्ठुरं ? किं वा कर्कशम् ? इत्याशङ्कावकाशं विलोक्याऽऽह—

निव्वेद पुच्छितम्मि, उब्भामइल त्ति णिट्ठुरं सव्वं ।
15 **मेहुण संसट्ठ कक्कसाइँ णिव्वेग साहेति ॥ ६११३ ॥**

कयाऽपि महेलया कोऽपि साधुः पृष्टः—केन निर्वेदेन त्वं प्रव्रजितः ? । स प्राह—मदीया भोजिका 'उद्भ्रामिका' दुःशीला अतोऽहं प्रव्रजितः । एवमादिकं सर्वमपि निष्ठुरमुच्यते । तथा मैथुने 'संसृष्टं' विलीनभावं दृष्ट्वा प्रव्रजितोऽहम् । एवं निर्वेदं यत् कथयति तदेवमादीनि वचांसि कर्कशानि मन्तव्यानि ॥ ६११३ ॥ इदमेव व्याचष्टे—

20 **मयं व जं होइ रयावसाणे, तं चिक्कणं गुज्झ मलं झरंतं ।**
अंगेसु अंगाइँ णिगूहयंती, णिव्वेयमेयं मम जाण सोमे ! ॥ ६११४ ॥
सखेदणीसट्ठविमुक्कगत्तो, भारेण छिन्नो ससई व दीहं ।
हीओ मि जं आसि रयावसाणे, अणेगसो तेण दमं पवण्णो ॥६११५॥

यद् रतावसाने मृतमिव भवति तदेवंविधं गुह्यं चिक्कणं मलं 'क्षरत्' परिगलद्, भार्या
25 चात्मीयेष्वङ्गेषु आत्मीयान्येवाङ्गानि जुगुप्सनीयतया निगूहयन्ती मया दृष्टा, एतद् मे 'निर्वेदं' निर्वेदकारणं हे सौम्ये ! जानीहि ॥ ६११४ ॥ तथा—

सखेदं "नीसट्ठं" अत्यर्थं विमुक्तगात्रः शिथिलीकृताङ्गो भारेण 'छिन्नः' त्रुटितो भारवाहको यथा दीर्घं निःश्वसिति तथाऽहमपि रतावसाने यदनेकश एवंविधः 'आसम्' अभूवं तद् अतीव 'ह्रीतः' लज्जितः, एतेन निर्वेदेन 'दमं' संयमं पाठान्तरेण व्रतं वा प्रपन्नोऽहम् ॥६११५॥

---

१ °वति ॥ ६१११ ॥ तदेवं दर्शितं परुषवचनविषयं प्रायश्चित्तनिकुरम्बम् । इह च परुष° कां० ॥ २ °ओ व ससं व ताभा० ॥ ३ °ण वतं प° ताभा० ॥ ४ स साधुस्तया पृष्टः सन् इत्थमात्मीयं निर्वेदमाह—यद् रता° कां० ॥ ५ °हमिति । एवमादिकं निर्वेदं यत् कथयति तत् कर्कशवचनं मन्तव्यम् ॥ ६११५ ॥ कां० ॥

गतं परुषवचनम् । अथागारस्थितवचनमाह—

अरे हरे बंभण पुत्ता, अव्वो बप्पो त्ति भाय मामो त्ति ।
भट्टिय सामिय गोमिय, लहुओ लहुआ य गुरुआ य ॥ ६११६ ॥

अरे इति वा हरे इति वा ब्राह्मण इति वा पुत्र इति वा यदि आमन्त्रणवचनं ब्रूते तदा मासलघु । अव्वो बप्पो भ्रातर् मामक उपलक्षणत्वाद् अम्ब भागिनेय इत्यादीन्यपि यदि वक्ति 5 तदा चतुर्लघु । अथ भट्टिन् स्वामिन् गोमिन् इत्यादीनि गौरवगर्भाणि वचांसि ब्रूते तदा चतुर्गुरुकाः आज्ञादयश्च दोषाः ॥ ६११६ ॥

संथवमादी दोसा, हवंति धी मुंड ! को व तुह बंधू ।
मिच्छत्तं दिय वयणे, ओभावणता य सामि त्ति ॥ ६११७ ॥

भ्रातृ-मामकादीनि वचनानि ब्रुवाणेन संस्तवः—पूर्वसंस्तवादिरूपः कृतो भवति, ततश्च प्रति- 10 बन्धादयो बहवो दोषा भवन्ति । अम्ब तात इत्यादि ब्रुवतः श्रुत्वा लोकश्चिन्तयेत्—अहो ! एतेषामपि माता-पित्रादयः पूजनीयाः । अविरतिकाश्चामन्त्रयतो भूयस्तरा दोषाः । यद्वा स गृहस्थस्तेनासद्भूतसम्बन्धोद्घट्टनेन रुष्टो ब्रूयात्—धिग् मुण्ड ! कस्तवात्र 'बन्धुः' स्वजनोऽस्ति येनैवं प्रलपसि ? । उपलक्षणमिदम्, अरे हरे इत्यादि ब्रुवतः परो ब्रूयात्—त्वं तावद् मां न जानीषे कोऽप्यहमस्मि ततः किमेवम् अरे इत्यादि भणसि ? । एवमसङ्खडादयो दोषाः । 15 'द्विजवचने च' ब्राह्मण इत्येवमभिधाने च मिथ्यात्वं भवति[3] । स्वामिन् इत्याद्यभिधाने च प्रवचनस्यापभ्राजना भवति ॥६११७॥ गतमगारस्थितवचनम् । अथ व्यवशमितोदीरणवचनमाह—

खामित-वोसविताइं, अधिकरणाइं तु जे उईरेंति ।
ते पावा णायव्वा, तेसिं च परूवणा इणमो ॥ ६११८ ॥

क्षामितानि—वचसा मिथ्यादुष्कृतप्रदानेन शमितानि, वोसवितानि—विविधमनेकधा मनसा 20 व्युत्सृष्टानि, क्षामितानि च तानि व्युत्सृष्टानि चेति क्षामित-व्युत्सृष्टानि । एवंविधान्यधिकरणानि ये भूय उदीरयन्ति ते 'पापाः' साधुधर्मबाह्या ज्ञातव्याः । तेषां च ईयं[4] प्ररूपणा ॥ ६११८ ॥

उप्पायग उप्पण्णे, संबद्धे कक्खडे य बाहू य ।
आवड्डणा य मुच्छण, समुघायऽतिवायणा चेव ॥ ६११९ ॥
लहुओ लहुगा गुरुगा, छम्मासा होंति लहुग गुरुगा य । 25
छेदो मूलं च तहा, अणवट्ठप्पो य पारंची ॥ ६१२० ॥

द्वौ[5] साधू पूर्वं कलहं कृतवन्तौ, तत्र च क्षामित-व्युत्सृष्टेऽपि तस्मिन्नधिकरणेऽन्यदा तयोरेक एवं भणति—एवं नाम त्वया तदानीमहमित्थमित्थं च भणितः; एष उत्पादक उच्यते, अस्य

---

१ अव्वो बप्पो ताभा० । चूर्णौ अप्पो बप्पो इति दृश्यते ॥ २ अत्रान्तरे ग्रन्थाग्रम्—८००० कां० ॥ ३ °वति, ब्रह्म चरतीति ब्राह्मण इति व्युत्पत्त्यर्थस्य तत्राघटनात् । स्वामिन् इत्याद्यभिधाने च प्रवचनस्यापभ्राजना भवति, अहो ! चाटुकारिणोऽमी इत्यादि ॥ ६११७ ॥ कां० ॥ ४ 'इयं' वक्ष्यमाणलक्षणा प्ररूपणा ॥ ६११८ ॥ तामेवाह—उप्पायग कां० ॥ ५ इह गाथाद्वयस्यापि पदानां यथासङ्ख्यं योजना कार्या । तद्यथा—द्वौ साधू कां० ॥

च मासलघु । इतरोऽपि ब्रूते—अहमपि त्वया तदानीं किं स्तोकं भणितः ?; एवमुक्त उत्पादकः प्राह—यदि तदानीं त्वमभणिष्यस्तदा किमहमेवमेव त्वाममोक्ष्यम् ?; एवमधिकरणमुत्पन्न-मुच्यते, तत्र द्वयोरपि चतुर्लघु । सम्बद्धं नाम—वचसा परस्परमाक्रोशनं कर्तुमारब्धं तत्र चतुर्गुरु । कर्कशं नाम—तटस्थितैरुपशम्यमानावपि नोपशाम्यतस्तदा षड्लघु । "बाहु" त्ति रोषभरपर-5वशतया बाहूबाहवि युद्धं कर्तुं लग्नौ तत्र षड्गुरुकाः । आवर्तना नाम—एकेनापरो निहत्य पातितस्तत्र च्छेदः । योऽसौ निहतः स मूर्च्छां यदि प्राप्तस्तदा मूलम् । मारणान्तिकसमुद्घाते समवहतेऽनवस्थाप्यम् । अतिपातना—मरणं तत्र पाराञ्चिकम् ॥ ६११९ ॥ ६१२० ॥

अथ द्वितीयपदमाह—

पढमं विगिंचणट्ठा, उवलंभ विविंचणा य दोसु भवे ।
10 अणुसासणाय देसी, छट्ठे य विगिंचणा भणिता ॥ ६१२१ ॥

'प्रथमम्' अलीकवचनमयोग्यशैक्षस्य विवेचनार्थं वदेत् । 'द्वयोस्तु' हीलित-खिंसितवचन-योर्यथाक्रममुपालम्भ-विवेचने कारणे भवतः, शिक्षादानमयोग्यशैक्षपरित्यागश्चेत्यर्थः । परुषवचनं तु खरसाध्यस्यानुशासनां कुर्वन् ब्रूयात् । गृहस्थवचनं पुनः 'देशीं' देशभाषामाश्रित्य भणेत् । 'षष्ठे च' व्यवशमितोदीरणवचने शैक्षस्य विवेचनं कारणं भणितम् । गाथायां स्त्रीत्वनिर्देशः 15 प्राकृतत्वादिति[2] द्वारगाथासमासार्थः ॥ ६१२१ ॥ अथैनां विवरीषुराह—

कारणियदिक्खितं तीरियम्मि कज्जे जहंति अणलं तू ।
संजम-जसरक्खट्ठा, होढं दाऊण य पलादी ॥ ६१२२ ॥

कारणे—अशिवादौ अनलः—अयोग्यः शैक्षो दीक्षितः, ततः 'तीरिते' समापिते तस्मिन् कार्ये तं अनलं 'जहन्ति' परित्यजन्ति । कथम् ? इत्याह—'संयम-यशोरक्षार्थं' संयमस्य प्रवचनयशः-20 प्रवादस्य च रक्षणार्थं 'होढं' गाढमलीकं दत्त्वा पलायन्ते, शीघ्रमन्यत्र गच्छन्तीत्यर्थः ॥ ६१२२ ॥

यः पुनराचार्यः सामाचार्यां सारणादिप्रदाने वा सीदति तमुद्दिश्येत्थं हीलितवचनं वदेत्—

केणेस गणि त्ति कतो, अहो ! गणी भणति वा गणिं अगणिं ।
एवं विसीतमाणस्स कुणति गणिणो उवालंभं ॥ ६१२३ ॥

केनासमीक्षितकारिणैष गणी कृतः ?, यद्वा अहो ! अयं गणी, अथवा गणिनमप्यगणिनं 25 भणति । एवं गणिनः सामाचार्यां शिक्षादाने वा विषीदत उपालम्भं करोति ॥ ६१२३ ॥

अगणिं पि भणाति गणिं, जति नाम पढेज्ज गारवेण वि ता ।
एमेव सेसएसु वि, वायगमादीसु जोएज्जा ॥ ६१२४ ॥

यदि कोऽपि बहुशोऽपि भण्यमानो न पठति ततस्तमगणिनमपि गणिनं भणति यदि नाम गौरवेणापि पठेत् । एवमेव शेषेष्वपि वाचकादिषु[3] पदेषु द्वितीयपदं 'योजयेत्' योजनां 30 कुर्यात् ॥ ६१२४ ॥

---

१ गतं व्यवशमितोदीरणवचनम् । अथ द्विती° इतिरूपमवतरणं कां० ॥ २ °ति निर्युक्ति-गाथासमासार्थः ॥ ६१२१ ॥ अथैनामेव भाष्यकारो विवरीषु° कां० ॥ ३ 'वाचकादिषु' वाचक-बहुश्रुत-मेधाविप्रभृतिषु पदेषु कां० ॥

खिंसावयणविहाणा, जे च्चिय जाती-कुलादि¹ पुव्वुत्ता ।
कारणियदिक्खियाणं, ते चेव विगिंचणोवाया ॥ ६१२५ ॥

खिंसावचनविधानानि यान्येव जाति-कुलादीनि पूर्वमुक्तानि त एव 'कारणिकदीक्षितानां' अयोग्यानां कारणप्रव्राजितानां विवेचने—परिष्ठापने उपाया मन्तव्याः ॥ ६१२५ ॥

खरसज्झं मउयवइं, अगणेमाणं भणंति फरुसं पि ।
दव्वफरुसं च वयणं, वयंति देसिं समासज्जा ॥ ६१२६ ॥

इह यः कठोरवचनभणनमन्तरेण शिक्षां न प्रतिपद्यते स खरसाध्य उच्यते, तं खरसाध्यं मृद्वीं वाचमगणयन्तं परुषमपि भणन्ति । यद्वा 'देशीं' देशभाषां समासाद्य द्रव्यतः परुषवचनमपि वदन्ति । द्रव्यतो नाम—न दुष्टभावतया परुषं भणन्ति किन्तु तत्स्वाभाव्यात्, यथा मालवाः परुषवाक्या भवन्ति ॥ ६१२६ ॥

भट्टि त्ति अमुगभट्टि, त्ति वा वि एमेव गोमि सामि त्ति ।
जह णं भणाति लोगो, भणाति² तह देसिमासज्ज ॥ ६१२७ ॥

भट्टिन् इति वा अमुगभट्टिन् इति वा एवमेव गोमिन् इति वा स्वामिन् इति³ वा यथा यथा लोको भणति तथा तथा 'देशीं' देशभाषामाश्रित्य साधवोऽपि भणन्ति ॥ ६१२७ ॥

खामिय-वोसवियाइं, उप्पाएऊण दव्वतो रुट्ठो ।
कारणदिक्खिय अनलं, आसंखडिउ त्ति धाडेति ॥ ६१२८ ॥

यः कारणे अनलो दीक्षितस्तेन समं समापिते कार्ये क्षामित-व्युत्सृष्टान्यधिकरणान्युत्पाद्य 'द्रव्यतः' दुष्टभावं विना 'रुष्टः' कुपितः, बहिः कृत्रिमान् कोपविकारान् दर्शयन्नित्यर्थः, आसङ्खडिकोऽयं इति दोषमुत्पाद्य तमनलं शैक्षं 'धाटयति' गच्छाद् निष्काशयति ॥ ६१२८ ॥

॥ वचनप्रकृतं समाप्तम् ॥

प्र स्ता र प्र कृ त म्

सूत्रम्—

छ कप्पस्स पत्थारा पण्णत्ता, तं जहा—पाणाइवायस्स वायं वयमाणे, मुसावायस्स वायं वयमाणे, अदिण्णादाणस्स वायं वयमाणे, अविरइयावायं वयमाणे, अपुरिसवायं वयमाणे, दासवायं वयमाणे ।

---

१ °लादिया वुत्ता ताभा० कां० विना ॥ २ °ति तं देसि° ताभा० ॥ ३ इति वा "जह" त्ति इह उत्तरत्र च वीप्सायां गम्यमानत्वाद् यथा यथा लोको भणति "णं" इति तद् वचनं ब्रवीति तथा तथा कां० ॥

इच्चेते छ कप्पस्स पत्थारे पत्थरित्ता सम्मं अप्प-डिपूरेमाणे तट्ठाणपत्ते सिया २ ॥

अस्य सूत्रस्य सम्बन्धमाह—

तुल्लहिकरणा संखा, तुल्लहिगारो व वादिओ दोसो ।
5 **अहवा अयमधिगारो, सा आवत्ती इहं दाणं ॥ ६१२९ ॥**

'द्वयोरपि' अनन्तर-प्रस्तुतसूत्रयोस्तुल्याधिकरणा सङ्ख्या, समानः षट्सङ्ख्यालक्षणोऽधिकार इत्यर्थः । यद्वा वाचिको दोषस्तुल्याधिकारः, उभयोरपि सूत्रयोर्वचनदोषोऽधिकृत इति भावः । अथवाऽयमपरोऽधिकार उच्यते—'सा' पूर्वसूत्रोक्ता शोधिरापत्तिरूपा, इह तु तस्या एव शोधेर्दानमधिक्रियते ॥ ६१२९ ॥

10 अनेन सम्बन्धेनायातस्यास्य व्याख्या—कल्पः—साधुसमाचारस्तस्य सम्बन्धेन तद्विशुद्धि-कारणत्वात् 'प्रस्ताराः' प्रायश्चित्तरचनाविशेषाः षट् प्रज्ञप्ताः । तद्यथा—प्राणातिपातस्य 'वादं' वार्तां वाचं वा वदति साधौ प्रायश्चित्तप्रस्तारो भवतीत्येकः १ । एवं मृषावादस्य वादं वदति द्वितीयः । अदत्तादानस्य वादं वदति तृतीयः । अविरतिः—अब्रह्म, यद्वा न विद्यते विरतिरस्याः सा अविरतिका—स्त्री तद्वादं वदति चतुर्थः । अपुरुषः—नपुंसकस्तद्वादं वदति पञ्चमः । दासवादं 15 वदति षष्ठः । 'इति' इत्युपप्रदर्शने । एवंप्रकारानेतान् षट् कल्पस्य 'प्रस्तारान्' प्रायश्चित्तरचना-विशेषान् 'प्रस्तीर्य' अभ्युपगमत आत्मनि प्रस्तुतान् विधाय 'प्रस्तारयिता वा' अभ्याख्यानदाता साधुः सम्यग् 'अप्रतिपूरयन्' अभ्याख्येयार्थस्यासद्भूततया अभ्याख्यानसमर्थनं कर्तुमशक्नुवन् तस्यैव—प्राणातिपातादिकर्तुरिव स्थानं प्राप्तस्तत्स्थानप्राप्तः स्यात्, प्राणातिपातादिकारीव दण्ड-नीयो भवेदिति भावः । अथवा प्रस्तारान् 'प्रस्तीर्य' विरचय्याऽऽचार्येणाभ्याख्यानदाता 20 'अप्रतिपूरयन्' अपरापरप्रत्ययवचनैस्तमर्थं सत्यमकुर्वन् तत्स्थानप्राप्तः कर्तव्य इति शेषः, यत्र प्रायश्चित्तपदे विवदमानोऽवतिष्ठते न पदान्तरमारभते तत् पदं प्रापणीय इति भावः । एष सूत्रार्थः ॥ अथ भाष्यकारो विषमपदव्याख्यामाह—

पत्थारो उ विरचणा, सो जोतिस छंद गणित पच्छित्तं ।
पच्छित्तेण तु पगयं, तस्स तु भेदा बहुविगप्पा ॥ ६१३० ॥

25 प्रस्तारो नाम विरचना, स्थापना इत्यर्थः । स च चतुर्द्धा—ज्योतिषप्रस्तारः छन्दःप्रस्तारो गणितप्रस्तारः प्रायश्चित्तप्रस्तारश्चेति । अत्र प्रायश्चित्तप्रस्तारेण प्रकृतम् । 'तस्य च' प्रायश्चित्तस्यामी 'बहुविकल्पाः' अनेकप्रकारा भेदा भवन्ति ॥ ६१३० ॥ तद्यथा—

उग्घातमणुग्घाते, मीसे य पसंगि अप्पसंगी य ।
आवज्जण-दाणाइं, पडुच्च वत्थुं दुपक्खे वी ॥ ६१३१ ॥

30 इह प्रायश्चित्तं द्विधा—उद्घातमनुद्घातं च । उद्घातं—लघुकम्, तच्च लघुमासादि । अनु-द्घातिकं—गुरुकम्, तच्च गुरुमासादि । तदुभयमपि द्विधा—मिश्रं चशब्दाद् अमिश्रं च । मिश्रं

---

१ °गि होति अपसंगी । आव° ताभा० ॥

नाम—लघुमासादिकं तपः-कालयोरेकतरेण द्वाभ्यां वा गुरुकम्, गुरुमासादिकं वा तपसा कालेन वा द्वाभ्यां वा लघुकम् । अमिश्रं तु लघुमासादिकं तपः-कालाभ्यां द्वाभ्यामपि लघुकम्, गुरुमासादिकं वा द्वाभ्यामपि गुरुकम् । उभयमपि च तपः-कालविशेषरहितं पुनरपि द्विधा—प्रसक्ति अप्रसक्ति च । प्रसक्ति नाम—यद् अभीक्ष्णप्रतिसेवारूपेण शङ्का-भोजिका-घाटिकादिपरम्परारूपेण वा प्रसङ्गेन युक्तम्[1], तद्विपरीतमप्रसक्ति । भूयोऽप्येतदेकैकं द्विधा—आपत्ति- 5 प्रायश्चित्तं दानप्रायश्चित्तं च । एतत् सर्वमपि प्रायश्चित्तं 'द्विपक्षेऽपि' श्रमणपक्षे श्रमणीपक्षे च वस्तु प्रतीत्य मन्तव्यम् । वस्तु नाम—आचार्यादिकं प्रवर्तिनीप्रभृतिकं च, ततो यस्य वस्तुनो यत् प्रायश्चित्तं योग्यं तत् तस्य भवतीति भावः । एष प्रायश्चित्तप्रस्तार उच्यते ॥ ६१३१ ॥

"सम्मं अपडिपूरेमाणे" त्ति पदं व्याचष्टे—

जारिसएणऽभिसत्तो, स चाधिकारी ण तस्स ठाणस्स । 10

सम्मं अपूरयंतो, पचंगिरमप्पणो कुणति ॥ ६१३२ ॥

'यादृशेन' दर्दुरमारणादिना[2]ऽभ्याख्यानेन 'सः' साधुः 'अभिशप्तः' अभ्याख्यातः स तस्य स्थानस्य 'नाधिकारी' न योग्यः अप्रमत्तत्वात्; अतोऽभ्याख्यानं दत्त्वा सम्यग् 'अप्रतिपूरयन्' अनिर्वाहयन् आत्मनः प्रत्यङ्गिरां करोति, तं दोषमात्मनो लगयतीत्यर्थः ॥ ६१३२ ॥

कृता विषमपदव्याख्या भाष्यकृता । सम्प्रति निर्युक्तिविस्तरः— 15

छ च्चेव य पत्थारा, पाणवह मुसे अदत्तदाणे य ।

अविरति-अपुरिसवाते, दासावातं च वतमाणे ॥ ६१३३ ॥

षडेव प्रस्ताराः[3] भवन्ति । तद्यथा—प्राणवधवादं मृषावादवादं अदत्तादानवादमविरतिकावादमपुरुषवादं दासवादं च वदति इति ॥ ६१३३ ॥

तत्र प्राणवधवादे प्रस्तारं तावदभिधित्सुराह— 20

दद्दुर सुणए सप्पे, मूसग पाणातिवादुदाहरणा ।

एतेसिं पत्थारं, वोच्छामि अहाणुपुव्वीए ॥ ६१३४ ॥

प्राणातिपाते एतानि 'उदाहरणानि' निदर्शनानि भवन्ति—दर्दुरः शुनकः सर्पो मूषकश्चेति । 'एतेषाम्' एतद्विषयमित्यर्थः 'प्रस्तारं' प्रायश्चित्तरचनाविशेषं यथानुपूर्व्या वक्ष्यामि ॥ ६१३४ ॥ तत्र[4] दर्दुरविषयं तावदाह— 25

ओमो चोदिज्जंतो, दुपेहियादीसु संपसारेति ।

अहमवि णं चोदिस्सं, न य लब्भति तारिसं छेड्डुं ॥ ६१३५ ॥

'अवमः' अवमरात्निको रात्निकेन दुःप्रत्युपेक्षितादिषु स्खलितेषु भूयो भूयो नोद्यमानः 'सम्प्रसारयति' मनसि पर्यालोचयति—अहमपि "णं" एनं रात्निकं नोदयिष्यामि । एवं

१ °वानिष्पन्नेन शङ्का-भोजिका-घाटिकानिवेदनादिपरम्परानिष्पन्नेन वा प्रसङ्गप्रायश्चित्तेन युक्तम्, कां० ॥ २ °ना वक्ष्यमाणलक्षणेनाऽभ्याख्या° कां० ॥ ३ 'प्रस्ताराः' प्रायश्चित्तरचनाविशेषा भवन्ति, न पञ्च न वा सप्त इत्येवकारार्थः । तद्यथा कां० ॥ ४ प्रतिज्ञातमेव निर्वाहयन् दर्दुरविषयं प्रस्तारं तावदाह इतिरूपमवतरणं कां० ॥

पर्यालोच्य प्रयत्नेन गवेषयन्नपि तादृशं छिद्रं रात्निकस्य न लभते ॥ ६१३५ ॥

अन्नेण घातिए दद्दुरम्मि दट्ठु चलणं कतं ओमो ।
उद्दवितो एस तुमे, ण मि त्ति बितियं पि ते णत्थी ॥ ६१३६ ॥

अन्यदा च भिक्षादिपर्यटने अन्येन केनापि दर्दुरे घातिते रात्निकेन च तस्योपरि 'चलनं' पादं कृतं दृष्ट्वाऽवमो ब्रवीति—एष दर्दुरस्त्वयाऽपद्रावितः । रात्निको वक्ति—न मयाऽपद्रावितः । अवमः प्राह—'द्वितीयमपि' मृषावादव्रतं 'ते' तव नास्ति ॥ ६१३६ ॥

एवंभणतस्तस्येयं प्रायश्चित्तरचना—

वच्चति भणाति आलोय निकाए पुच्छिते णिसिद्धे य ।
साहु गिहि मिलिय सव्वे, पत्थारो जाव वयमाणे ॥ ६१३७ ॥
मासो लहुओ गुरुओ, चउरो लहुगा य होंति गुरुगा य ।
छम्मासा लहु-गुरुगा, छेदो मूलं तह दुगं च ॥ ६१३८ ॥

स एवमुक्त्वा ततो निवृत्त्याऽऽचार्यसकाशं व्रजति मासलघु । आगत्य भणति यथा—तेन दर्दुरो मारितः, एवंभणतो मासगुरु । योऽसावभ्याख्यातः स गुरूणां सकाशमागतः, आचार्यैश्चोक्तम्—"आलोय" त्ति आर्य ! सम्यगालोचय, किं सत्यं भवता दर्दुरो मारितः ?; स प्राह—न मारयामि, एवमुक्तेऽभ्याख्यानदातुश्चतुर्लघु । "निकाए" त्ति इतरो निकाचयति रात्निकस्तु भूयोऽपि तावदेव भणति तदा चतुर्गुरु । अवमरात्निको भणति—यदि न प्रत्ययस्ततस्तत्र गृहस्थाः सन्ति ते पृच्छ्यन्ताम्, ततो वृषभा गत्वा पृच्छन्ति, पृष्टे च सति षड्लघु । गृहस्थाः पृष्टाः सन्तः "णिसिद्धं" निषेधं कुर्वन्ति—नास्माभिर्दर्दुरव्यपरोपणं कुर्वन् दृष्ट इति षड्गुरु । "साहु" त्ति ते साधवः समागता आलोचयन्ति नापद्रावित इति तदा छेदः । "गिहि" त्ति अथासावभ्याख्यानदाता भणति—'गृहस्थाः' असंयता यत् प्रतिभासते तद् अलीकं सत्यं वा ब्रुवते, एवंभणतो मूलम् । अथासौ भणति—"मिलिय" त्ति गृहस्थाश्च यूयं चैकत्र मिलिता अहं पुनरेक इतिब्रुवतोऽनवस्थाप्यम् । सर्वेऽपि यूयं प्रवचनस्य बाह्या इतिभणतः पाराञ्चिकम् । एवमुत्तरोत्तरं वदतः पाराञ्चिकं यावत् प्रायश्चित्तप्रस्तारो भवति ॥ ६१३७ ॥ ६१३८ ॥ अथेदमेव भावयति—

किं आगओ सि णाहं, अडामि पाणवहकारिणा सद्धिं ।
सम्मं आलोय त्ति य, जा तिण्णि तमेव वियडेति ॥ ६१३९ ॥

रात्निकं विना स एकाकी समायातो गुरुभिरुक्तः—किमेकाकी त्वमागतोऽसि ? । स प्राह—नाहं प्राणवधकारिणा सार्द्धमटामि । एवमुक्ते रात्निक आगतो गुरुभिरुक्तः—सम्यगालोचय, कोऽपि प्राणी त्वया व्यपरोपितः ? न वा ? इति । स प्राह—न व्यपरोपितः । एवं त्रीन् वारान् यावदालोचाप्यते । यदि त्रिष्वपि वारेषु तदेव 'विकटयति' आलोचयति तदा परिस्फुटमेव कथ्यते ॥ ६१३९ ॥

---

१ °दविरतिलक्षणं व्रतं 'ते' तव नास्ति, न केवलं प्रथममित्यपिशब्दार्थः ॥ ६१३६ ॥ कां० ॥
२ °षेधनं निषिद्धं निषेधमित्यर्थः कुर्वन्ति कां० ॥

तुमए किर दद्दुरओ, हओ त्ति सो वि य भणाति ण मए त्ति ।
तेण परं तु पसंगो, धावति एक्के व बितिए वा ॥ ६१४० ॥

किल इति द्वितीयस्य साधोर्मुखादस्माभिः श्रुतम्—त्वया दर्दुरः 'हतः' विनाशितः । स प्राह—न मया हत इति । 'ततः परम्' एवंभणनानन्तरं 'प्रसङ्गः' प्रायश्चित्तवृद्धिरूपः 'एकस्मिन्' रात्निके 'द्वितीये वा' अवमरात्निके धावति । किमुक्तं भवति ?—यदि तेन रात्निकेन 5 सत्येनैव दर्दुरो व्यपरोपितः ततो यदि 'सम्यगालोचय' इतिभण्यमानो भूयो भूयो निह्नुते तदा तस्य प्रायश्चित्तवृद्धिः । अथ तेन न व्यपरोपितः ततः 'इतरस्य' अभ्याख्यानं निकाचयतः प्रायश्चित्तं वर्द्धते ॥ ६१४० ॥ इदमेव भावयति—

एक्कस्स मुसावादो, काउं णिण्हाइणो दुवे दोसा ।
तत्थ वि य अप्पसंगी, भवति य एक्को व एक्को वा ॥ ६१४१ ॥ 10

'एकस्य' अभ्याख्यानदातुरेक एव मृषावादलक्षणो दोषः । यस्तु दर्दुरवधं कृत्वा निह्नुते तस्य द्वौ दोषौ—एकः प्राणातिपातदोषो द्वितीयो मृषावाददोष इति । 'तत्रापि च' अभ्याख्याने प्राणातिपाते वा कृतेऽपि 'एको वा' अवमरात्निकः 'एको वा' रात्निको यदि अप्रसङ्गी भवति तदा न प्रायश्चित्तवृद्धिः । किमुक्तं भवति ?—यदि अवमरात्निकोऽभ्याख्यानं दत्त्वा न निकाचयति यो वाऽभ्याख्यातः सोऽपि न रुष्यति तदा न प्रायश्चित्तवृद्धिः । अथाभ्याख्याता 15 भूयो भूयः समर्थयति इतरोऽपि भूयो भूयो रुष्यति तदा प्रायश्चित्तवृद्धिः । एवं दर्दुरविषयः प्रस्तारो भावितः । शुनक-सर्प-मूषकविषया अपि प्रस्तारा एवमेव भावनीयाः ॥ ६१४१ ॥

गतः प्राणातिपातप्रस्तारः । सम्प्रति मृषावादा-ऽदत्तादानयोः प्रस्तारमाह—

मोसम्मि संखडीए, मोयगगहणं अदत्तदाणम्मि ।
आरोवणपत्थारो, तं चेव इमं तु णाणत्तं ॥ ६१४२ ॥ 20

मृषावादे सङ्खडीविषयं निदर्शनम् । अदत्तादाने मोदकग्रहणम् । एतयोर्द्वयोरप्यारोपणायाः प्रायश्चित्तस्य प्रस्तारः स एव मन्तव्यः । इदं तु 'नानात्वं' विशेषः ॥ ६१४२ ॥

दीण-कलुणेहि जायति, पडिसिद्धो विसति एसणं हणति ।
जंपति मुहप्पियाणि य, जोग-तिगिच्छा-निमित्ताइं ॥ ६१४३ ॥

कस्यामपि सङ्खड्यामकालत्वात् प्रतिषिद्धौ साधू अन्यत्र गतौ, ततो मुहूर्तान्तरे रत्नाधिके- 25 नोक्तम्—व्रजामः सङ्खड्याम्, इदानीं भोजनकालः सम्भाव्यते । अवमो भणति—प्रतिषिद्धोऽहं न व्रजामि । ततोऽसौ निवृत्त्याऽऽचार्यायेदमालोचयति, यथा—अयं दीन-करुणवचनैर्याचते, प्रतिषिद्धोऽपि च प्रविशति, एषणां च 'हन्ति' प्रेरयति, अथवा एष गृहं प्रविष्टो मुखप्रि-

१ °तः । सोऽपि च रत्नाधिकः 'भणति' प्रतिब्रूते—न मया कां० ॥ २ °ख्यातः प्राणातिपातं वा कृतवान् सोऽपि यदि न रुष्यति न वा निह्नुते तदा कां० ॥ ३ °ष्यति स्वापराधं निह्नुते वा तदा कां० ॥ ४ °तविषयः प्रस्ता° कां० ॥ ५ अयं रत्नाधिको दीन-करुणवचनैर्याचते, प्रतिषिद्धोऽपि च गृहपतिगृहं प्रायोग्यलम्पटतया भूयोभूयः प्रविशति, एषणां कां० ॥

याणि योग-चिकित्सा-निमित्तानि जल्पति । एवंविधमृषावादवादं वदतः प्रायश्चित्तप्रस्तारो भवति ॥ ६१४३ ॥ स चायम्—

वच्चइ भणाइ आलोय णिकाए पुच्छिए णिसिद्धे य ।
साहु गिहि मिलिय सव्वे, पत्थारो जाव वदमाणे ॥ ६१४४ ॥
5 मासो लहुओ गुरुओ, चउरो लहुगा य होंति गुरुगा य ।
छम्मासा लहु-गुरुगा, छेदो मूलं तह दुगं च ॥ ६१४५ ॥

गाथाद्वयमपि गतार्थम् (गा० ६१३७–३८) ॥ ६१४४ ॥ ६१४५ ॥

अथादत्तादाने मोदकग्रहणदृष्टान्तं भावयति—

जा फुसति भाणमेगो, बितिओ अण्णत्थ लड्डुते ताव ।
10 लद्धूण णीति इयरो, ते दिस्स इमं कुणति कोई ॥ ६१४६ ॥

एकत्र गेहे भिक्षा लब्धा, सा चावमेन गृहीता । यावद् असौ 'एकः' अवमरात्निको भाजनं 'स्पृशति' सम्मार्ष्टि तावद् 'द्वितीयः' रत्नाधिकः 'अन्यत्र' सङ्खड्यां लड्डुकान् लब्धवान्, लब्ध्वा च निर्गच्छति । 'इतरः पुनः' अवमः 'तान्' मोदकान् दृष्ट्वा कश्चिदीर्ष्यालुरिदं करोति ॥ ६१४६ ॥ किम् ? इत्यत आह—

15 वच्चइ भणाइ आलोय निकाए पुच्छिए निसिद्धे य ।
साहु गिहि मिलिय सव्वे, पत्थारो जाव वयमाणे ॥ ६१४७ ॥
मासो लहुओ गुरुओ, चउरो लहुगा य होंति गुरुगा य ।
छम्मासा लहु-गुरुगा, छेदो मूलं तह दुगं च ॥ ६१४८ ॥

"वच्चइ" त्ति स निवृत्त्य गुरुसकाशं व्रजति । आगम्य च भणति आलोचयति—रत्नाधिकेना-
20 दत्ता मोदका गृहीता इति । शेषं प्राग्वत् (गा० ६१३७–३८) ॥ ६१४७ ॥ ६१४८ ॥

अथाविरतिकावादे प्रस्तारमाह—

रातिणितवाइतेणं, खलिय-मिलिय-पेल्लणाएँ उदएणं ।
देउल मेहुण्णम्मि, अब्भक्खाणं कुडंगे वा ॥ ६१४९ ॥

कश्चिदवमरात्निको रत्नाधिकेनाभीक्ष्णं शिष्यमाणश्चिन्तयति—एषः 'रत्नाधिकवातेन' 'रत्ना-
25 धिकोऽहम्' इति गर्वेण मां दशविधचक्रवालसामाचार्यामस्खलितमपि कषायोदयेन तर्जयति, यथा—हे दुष्टशैक्षक ! स्खलितोऽसीति । तथा मां निम्नतरमपि पदं पदेन विच्छिन्नं सूत्रमुच्चारयन्तं 'हा दुष्टशैक्ष ! किमिति मिलितमुच्चारयसि ?' इति तर्जयति । तथा "पेल्लण" त्ति अन्यैः साधुभिर्वार्यमाणोऽपि कषायोदयतो मां हस्तेन प्रेरयति । अथवैषा सामाचारी—रत्नाधिकस्य सर्वं क्षन्तव्यमिति, ततस्तथा करोमि यथा एष मम लघुको भवति । ततोऽन्यदा
30 द्वावपि भिक्षाचर्यायै गतौ, तौ च तृषितौ बुभुक्षितौ चेत्येवं चिन्तितवन्तौ—अस्मिन् आर्यादेवकुले 'कुडङ्गे वा' वृक्षविषमे प्रथमालिकां कृत्वा पानीयं पास्याम इति; एवं चिन्तयित्वा तौ तदभिमुखं प्रस्थितौ । अत्रान्तरेऽवमरत्नाधिकः परिव्राजिकामेकां तदभिमुखमागच्छन्तीं

दृष्ट्वा स्थितः, 'लब्ध एष इदानीम्' इति चिन्तयित्वा तं रत्नाधिकं वदति—अहो ज्येष्ठार्य ! कुरु त्वं प्रथमालिकां पानीयं वा, अहं पुनः संज्ञां व्युत्स्रक्ष्यामि ॥ ६१४९ ॥ एवमुक्त्वा त्वरितं वसतावागत्य मैथुनेऽभ्याख्यानं दातुं यथा आलोचयति तथा दर्शयति—

जेट्ठज्जेण अकज्जं, सज्जं अज्जाघरे कयं अज्जं ।
उवजीवितो य भंते !, मए वि संसट्ठकप्पोऽत्थ ॥ ६१५० ॥ 5

ज्येष्ठार्येणाद्य 'सद्यः' इदानीमार्यागृहे कृतं 'अकार्यं' मैथुनसेवालक्षणम्, ततो भदन्त ! तत्संसर्गतो मयाऽपि 'संसृष्टकल्पः' मैथुनप्रतिसेवा 'अत्र' अस्मिन् प्रस्तावे उपजीवितः ॥ ६१५० ॥

अत्राप्ययं प्रायश्चित्तप्रस्तारः—

वच्चति भणाति आलोय निकाए पुच्छिए णिसिद्धे य ।
साहु गिहि मिलिय सव्वे, पत्थारो जाव वयमाणे ॥ ६१५१ ॥ 10
मासो लहुओ गुरुओ, चउरो लहुगा य होंति गुरुगा य ।
छम्मासा लहु-गुरुगा, छेदो मूलं तह दुगं च ॥ ६१५२ ॥

अवमरात्निको निवृत्त्य गुरुसकाशं व्रजति लघुमासः । आगम्य च गुरून् भणति—ज्येष्ठार्येण मया चाकृत्यमासेवितम्, अतो मम तावद् महाव्रतान्यारोपयत; एवं रत्नाधिकस्य लघूभवनाभिप्रायेण भणतो गुरुमासः । रत्नाधिक आगतः सूरिणा भणितः—किं त्वया 15 संसृष्टकल्प आसेवितः ? स प्राह—नासेवितः, ततश्चतुर्लघु । इतरो निकाचयति चतुर्गुरु इत्यादि प्राग्वद् द्रष्टव्यम् (गा० ६१३७-३८) ॥ ६१५१ ॥ ६१५२ ॥

गतोऽविरतिकावादः । अथापुरुषवादमाह—

तइओ त्ति कधं जाणसि, दिट्ठा णीया सें तेहि मी वुत्तो ।
वट्टति ततिओ तुब्भं, पव्वावेतुं मम वि संका ॥ ६१५३ ॥ 20
दीसति य पाडिरूवं, ठित-चंकम्मित-सरीर-भासाहिं ।
बहुसो अपुरिसवयणे, सवित्थराऽऽरोवणं कुज्जा ॥ ६१५४ ॥

कोऽपि साधुस्तथैव छिद्रान्वेषी भिक्षातो निवृत्त्य रत्नाधिकमुद्दिश्याऽऽचार्यं भणति—एष साधुः 'तृतीयः' त्रैराशिकः । आचार्यः प्राह—कथं जानासि ? । स प्राह—मयैतस्य निजका दृष्टाः तैरहमुक्तः—वर्तते युष्माकं तृतीयः प्रव्राजयितुम् ?; ततो ममापि हृदये 25 शङ्का जाता ॥ ६१५३ ॥ अपि च—

अस्य साधोः 'प्रतिरूपं' नपुंसकानुरूपं रूपं स्थित-चङ्क्रमित-शरीर-भाषादिभिर्लक्षणैर्दृश्यते । एवं बहुशः 'अपुरुषवचने' नपुंसकवादे वर्तमानस्य सविस्तरा[3]मारोपणां कुर्यात् ॥ ६१५४ ॥

तद्यथा—

वच्चति भणाति आलोय निकाए पुच्छिए निसिद्धे य । 30
साहु गिहि मिलिय सव्वे, पत्थारो जाव वयमाणे ॥ ६१५५ ॥

---

१ °नीमुपाय इति चिन्त° कां० ॥ २ °वादविषयः प्रस्तारः । अथापुरुषवादे प्रस्तारमाह इतिरूपमवतरणं कां० ॥ ३ °राम् 'आरोपणां' प्रायश्चित्तविरचनारूपां कुर्या° कां० ॥

मासो लहुओ गुरुओ, चउरो लहुगा य होंति गुरुगा य ।
छम्मासा लहु गुरुगा, छेदो मूलं तह दुगं च ॥ ६१५६ ॥

स निवृत्त्य एकाकी प्रतिश्रयं व्रजति लघुमासः । आगतो गुरून् भणति—एष साधुस्त्रै-राशिक एतदीयसज्ञातकैरुक्तः, अत्र गुरुमासः । शेषं प्राग्वत् (गा० ६१३७–३८)
5 ॥ ६१५५ ॥ ६१५६ ॥ अथ दासवादमाह—

खरओ त्ति कहं जाणसि, देहायारा कहिंति से हंदी ! ।
छिक्कोवण उब्भंडो, णीयासी दारुणसभावो ॥ ६१५७ ॥

कोऽपि साधुस्तथैव रत्नाधिकमुद्दिश्याचार्यं भणति—अयं साधुः 'खरकः' दास इति । आचार्य आह—कथं जानासि ? । इतरः प्राह—एतदीयनिजकैर्मम कथितम् । तथा 'देहाकाराः'
10 कुब्जतादयः "से" तस्य "हंदी" इत्युपप्रदर्शने दासत्वं कथयन्ति । तथा "छिक्कोवण" त्ति शीघ्रकोपनोऽयम्, "उब्भंडो नाम" असंवृतपरिधानादिः, 'नीचासी' नीचतरे आसने उपवेशनशीलः, दारुणस्वभाव इति प्रकटार्थम् ॥ ६१५७ ॥ अथ "देहाकार" त्ति पदं व्याख्याति—

देहेण वा विरूवो, खुज्जो वडभो य बाहिरप्पादो ।
फुडमेव से आयारा, कहिंति जह एस खरओ त्ति ॥ ६१५८ ॥

15 स प्राह—देहेनाप्ययं विरूपः, तद्यथा—कुब्जो वडभो बाह्यपादो वा । एवमादयस्तस्याऽऽकाराः स्फुटमेव कथयन्ति, यथा—एषः 'खरकः' दास इति ॥६१५८॥ अथाऽऽचार्यः प्राह—

केइ सुरूव दुरूवा, खुज्जा वडभा य बाहिरप्पाया ।
न हु ते परिभवियव्वा, वयणं व अणारियं वोत्तुं ॥ ६१५९ ॥

इह नामकर्मोदयवैचित्र्यतः 'केचिद्' नीचकुलोत्पन्ना अपि दासादयः सुरूपा भवन्ति,
20 'केचित् तु' राजकुलोत्पन्ना अपि दूरूपाः भवन्ति, तथा कुब्जा वडभा बाह्यपादा अपि भवन्ति, अतः 'नहि' नैव ते परिभवितव्याः 'अनार्यं वा वचनं' 'दासोऽयम्' इत्यादिकं वक्तुं योग्याः ॥ ६१५९ ॥ अत्रापि प्रायश्चित्तप्रस्तारः—

वच्चति भणाति आलोय निकाए पुच्छिए निसिद्धे य ।
साहु गिहि मिलिय सव्वे, पत्थारो जाव वयमाणे ॥ ६१६० ॥
25 मासो लहुओ गुरुओ, चउरो लहुगा य होंति गुरुगा य ।
छम्मासा लहु गुरुगा, छेदो मूलं तह दुगं च ॥ ६१६१ ॥

[[3] व्याख्या प्राग्वत्] ॥ ६१६० ॥ ६१६१ ॥ गतो दासवादः । अथ द्वितीयपदमाह—

---

१ 'रुक्तोऽस्मीत्यत्र गुरुमासः । शेषं प्राग्वत् ॥ ६१५५ ॥ ६१५६ ॥ उक्तोऽपुरुषवादे प्रस्तारः । अथ दासवादे प्रस्तारमभिधातुकाम इदमाह कां० ॥ २ वयणं अवगारियं वोत्तुं ताभा० ॥ ३ स निवृत्त्य एकाकी वसतिं व्रजति लघुको मासः । वसतिमागम्य गुरूणामन्तिके रत्नाधिकमुद्दिश्य भणति—अयं साधुर्दास इव लक्ष्यते इति भणतो गुरुमासः । इत्यादि प्रागुक्तनीत्या (गा० ६१३७-३८) सर्वमपि यथायोग्यं वक्तव्यम् ॥६१६०॥६१६१॥ तदेवं दर्शिताः षडपि प्रस्ताराः । अथ द्वितीयपदमाह कां० ॥

विइयपयमणाभोगे, सहसा वोत्तूण वा समाउट्टे ।
जाणंतो वा वि पुणो, विविंचणट्ठा वदेज्जा वि ॥ ६१६२ ॥

द्वितीयपदे अनाभोगेन सहसा वा प्राणवधादिविषयं वादमुक्त्वा भूयः 'समावर्तेत' प्रत्यावर्तेत, मिथ्यादुष्कृतमपुनःकरणेन दद्यादित्यर्थः । अथवा जानन्नपि, पुनःशब्दो विशेषणे, स चैतद् विशिनष्टि—योऽयोग्यः शैक्षः प्रव्राजितस्तस्य विवेचनार्थं प्राणातिपातादिवादमपि 5 वदेद् येनासावुद्वेजितो गणाद् निर्गच्छति ॥ ६१६२ ॥

॥ प्रस्तारप्रकृतं समाप्तम् ॥

कण्टकाद्युद्धरणप्रकृतम्

सूत्रम्—

निग्गंथस्स य अहेपादंसि क्खाणू वा कंटगे वा हीरे वा सक्करे वा परियावज्जेज्जा, तं च निग्गंथे नो संचाइज्जा नीहरित्तए वा विसोहित्तए वा, तं निग्गंथी नीहरमाणी वा विसोहेमाणी वा नाइक्कमइ ३ ॥ 10

निग्गंथस्स य अच्छिंसि पाणे वा बीए वा रए वा परियावज्जेज्जा, तं च निग्गंथे नो संचाइज्जा नीहरित्तए वा विसोहित्तए वा, तं निग्गंथी नीहरमाणी वा विसोहेमाणी वा नाइक्कमइ ४ ॥ 15

निग्गंथीए अहेपादंसि क्खाणू वा कंटए वा हीरए वा सक्करे वा परियावज्जेज्जा, तं च निग्गंथी नो संचाइज्जा नीहरित्तए वा विसोहित्तए वा, तं च निग्गंथे नीहरमाणे वा विसोहेमाणे वा नाइक्कमइ ५ ॥ 20

निग्गंथीए अच्छिंसि पाणे वा बीए वा रए वा जाव निग्गंथे नीहरमाणे वा विसोहेमाणे वा नाइक्कमइ ६ ॥

अस्य सूत्रचतुष्टयस्य सम्बन्धमाह— 25

पायं गता अकप्पा, इयाणि वा कप्पिता इमे सुत्ता ।
आरोवणा गुरु त्ति य, तेण तु अण्णोण्ण समणुण्णा ॥ ६१६३ ॥

'प्रायः' प्रायेण 'अकल्पिकानि' 'नो कल्पन्ते' इति निषेधप्रतिपादकानि सूत्राणि इहा-ध्ययने[1] गतानि । 'इदानीम्' इत ऊर्द्धमिमानि कल्पिकसूत्राणि भण्यन्ते । 'वा' विभाषायाम्, सूत्रेणानुज्ञायार्थतः प्रतिषेधः क्रियते, एवं वैकल्पिकान्यनुज्ञासूत्राणीत्यर्थः । अथ किमर्थमत्र सूत्र एवानुज्ञा कृता ? इत्याह—"आरोवणा" इत्यादि । यदि कारणे निर्ग्रन्थस्य निर्ग्रन्थी 5 निर्ग्रन्थ्या वा निर्ग्रन्थः कण्टकादिकं न नीहरति तदा चतुर्गुरु । एवमारोपणा 'गुरुका' महती तेन कारणेन 'अन्योन्यं' परस्परं[2] समनुज्ञा सूत्रेषु कृता ॥ ६१६३ ॥

आह—यदि सूत्रेणानुज्ञातं ततः किमर्थमर्थतः प्रतिषिध्यते ? इति अत आह—

जह चेव य पडिसेहे, होंति अणुन्ना तु सव्वसुत्तेसु ।
तह चेव अणुण्णाए, पडिसेहो अत्थतो पुव्वं ॥ ६१६४ ॥

10 यथैव कण्ठतः सूत्रपदैः प्रतिषेधे कृते सर्वसूत्रे[3]ष्वप्यर्थतोऽनुज्ञा भवति तथैव येषु सूत्रेषु साक्षात् 'अनुज्ञातम्' अनुज्ञा कृता तेषु पूर्वमर्थतः प्रतिषेधस्ततोऽनुज्ञा क्रियते ॥ ६१६४ ॥

अथवा प्रकारान्तरेण सम्बन्धः, तमेवाह—

तट्ठाणं वा वुत्तं, निग्गंथो वा जता तु ण तरेज्जा ।
सो जं कुणति दुहट्टो, तदा तु तट्ठाणमावज्जे ॥ ६१६५ ॥

15 अथवा 'तत्स्थानं' तस्य—प्राणातिपातादिकर्तुः स्थानं—प्रायश्चित्तं सम्यगप्रतिपूरयतोऽभ्या-ख्यानदातुर्भवति इत्युक्तम् । अत्रापि निर्ग्रन्थः कण्टकादिकं यदा उद्धर्तुं 'न तरेत्' न शक्नु-यात् तदा यदि निर्ग्रन्थी तस्य कण्टकादिनीहरणं न करोति तदा स निर्ग्रन्थः 'दुःखार्तः' पीडितो यद् आत्मविराधनां संयमविराधनां वा करोति 'तत्स्थानं' तन्निष्पन्नं प्रायश्चित्तं सा निर्ग्रन्थी आपद्यते[4] । अत इदं सूत्रमारभ्यते ॥ ६१६५ ॥

20 अनेन सम्बन्धेनायातस्यास्य व्याख्या—निर्ग्रन्थस्य[5] 'अधःपादे' पादतले स्थाणुर्वा कण्टको वा हीरो वा शर्करो वा 'पर्यापतेत्' अनुप्रविशेत्, 'तच्च' कण्टकादिकं निर्ग्रन्थो न शक्नुयात् 'नीहर्तुं वा' निष्काशयितुं वा 'विशोधयितुं वा' निःशेषमपनेतुम्, तद् निर्ग्रन्थी नीहरन्ती वा विशोधयन्ती वा नातिक्रामति, आज्ञामिति गम्यते इति प्रथमसूत्रम्[6] ॥

द्वितीयसूत्रे—निर्ग्रन्थस्य 'अक्ष्णि' लोचने 'प्राणा वा' मशकादयः सूक्ष्माः 'बीजानि वा' 25 सूक्ष्माणि श्यामाकादीनि 'रजो वा' सचित्तमचित्तं वा पृथिवीरजः 'पर्यापतेत्' प्रविशेत्,

---

१ °यने उद्देशषट्केऽपि गतानि । 'इदानीम्' इत ऊर्द्धमिमानि 'वा' इति विकल्पेन कल्पिकानि सूत्राणि भण्यन्ते । सूत्रेणानुज्ञायार्थतः कां० ॥ २ °स्परं निर्ग्रन्थस्य निर्ग्रन्थ्याश्च कण्टकोद्धरणादौ समनुज्ञा एतेषु चतुर्ष्वपि सूत्रेषु कां० ॥ ३ °ष्वपि 'अर्थतः' निर्युक्तौ भाष्ये वाऽनुज्ञा कां० ॥ ४ °द्यते । उपलक्षणमिदम्, तेन निर्ग्रन्थ्या अशक्नुवत्याः कण्टका-द्युद्धरणं यदि निर्ग्रन्थो न कुरुते तदा निर्ग्रन्थी यत् परितापादिकमवाप्नोति तन्निष्पन्नं निर्ग्रन्थस्य प्रायश्चित्तम् इत्यत्र सूत्रचतुष्टयेऽभिधीयते ॥ ६१६५ ॥ अनेन कां० ॥ ५ °स्य, चशब्दो वाक्योपन्यासे, 'अधः° कां० ॥ ६ °म् ॥ तथा—निर्ग्र° कां० ॥

'तच्च' प्राणादिकं निर्ग्रन्थो न शक्नुयान्नीहर्तुमित्यादि प्राग्वत् ॥

तृतीय-चतुर्थसूत्रे निर्ग्रन्थीविषये एवमेव व्याख्यातव्ये । इति सूत्रचतुष्टयार्थः ॥

अथ निर्युक्तिविस्तरः—

पाए अच्छि विलग्गे, समणाणं संजएहि कायव्वं ।
समणीणं समणीहिं, वोच्चत्थे होंति चउगुरुगा ॥ ६१६६ ॥ 5

पादे अक्ष्णि वा विलग्ने कण्टक-कणुकादौ श्रमणानां संयतैर्नीहरणं कर्तव्यम्, श्रमणीनां पुनः श्रमणीभिः कार्यम् । अथ व्यत्यासेन कुर्वन्ति तदा चतुर्गुरवः ॥ ६१६६ ॥

एते चापरे दोषाः—

अण्णत्तो च्चिय कुंटसि, अण्णत्तो कंटओ खतं जातं ।
दिट्ठं पि हरति दिट्ठिं, किं पुण अदिट्ठ इतरस्स ॥ ६१६७ ॥ 10

संयतः संयत्याः पार्श्वात् कण्टकमाकर्षयन् कैतवेन यथाभावेन वा अपावृत उपविशेत्, ततः सा तं तथास्थितं पश्यन्ती कण्टकस्थानादन्यत्रान्यत्र शल्योद्धरणादिना कुण्टयेत्, खन्यादित्यर्थः । ततः साधुर्ब्रूयात्—अन्यत एव त्वं कुण्टयसि कण्टकश्चान्यत्र समस्ति एवं मे क्षतं सञ्जातम् । सा प्राह—'इतरस्य' पुरुषस्य सम्बन्धि सागारिकं दृष्टमपि भुक्तभोगिन्याः स्त्रिया अनेकशो विलोकितमपि दृष्टिं हरति किं पुनरदृष्टमभुक्तभोगिन्याः ?, तस्याः सुतरां दृष्टिं 15 हरतीत्यर्थः । एवं भिन्नकथायां प्रतिगमनादयो दोषाः ॥ ६१६७ ॥

यदा तु निर्ग्रन्थो निर्ग्रन्थ्याः कण्टकमुद्धरति तदाऽयं दोषः—

कंटग-कणुए उद्धर, धणितं अवलंब मे भमति भूमी ।
सूलं च वत्थिसीसे, पेल्लेहिँ घणं थणो फुरति ॥ ६१६८ ॥

काचिदार्यिका कैतवेनेदं ब्रूयात्—'कण्टक-कणुके' पादे कण्टकं चक्षुषि च कणुकमुद्धर, 20 'धणियं' अत्यर्थं मामवलम्बस्व, यतो मम भ्रमिवशेन भूमिर्भ्रमति । शूलं वा बस्तिशीर्षे मम समायाति तेन स्तनः स्फुरति, अतो घनं प्रेरय । एवं भिन्नकथायां सद्यश्चारित्रविनाशः ॥६१६८॥

एए चेव य दोसा, कहिया थीवेद आदिसुत्तेसु ॥
अयपाल-जंबु-सीउण्हपाडणं लोगिगी रोहा ॥ ६१६९ ॥

'एत एव' अनन्तरोक्ता दोषाः स्त्रीवेदविषयाः 'आदिसूत्रेषु' सूत्रकृताङ्गान्तर्गतस्त्रीपरि- 25

---

१ °यान्निर्हर्तुं वा विशोधयितुं वा, निर्ग्रन्थी निर्हरन्ती वा विशोधयन्ती वा नातिकामस्याज्ञामिति द्वितीयसूत्रम् ॥ तथा निर्ग्रन्थ्याश्च 'अधःपादे' पादतले स्थाणुर्वा कण्टको वा हीरो वा शर्करो वा 'पर्यापद्येत' अनुप्रविशेत् 'तच्च' कण्टकादिकं निर्ग्रन्थी न शक्नुयात् निर्हर्तुं वा विशोधयितुं वा, तद् निर्ग्रन्थो निर्हरन् वा विशोधयन् वा नातिक्रामतीति तृतीयसूत्रम् ॥ निर्ग्रन्थ्याश्चाक्ष्णि प्राणा वा बीजानि वा रजो वा पर्यापद्येत, 'तच्च' प्राणादिकं निर्ग्रन्थी न शक्नुयाद् निर्हर्तुं वा विशोधयितुं वा, तं निर्ग्रन्थो निर्हरन् वा विशोधयन् वा नातिक्रामतीति चतुर्थसूत्रम् । इति सूत्रचतुष्टयार्थः कां० ॥ २ °यतैरेव तस्य कण्टकादेरुद्धरणं कर्त्त° कां० ॥ ३ °क्ताः चकाराद् अपरे च बहवो दोषाः कां० ॥

ज्ञाध्ययनादिषु सविस्तरं[1] कथिताः । अत्र चाजापालक-शीतोष्ण-जम्बूपातनोपलक्षिता लौकिकी रोहायाः कथा । तद्यथा—

रोहा नामं परिव्वाइया । ताए अयावालगो दिट्ठो । सो ताए अभिरुईओ । तीए चिंतियं—विन्नाणं से परिक्खामि । सो य तया जंबूतरुवरारूढो । तीए फलाणि पणईओ ।
5 तेण भन्नई—किं उण्हाणि देमि ? उयाहु सीयलाणि ? त्ति । तीए भण्णइ उण्हाणि । तओ तेण धूलीए उवरिं पाडियाणि, भणिया—खाहि त्ति । तीए फूमिउं धूलिं अवणेउं खइयाणि । पच्छा सा भणइ—कहं भणसि उण्हाणि ? । तेण भन्नइ—जं उण्हयं होइ तं फूमिउं सीयलीकज्जइ । सा तुट्ठा । पच्छा भणति माइट्ठाणेणं—कंटओ मे लग्गो त्ति । सो उद्धरिउमारद्धो । तीए सणियंसणियं हासियं । सो वि तुसिणीओ कंटगं पुलोएत्ता भणइ—न दीसइ कंटगो
10 त्ति । तीए तस्स पण्ही दिण्णा । एवं सो कइयवकंटउद्धरणेणं तीए खलीकओ । एवं साहुणो वि एवंविहा दोसा उप्पज्जंति ॥ ६१६९ ॥ किञ्च—

मिच्छत्ते उड्डाहो, विराहणा फास भावसंबंधो ।
पडिगमणादी दोसा, भुत्तमभुत्ते य णेयव्वा ॥ ६१७० ॥

मिथ्यात्वं नाम—निर्ग्रन्थ्याः कण्टकमुद्धरन्तं संयतं दृष्ट्वा लोको ब्रूयात्—यथा वादिनस्तथा
15 कारिणोऽमी न भवन्ति । उड्डाहो वा भवेत्—अहो ! यद् एवमियं पादे गृहीता तद् नूनमन्यदाऽप्यनयोः साङ्गत्यं भविष्यति । विराधना वा संयमस्य भवति, कथम् ? इत्याह—'स्पर्शतः' शरीरसंस्पर्शेनोभयोरपि भावसम्बन्धो भवति । ततो भुक्तभोगिनोरभुक्तभोगिनोर्वा तयोः प्रतिगमनादयो दोषा ज्ञातव्याः ॥ ६१७० ॥ अथ मिथ्यात्वपदं भावयति—

दिट्ठे संका भोइय, घाडिग णाती य गामबहिया य ।
20 **चत्तारि छ च लहु गुरु, छेदो मूलं तह दुगं च ॥ ६१७१ ॥**
आरक्खियपुरिसाणं, तु साहणे पावती[2] भवे मूलं ।
अणवट्ठो सेट्ठीणं, दसमं च णिवस्स कधितम्मि ॥ ६१७२ ॥

तस्याः[3] कण्टकमुद्धरन् केनचिद् दृष्टः, तस्य च 'शङ्का' 'किं मन्ये मैथुनार्थम् ?' इतिलक्षणा यदि भवेत् तदा चतुर्लघु । भोजिकायाः कथने चतुर्गुरु । घाटितनिवेदने षड्लघु ।
25 ज्ञातिज्ञापने षड्गुरु । ग्रामाद् बहिः कथने च्छेदः ॥ ६१७१ ॥

मूलादित्रयं पुनरित्थं मन्तव्यम्—

आरक्षिकपुरुषाणां कथने मूलं प्राप्नोति । श्रेष्ठिनः कथितेऽनवस्थाप्यं भवेत् । नृपस्य कथने 'दशमं' पाराञ्चिकम् । एते संयतानां संयतीनां च परस्परं कण्टकोद्धरणे दोषा उक्ताः ॥६१७२॥[4]

एए चेव य दोसा, अस्संजतिकाहि पच्छकम्मं च ।

---

१ °स्तरं परमगुरुभिः कथिताः । तदर्थिना सूत्रकृताङ्गटीकैवावलोकनीया । अत्र चाजा° कां० ॥ २ °वती तहा मूलं भा० ॥ ३ निर्ग्रन्थस्य निर्ग्रन्थी निर्ग्रन्थ्या वा निर्ग्रन्थः कण्टकमुद्धरन्तौ यदि केनचिद् दृष्टौ, तस्य च कां० ॥ ४ अथाऽसंयतैरसंयतीभिश्च कण्टकोद्धरणं कारयतां दोषानाह इत्यवतरणं कां० ॥

गिहिएहिँ पच्छकम्मं, तम्हा समणेहिँ कायव्वं ॥ ६१७३ ॥

एत एव दोषा असंयतिकाभिः कण्टकोद्धरणं कारयतो मन्तव्याः, 'पश्चात्कर्म च' अप्कायेन हस्तप्रक्षालनरूपं तासु भवति । गृहिभिस्तु कारयतः पश्चात्कर्म भवति न पूर्वोक्ता दोषाः । अतः श्रमणैः श्रमणानां कण्टकोद्धरणं कर्तव्यम् ॥ ६१७३ ॥ अत्र परः प्राह—

एवं सुत्तं अफलं, सुत्तनिवातो तु असति समणाणं ।
गिहि अण्णतित्थि गिहिणी, परउत्थिगिणी तिविह भेदो ॥ ६१७४ ॥

यदि संयतीभिः न कारयितव्यं तत एवं सूत्रमफलं प्राप्नोति । सूरिराह—सूत्रनिपातः श्रमणानामभावे मन्तव्यः । तत्र च प्रथमं गृहिभिः कण्टकोद्धरणं कारणीयम्, तदभावेऽन्यतीर्थिकैः, तदप्राप्तौ गृहस्थाभिः, तदसम्भवे परतीर्थिकीभिरपि कारयितव्यम् । एषु च प्रत्येकं त्रिविधो भेदः । तद्यथा गृहस्थस्त्रिविधः—पश्चात्कृतः श्रावको यथाभद्रकश्च । एवं परतीर्थिकोऽपि त्रिधा मन्तव्यः । गृहस्था परतीर्थिकी च त्रिविधा—स्थविरा मध्यमा तरुणी चेति । तत्र गृहस्थेन कारयन् प्रथमं पश्चात्कृतेन, ततः श्रावकेण, ततो यथाभद्रकेणापि कारयति । स च कण्टकाकर्षणानन्तरं प्रज्ञापनीयः—मा हस्तप्रक्षालनं कार्षीः । एवमुक्ते यद्यसावशौचवादी तदा हस्तं हस्तेनैव प्रोञ्छति प्रस्फोटयति वा ॥ ६१७४ ॥ अथ शौचवादी ततः—

जइ सीसम्मि ण पुंछति, तणु पोत्तेसु व ण वा वि पप्फोडे ।
तो सि अण्णेसि असति, दवं दलंति मा वोदगं घाते ॥ ६१७५ ॥

यदि हस्तं शीर्षे वा तनौ वा 'पोतेषु वा' वस्त्रेषु न प्रोञ्छति न वा प्रस्फोटयति 'गृहे गतो हस्तं प्रक्षालयिष्यामि' इति कृत्वा, ततः "से" तस्य अन्येषाम् 'असति' अभावे प्राशुकमात्मीयं द्रवं हस्तधावनाय ददति, मा 'उदकम्' अप्कायं घातयेदिति कृत्वा । गृहस्थानामभावे परतीर्थिकेनापि कारयन् एवमेव पश्चात्कृतादिक्रमेण कारयेत् । तेषामभावे गृहस्थाभिरपि कारयेत् ॥ ६१७५ ॥ कथम्? इत्याह—

माया भगिणि धूया, अज्जिय णत्तीय सेस तिविधाओ ।
आगाढे कारणम्मि, कुसलेहिं दोहिँ कायव्वं ॥ ६१७६ ॥

या तस्य निर्ग्रन्थस्य माता भगिनी दुहिता वा 'अर्यिका वा' पितामही 'नप्तृका वा' पौत्री तया कारयितव्यम् । एतासामभावे याः 'शेषाः' अनालबद्धाः स्त्रियस्ताभिरपि कारयेत् । ताश्च त्रिविधाः—स्थविरा मध्यमास्तरुण्यश्च । तत्र प्रथमं स्थविरया, ततो मध्यमया, ततस्तरुण्याऽपि कारयितव्यम् । आगाढे कारणे कुशलाभ्यां द्वाभ्यामपि कण्टकोद्धरणं कर्तव्यम्, कारयितव्य-

---

१ °यतीभिः कण्टकोद्धरणं सूत्रेऽनुज्ञातमपि साधुभिः न कार° कां० ॥ २ °तः सूत्रावतारः श्रमणानाम् 'असति' अभावे कां० ॥ ३ मा वा दगं ताभा० कां० । एतदनुसारेणैव कां० टीका, दृश्यतां टिप्पणी ४ ॥ ४ तस्य 'अन्यस्य' अशौचवादिनः 'असति' अभावे प्रासुकमात्मीयं द्रवं हस्तधावनाय ददति, मा शौचवादितया गृहं गतः सन् 'दकम्' अप्कायं घातयेदिति कृत्वा । हन्त्यर्थाश्चेतिवदत्र(?) चौरादिको हन्धातुरवगन्तव्यः । तथा गृहस्थाना° कां० ॥ ५ 'आगाढे कारणे' अन्येनोद्धर्तुमशक्य-प्रबलव्यथाकारिकण्टकलक्षणे कुशलाभ्यां कां० ॥

मित्यर्थः ॥ ६१७६ ॥ के पुनस्ते द्वे ? इत्याह—

गिहि अण्णतित्थि पुरिसा, इत्थी वि य गिहिणि अण्णतित्थीया ।
संबंधि एतरा वा, वइणी एमेव दो एते ॥ ६१७७ ॥

गृहस्थपुरुषोऽन्यतीर्थिकपुरुषश्चेति द्वयम्, गृहस्थी अन्यतीर्थिकी चेति वा द्वयम्, सम्ब-
5 न्धिनी 'इतरा वा' असम्बन्धिनी व्रतिनी एवं वा द्वयम् । एतेषां द्विकानामन्यतरेण कुशलेन आगाढे कारणे कारयितव्यम् ॥ ६१७७ ॥ आह—'श्रमणानामभावे सूत्रनिपातो भवति' (गा० ६१७४) इत्युक्तम्, कदा पुनरसौ साधूनामभावो भवति ? इत्याह—

तं पुण सुण्णारण्णे, दुट्ठारण्णे व अकुसलेहिं वा ।
कुसले वा दूरत्थे, ण चएइ पदं पि गंतुं जे ॥ ६१७८ ॥

10 'साधवो न भवन्ति' इति यदुक्तं तत् पुनरित्थं सम्भवति—'शून्यारण्यं' ग्रामादिभिर्वि-रहिता अटवी, 'दुष्टारण्यं वा' व्याघ्र-सिंहादिभयाकुलम्, एतयोः साधूनामभावो भवेत् । उप-लक्षणत्वाद् अशिवादिभिः कारणैरेकाकी सञ्जात इत्यपि गृह्यते । एषा साधूनामसदसत्ता । सदसत्ता तु सन्ति साधवः परमकुशलाः—कण्टकोद्धरणेऽदक्षाः, अथवा यः कुशलः सः 'दूरस्थः' दूरे वर्तते, स च कण्टकविद्धपादः पदमपि गन्तुं न शक्नोति[1] ततः पूर्वोक्ता यतना कर्तव्या
15 ॥ ६१७८ ॥ अथ सामान्येन यतनामाह—

परपक्ख पुरिस गिहिणी, असोय-कुसलाण मोत्तु पडिवक्खे ।
पुरिस जयंत मणुण्णे, हौंति सपक्खेतरा वा तू ॥ ६१७९ ॥

इह प्रथमं पश्चार्द्धं व्याख्याय ततः पूर्वार्द्धं व्याख्यास्यते । ये 'यतमानाः' संविग्नाः साम्भो-गिकाः पुरुषास्तैः प्रथमं कारयेत्, तदभावे अमनोज्ञैः—असाम्भोगिकैः, तदभावे ये इतरे—
20 पार्श्वस्थादयस्तैर्वा कारयेत्[2] । एषा स्वपक्षे यतना भणिता । अथैव स्वपक्षो न प्राप्यते ततः "परपक्खे"त्यादि पूर्वार्द्धम्—'परपक्षे' गृहस्था-ऽन्यतीर्थिकरूपे प्रथमं पुरुषैः, ततः 'गेहिनीभिः' स्त्रीभिरपि कारयेत्, तत्राप्यशौचवादिभिः कुशलैश्च कारापणीयम् । अत एवाह—अशौच-वादि-कुशलानां 'प्रतिपक्षाः' ये शौचवादिनोऽकुशलाश्च तान् मुक्त्वा कारयितव्यम् । अथै-तेऽपि न प्राप्यन्ते तदा संयतीभिरपि कारयेत्, तत्रापि प्रथमं मातृ-भगिन्यादिभिर्नालबद्धाभिः,
25 तदभावेऽसम्बन्धिनीभिरपि स्थविरा-मध्यमा-तरुणीभिर्यथाक्रमं कारयेत् ॥ ६१७९ ॥

कथं पुनस्तया कण्टक उद्धरणीयः ? इत्याह—

सल्लुद्धर णक्खेण व, अच्छिव वत्थंतरं व इत्थीसु ।
भूमी-कट्ठ-तलोरुसु, काऊण सुसंवुडा दो वि ॥ ६१८० ॥

शल्योद्धरणेन[3] नखेन वा पादमस्पृशन्ती कण्टकमुद्धरति । अथैवं न शक्यते ततो वस्त्रा-
30 न्तरितं पादं भूमौ कृत्वा यद्वा काष्ठे वा तले वा ऊरौ वा कृत्वा उद्धरेत् । 'द्वावपि च' संयती-संयतौ सुसंवृतावुपविशतः । एषः 'स्त्रीषु' कण्टकमुद्धरन्तीषु विधिरवगन्तव्यः ॥६१८०॥

---

१ °ति "जे" इति पादपूरणे निपातो वाक्यालङ्कारे, ततः कां० ॥ २ °त् । 'तुः' पाद-पूरणे । एषा कां० ॥ ३ °न "णक्खेण व" त्ति नखहरणिकया वा पाद° कां० ॥

एमेव य अच्छिम्मि, चंपादिट्ठंतो णवरि नाणत्तं ।
निग्गंथीण तहेव य, णवरिं तु असंवुडा काई ॥ ६१८१ ॥

एवमेव अक्षिसूत्रेऽपि सर्वमपि वक्तव्यम् । 'नवरं' नानात्वं चम्पादृष्टान्तोऽत्र भवति । यथा किल चम्पायां सुभद्रया तस्य साधोश्चक्षुषि पतितं तृणमपनीतं तथाऽन्यस्यापि साधोश्चक्षुषि प्रविष्टस्य तृणादेः कारणे निर्ग्रन्थ्याऽपनयनं सम्भवतीति दृष्टान्तभावार्थः । निर्ग्रन्थी-5 नामपि सूत्रद्वयं तथैव वक्तव्यम् । नवरम्—काचिदसंवृता भवति ततः प्रतिगमनादयः पूर्वोक्ता दोषा भवेयुः । द्वितीयपदे निर्ग्रन्थस्तासां प्रागुक्तविधिना कण्टकादिकमुद्धरेत् ॥ ६१८१ ॥

॥ कण्टकाद्युद्धरणप्रकृतं समाप्तम् ॥

दुर्गप्रकृतम्

सूत्रम्—　10

निग्गंथे निग्गंथिं दुग्गंसि वा विसमंसि वा पव्वयंसि वा पक्खुलमाणिं वा पवडमाणिं वा गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ ७ ॥

निग्गंथे निग्गंथिं सेयंसि वा पंकंसि वा पणगंसि वा उदगंसि वा ओकसमाणिं वा ओवुज्झमाणिं वा 15 गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ ८ ॥

निग्गंथे निग्गंथिं नावं आरुभमाणिं वा ओरुभमाणिं वा गिण्हमाणे वा अवलंबमाणे वा नातिक्कमइ ९ ॥

अस्य सूत्रत्रयस्य सम्बन्धमाह—

सो पुण दुग्गे लग्गेज्ज कंटओ लोयणम्मि वा कणुगं ।　20
इति दुग्गसुत्तजोगो, थला जलं चेयरे दुविहे ॥ ६१८२ ॥

यः पूर्वसूत्रे पादप्रविष्टः कण्टको लोचने वा कणुकं प्रविष्टमुक्तं स कण्टकस्तच्च कणुकं दुर्गे गच्छतः प्रायो लगेत्, अतो दुर्गसूत्रमारभ्यते । 'इति' एष दुर्गसूत्रस्य योगः—सम्बन्धः । दुर्गं च—स्थलं ततः स्थलाज्जलं भवतीति कृत्वा दुर्गसूत्रानन्तरम् 'इतरस्मिन्' जलप्रतिबद्धे 'द्विविधे' पङ्कविषये नौविषये च सूत्रे आरम्भः क्रियते ॥ ६१८२ ॥　25

अनेन सम्बन्धेनायातस्यास्य व्याख्या—निर्ग्रन्थो निर्ग्रन्थीं दुर्गे वा विषमे वा पर्वते वा "पक्खुलमाणिं व" त्ति प्रकर्षेण स्खलद्गत्या गच्छन्तीम्, भूमावसम्प्राप्तां वा पतन्तीम्,

---

१ यथा कण्टकोद्धरणसूत्रे उत्सर्गतोऽपवादतश्चोक्तं एवमेव कां० ॥

पतितुकामामित्यर्थः । "पवडमाणिं व" त्ति प्रकर्षेण—भूमौ सर्वैरपि गात्रैः पतन्तीम् । "गिण्ह-माणे व" त्ति बाह्वादावङ्गे गृह्णन् वा, "अवलंबमाणे व" त्ति 'अवलम्बमानो वा' बाह्वादौ गृहीत्वा धारयन्; अथवा 'गृह्णन्' सर्वाङ्गीणां धारयन्, 'अवलम्बमानः' देशतः करेण गृह्णन्, साहृयन्नित्यर्थः । नातिक्रामति स्वाचारमाज्ञां वा इति प्रथमसूत्रम् ॥

5 द्वितीयसूत्रमप्येवमेव । नवरम्—सेको नाम—पङ्के पनके वा सजले यत्र निमज्यते तत्र वा, पङ्कः—कर्दमः तत्र वा, पनको नाम—आगन्तुकः प्रतनुद्रवरूपः कर्दम एव तत्र वा, उदकं प्रतीतं तत्र वा, "ओकसमाणिं व" त्ति 'अपकसन्तीं वा' पङ्क-पनकयोः परिहसन्तीं "ओवुज्झमाणिं व" त्ति 'अपोह्यमानां वा' सेकेन उदकेन वा नीयमानां गृह्णन् वा अवलम्बमानो वा नातिक्रामति ॥

10 तृतीयसूत्रे निर्ग्रन्थीमेव नावमारोहन्तीं वा अवरोहन्तीं वा गृह्णानो वा अवलम्बमानो वा नातिक्रामति इति सूत्रत्रयार्थः[२] ॥ सम्प्रति भाष्यकारो विषमपदानि व्याचष्टे—

तिविहं च होति दुग्गं, रुक्खे सावय मणुस्सदुग्गं च ।
णिक्कारणम्मि गुरुगा, तत्थ वि आणादिणो दोसा ॥ ६१८३ ॥

त्रिविधं च भवति दुर्गम्, तद्यथा—वृक्षदुर्गं श्वापददुर्गं मनुष्यदुर्गं च । यद् वृक्षैरतीव 15 गहनतया दुर्गमं यत्र वा पथि वृक्षः पतितः तद् वृक्षदुर्गम् । यत्र व्याघ्र-सिंहादीनां भयं तत् श्वापददुर्गम् । यत्र म्लेच्छ-बोधिकादीनां मनुष्याणां भयं तद् मनुष्यदुर्गम् । एतेषु त्रिष्वपि दुर्गेषु यदि निष्कारणे निर्ग्रन्थीं गृह्णाति अवलम्बते वा तदा चतुर्गुरु, आज्ञा-दयश्च दोषाः ॥ ६१८३ ॥

मिच्छत्ते सतिकरणं, विराहणा फास भावसंबंधो ।
20 **पडिगमणादी दोसा, भुत्ता-ऽभुत्ते व णेयव्वा ॥ ६१८४ ॥**

निर्ग्रन्थीं गृह्णन्तं तं दृष्ट्वा कोऽपि मिथ्यात्वं गच्छेत्—अहो ! मायाविनोऽमी, अन्यद् वदन्ति अन्यच्च कुर्वन्ति । स्मृतिकरणं वा भुक्तभोगिनो भवति, अभुक्तभोगिनस्तु कुतूहलम् । ततश्च संयमविराधना । स्पर्शतश्च भावसम्बन्धो भवति । ततः प्रतिगमनादयो दोषा भुक्ता-नामभुक्तानां वा साधु-साध्वीनां ज्ञातव्याः ॥ ६१८४ ॥ अथ विषमपदं व्याख्याति—

25 **तिविहं च होति विसमं, भूमिं सावय मणुस्सविसमं च ।**
तम्मि वि सो चेव गमो, णावोदग सेय जतणाए ॥ ६१८५ ॥

त्रिविधं च भवति विषमम्—भूमिविषमं श्वापदविषमं मनुष्यविषमं च । भूमिविषमं नाम—गर्ता-पाषाणाद्याकुलो भूभागः, श्वापद-मनुष्यविषमे तु श्वापद-मनुष्यदुर्गवद् मन्तव्ये । अत्र भूमिविषमेणाधिकारः । पर्वतपदं तु प्रतीतत्वाद् न व्याख्यातम् । 'तस्मिन्नपि' विषमे पर्वते वा 30 निर्ग्रन्थीं गृह्णतश्चतुर्गुरुकप्रायश्चित्तादिरूपः स एव गमो भवति यो दुर्गे भणितः । तथा 'नावु-

---

१ °म् 'आरोहन्तीं वा' प्रविशन्तीम् 'अवरोहन्तीं वा' उत्तरन्तीं गृह्णानो कां० ॥
२ °र्थः ॥ अथ भाष्य° भा० ॥ ३ °रुकाः । 'तत्रापि' तादृशेऽपि दुर्गे निर्ग्रन्थ्या निष्कारणे ग्रहणेऽवलम्बने वाऽऽज्ञादयो दोषाः ॥ ६१८३ ॥ अपरे चामी दोषाः—मिच्छत्ते कां० ॥

दके सेकादौ च' वक्ष्यमाणस्वरूपे निर्ग्रन्थीं गृह्णतो निष्कारणे त एव दोषाः । "जयणाए" त्ति कारणे यतनया दुर्गादिषु गृह्णीयादवलम्बेत वा । यतना चाग्रतो वक्ष्यते ॥ ६१८५ ॥

अथ प्रस्खलन-प्रपतनपदे व्याचष्टे—

भूमीएँ असंपत्तं, पत्तं वा हत्थ-जाणुगादीहिं ।
पक्खुलणं णायव्वं, पवडण भूमीय गत्तेहिं ॥ ६१८६ ॥ 5

भूमावसम्प्राप्तं हस्त-जानुकादिभिः प्राप्तं वा प्रस्खलनं ज्ञातव्यम् । भूमौ प्राप्तं सर्वगात्रैश्च यत् पतनं तत् प्रपतनम् ॥ ६१८६ ॥

अहवा वि दुग्ग विसमे, थद्धं भीतं व गीत थेरो तु ।
सिचयंतरेतरं वा, गिण्हंतो होति निद्दोसो ॥ ६१८७ ॥

'अथवा' इति प्रकारान्तरद्योतकः । उक्तास्तावद् निर्ग्रन्थीं गृह्णतो दोषाः, परं द्वितीयपदे 10 दुर्गे विषमे वा तां स्तब्धां भीतां वा गीतार्थः स्थविरः सिचयेन—वस्त्रेणान्तरिताम् इतरां वा गृह्णन् निर्दोषो भवति ॥ ६१८७ ॥ व्याख्यातं प्रथमसूत्रम् । सम्प्रति द्वितीयसूत्रं व्याख्याति—

पंको खलु चिक्खल्लो, आगंतू पयणुओ दुओ पणओ ।
सो पुण सजलो सेओ, सीतिज्जति जत्थ दुविहे वी ॥ ६१८८ ॥

पङ्कः खलु चिक्खल्ल उच्यते । आगन्तुकः प्रतनुको द्रुतश्च पनकः । यत्र पुनः 'द्विविधेऽपि' 15 पङ्के पनके वा "सीइज्जति" निमज्जते स पुनः सजलः सेक उच्यते ॥ ६१८८ ॥

पंक-पणएसु नियमा, ओगसणं वुब्भणं सिया सेए ।
थिमियम्मि णिमज्जणता, सजले सेए सिया दो वि ॥ ६१८९ ॥

पङ्क-पनकयोर्नियमाद् 'अपकसनं' ह्रसनं भवति । सेके तु "वुज्झणं" 'अपोहनं' पानीयेन हरणं स्यात् । स्तिमिते तु तत्र निमज्जनं भवेत् । सजले तु सेके 'द्वे अपि' अपवहन-निमज्जने 20 स्याताम् ॥ ६१८९ ॥ अथ तृतीयं नौसूत्रं व्याख्याति—

ओयारण उत्तारण, अत्थुरण ववुग्गहे य सतिकारो ।
छेदो व दुवेगयरे, अतिपिल्लण भाव मिच्छत्तं ॥ ६१९० ॥

कारणे निर्ग्रन्थीं नावम् 'अवतारयन्' आरोपयन् उत्तारयन् वा यथास्तरणं वपुर्ग्रहं वा करोति तदा स्मृतिकारो भुक्तभोगिनोस्तयोर्भवति । छेदो वा नखादिभिर्द्वयोरेकतरस्य भवेत् । अतिप्रेरणे 25 च 'भावः' मैथुनाभिलाष उत्पद्येत । मिथ्यात्वं वा तद् दृष्ट्वा कश्चिद् गच्छेत् ॥ ६१९० ॥

एते नावुदके निर्ग्रन्थीं गृह्णतो दोषा उक्ताः । अथ लेपोपरि सन्तारयतो दोषानाह—

अंतोजले वि एवं, गुज्झंगप्फास इच्छऽणिच्छंते ।
मुच्छेज्ज व आयत्ता, जा होउ करेतु वा हावे ॥ ६१९१ ॥

'अन्तर्जलेऽपि' जलाभ्यन्तरेऽपि गच्छन्तीं गृह्णत एवमेव दोषा मन्तव्याः । तथा गुह्याङ्ग- 30 स्पर्शे मोह उदियात्, उदिते च मोहे यदि इच्छति नेच्छति वा तत उभयथाऽपि दोषाः ।

---

१ °पत्तं, संपत्तं वा वि हत्थ-जाणूहिं ताभा० ॥ २ °तनमिति ॥ ६१८६ ॥ अथ प्रथमसूत्रविषयं द्वितीयपदमाह—अहवा कां० ॥

यद्वा स उदीर्णमोहस्तां जलमध्ये मुञ्चेत्, आयत्ता यस्माद् भवतु करोतु वा 'हावान्' मुखविकारानिति । कारणे तु नावुदके लेपोपरि वा अवतारणं उत्तारणं वा कुर्वन् यतनया गृह्णीयाद् अवलम्बेत वा ॥ ६१९१ ॥ अथ ग्रहणा-ऽवलम्बनपदे व्याख्याति—

सव्वंगियं तु गहणं, करेहिँ अवलंबणेगदेसम्मि ।
5 जह सुत्तं तासु कयं, तहेव वतिणो वि वतिणीए ॥ ६१९२ ॥

ग्रहणं नाम सर्वाङ्गीणं कराभ्यां यद् गृह्यते । अवलम्बनं तु तद् उच्यते यद् एकस्मिन् देशे—बाह्वादौ ग्रहणं क्रियते । तदेवं यथा तासु निर्ग्रन्थीषु 'सूत्रं' सूत्रत्रयं कृतम् । किमुक्तं भवति ?—यथा निर्ग्रन्थो निर्ग्रन्थ्याः कारणे ग्रहणमवलम्बनं वा कुर्वन् नाऽऽज्ञामतिक्रामतीति सूत्रत्रयेऽपि भणितम्; तथैवार्थत इदं द्रष्टव्यम्—'व्रतिनोऽपि' साधोरपि दुर्गादौ पङ्कादौ नावु-10 दकादौ वा प्रपततो व्रतिन्या कारणे ग्रहणमवलम्बनं वा कर्तव्यम् ॥ ६१९२ ॥

कया पुनर्यतनया ? इति चेद् अत आह—

जुगलं गिलाणगं वा, असहुं अण्णेण वा वि अतरंतं ।
गोवालकंचुगादी, सारक्खण णालबद्धादी ॥ ६१९३ ॥

'युगलं नाम' बालो वृद्धश्च तद्वा, अपरं वा ग्लानम् अत एव 'असहिष्णुं' दुर्गादिषु गन्तु-15 मशक्नुवन्तम्, 'अन्येन वा' ग्लानत्ववर्जेन कारणेन 'अतरन्तम्' अशक्तम्, गोपालकञ्चुकादिपरिधानपुरस्सरं नालबद्धा संयती, आदिग्रहणेनानालबद्धाऽपि संरक्षति, गृह्णाति अवलम्बते वा इत्यर्थः ॥ ६१९३ ॥

॥ दुर्गप्रकृतं समाप्तम् ॥

क्षि प्त चि त्ता दि प्र कृ त म्

20 सूत्रम्—

खित्तचित्तं निग्गंथिं निग्गंथे गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ १० ॥

अस्य सूत्रस्य सम्बन्धमाह—

ओवुज्झंती व भया, संफासा रागतो व खिप्पेज्जा ।
25 संबंधत्थविहिण्णू, वदंति संबंधमेयं तु ॥ ६१९४ ॥

पानीयेनापोह्यमाना वा भयात् क्षिप्येत, क्षिप्तचित्ता भवेदित्यर्थः । यद्वा संस्पर्शतो यो राग उत्पद्यते तस्माद्वा तत्र साधावन्यत्र गते सति क्षिप्तचित्ता भवेत् । अतः क्षिप्तचित्तासूत्रमारभ्यते । एवं सम्बन्धार्थविधिज्ञाः सूरयोऽत्र सूत्रे एनं सम्बन्धं वदन्ति ॥ ६१९४ ॥

---

१ तदेवं व्याख्यातं तृतीयमपि सूत्रम् । सम्प्रति निर्ग्रन्थानामेतदेव सूत्रत्रयमतिदिशन्नाह—"जह सुत्तं तासु कयं" इत्यादि, यथा नि° कां० ॥ २ "जुगलं णाम संजतं गिलाणं संजतिं च गिलाणिं, अथवा बाल-वुड्ढा" इति चूर्णौ विशेषचूर्णौ च ॥ ३ यद्वा गृह्णतोऽवलम्बमानस्य वा निर्ग्रन्थस्य सम्बन्धी यः संस्पर्शः तस्माद् यो राग कां० ॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—"खित्तचित्तं" ति क्षिप्तं—नष्टं राग-भया-ऽपमानैश्चित्तं यस्याः सा क्षिप्तचित्ता, तां निर्ग्रन्थीं निर्ग्रन्थो गृह्णानो वाऽवलम्बमानो वा नातिक्रामति आज्ञामिति सूत्रार्थः ॥ अथैनं भाष्यकारो विस्तरेण प्ररूपयितुमाह—

रागेण वा भएण व, अहवा अवमाणिया णरिंदेण ।
एतेहिँ खित्तचित्ता, वणितातति परूविता लोए ॥ ६१९५ ॥ 5

रागेण यदि वा भयेनाथवा 'नरेन्द्रेण' प्रजापतिना, उपलक्षणमेतत्, सामान्येन वा प्रभुणा 'अपमानिताः' अपमानं ग्राहिताः, एतैः खलु कारणैः क्षिप्तचित्ता भवन्ति । ते च लोके उदाहरणत्वेन परूपिता वणिगादयः । तत्र रागेण क्षिप्तचित्ता यथा—वणिग्भार्या भर्तारं मृतं श्रुत्वा क्षिप्तचित्ता जाता ॥ ६१९५ ॥ भयेनापमानेन च क्षिप्तचित्तत्वे उदाहरणान्याह—

भयओ सोमिलबडुओ, सहसोत्थरिया य संजुगादीसु । 10
णरवतिणा व पतीण व, विमाणिता लोगिगी खेत्ता ॥ ६१९६ ॥

'भयतः' भयेन क्षिप्तचित्तो यथा **गजसुकुमालमारको** जनार्दनभयेन **सोमिल**नामा 'बटुकः' ब्राह्मणः । अथवा 'संयुगादिषु' संयुगं—सङ्ग्रामस्तत्र, आदिशब्दात् परबलसमापतनादिपरिग्रहः, तैः, गाथायां सप्तमी तृतीयार्थे, 'सहसा' अतर्कितम् 'अवस्तृताः' समन्ततः परिगृहीता मनुष्या भयेन क्षिप्तचित्ता भवन्ति । एवं भयेन क्षिप्तचित्तत्वे उदाहरणमुक्तम् । सम्प्र- 15 त्यपमानत आह—नरपतिना समस्तद्रव्यापहरणतः काचिद् विमानिता पत्या वा काचिन्महेलाऽपमानिता क्षिप्तचित्ता भवेत् । एवमादिका लौकिकी क्षिप्तचित्ता मन्तव्या ॥ ६१९६ ॥

सम्प्रति लोकोत्तरिकीं तामेवाह—

रागम्मि रायखुड्डी, जड्डाति तिरिक्ख चरिय वातम्मि ।
रागेण जहा खेत्ता, तमहं वोच्छं समासेणं ॥ ६१९७ ॥ 20

'रागे' सप्तमी तृतीयार्थे रागेण क्षिप्तचित्ता यथा वक्ष्यमाणा **राजक्षुल्लिका** । भयेन यथा 'जड्डादीन्' हस्तिप्रभृतीन् तिरश्चो दृष्ट्वा । अपमानतो यथा चरिकया कयाचिद् वादे पराजिता सती काचिन्निर्ग्रन्थी क्षिप्तचित्ता जायते । तत्र रागेण यथा **राजक्षुल्लिका** क्षिप्तचित्ताऽभवत् तदहं वक्ष्ये समासेन ॥ ६१९७ ॥

जियसत्तू य णरवती, पव्वज्जा सिक्खणा विदेसम्मी । 25
काऊण पोतणम्मि, सव्वायं णिव्वुतो भगवं ॥ ६१९८ ॥
एक्का य तस्स भगिणी, रज्जसिरिं पयहिऊण पव्वइया ।
भातुयअणुराएणं, खेत्ता जाता इमा तु विही ॥ ६१९९ ॥

जितशत्रुर्नाम नरपतिः । तस्य प्रव्रज्याऽभवत्, धर्मं तथाविधानां स्थविराणामन्तिके श्रुत्वा प्रव्रज्यां स प्रतिपन्नवानित्यर्थः । प्रव्रज्यानन्तरं च तस्य 'शिक्षणा' ग्रहणशिक्षा आसेव- 30 नाशिक्षा च प्रवृत्ता । कालान्तरे च स विदेशं गतः । **पोतनपुरे** च परतीर्थिभिः सह वाद उपस्थितः । ततस्तैः सह शोभनो वादः सद्वादस्तं दत्त्वा महतीं जिनशासनप्रभावनां कृत्वा स भगवान् 'निर्वृतः' मुक्तिपदवीमधिरूढः ॥ ६१९८ ॥

एका च 'तस्य' जितशत्रो राज्ञो भगिनी भ्रातुरनुरागेण राज्यश्रियं प्रहाय जितशत्रुप्रव्रज्याप्रतिपत्त्यनन्तरं कियताऽपि कालेन प्रव्रजिता । सा च तं ज्येष्ठभ्रातरं विदेशे पोतनपुरे कालगतं श्रुत्वा भ्रातुरनुरागेण 'क्षिप्ता' अपहृतचित्ता जाता । तत्र च 'अयम्' अनुशिष्टिरूपस्तस्याः प्रगुणीकरणे विधिः ॥ ६१९९ ॥ तमेवाह—

5 **तेलोकदेवमहिता, तित्थगरा णीरता गता सिद्धिं ।**
थेरा वि गता केई, चरण-गुणपभावगा धीरा ॥ ६२०० ॥

तस्या भ्रात्रादिमरणं श्रुत्वा क्षिप्तचित्तीभूताया आश्वासनार्थमियं देशना कर्तव्या, यथा—मरणपर्यवसानो जीवलोकः । तथाहि—ये तीर्थकरा भगवन्तः त्रैलोक्यदेवैः—त्रिभुवननिवासिभिर्भवनपत्यादिभिः महितास्तेऽपि 'नीरजसः' विगतसमस्तकर्मपरमाणवः सन्तो गताः 10 सिद्धिम् । तथा स्थविरा अपि केचिन्महीयांसो गौतमस्वामिप्रभृतयः 'चरण-गुणप्रभावकाः' चरणं—चारित्रं गुणः—ज्ञानं ताभ्यां जिनशासनस्य प्रभावकाः 'धीराः' महासत्त्वा देव-दानवैरप्यक्षोभ्याः सिद्धिं गताः । तद् यदि भगवतामपि तीर्थकृतां महतामपि च महर्षीणामीदृशी गतिस्ततः का कथा शेषजन्तूनाम् ? । तस्मादेतादृशीं संसारस्थितिमनुचिन्त्य न शोकः कर्तव्य इति ॥ ६२०० ॥ तथा—

15 **बंभी य सुंदरी या, अन्ना वि य जाउ लोगजेट्ठाओ ।**
ताओ वि अ कालगया, किं पुण सेसाउ अज्जाओ ॥ ६२०१ ॥

सुगमा (गा० ३७३८) ॥ ६२०१ ॥ अन्यच्च—

न हु होति सोतियव्वो, जो कालगतो दढो चरित्तम्मि ।
सो होति सोतियव्वो, जो संजमदुब्बलो विहरे ॥ ६२०२ ॥

20 "न हु" नैव स शोचयितव्यो भवति यश्चारित्रे दृढः सन् कालगतः । स खलु भवति शोचयितव्यो यः संयमे दुर्बलः सन् विहृतवान् ॥ ६२०२ ॥ कथम् ? इत्याह—

जो जह व तह व लद्धं, भुंजति आहार-उवधिमादीयं ।
समणगुणमुक्कजोगी, संसारपवड्ढतो होति ॥ ६२०३ ॥

यो नाम यथा वा तथा वा, दोषदुष्टतया निर्दोषतया वा इत्यर्थः, लब्धमाहारोपध्यादिकं 25 'भुङ्क्ते' उपभोग-परिभोगविषयीकरोति स श्रमणानां गुणाः—मूलगुणोत्तरगुणरूपाः श्रमणगुणास्तैर्मुक्ताः—परित्यक्तास्तद्रहिता ये योगाः—मनो-वाक्कायव्यापारास्ते श्रमणगुणमुक्तयोगाः ते यस्य सन्ति स श्रमणगुणमुक्तयोगी संसारप्रवर्धको भवति । ततो यः संयमदुर्बलो विहृतवान् स एव शोच्यः, भवदीयस्तु भ्रात्रादिः कालगतो दृढश्चारित्रे ततः स परलोकेऽपि सुगतिभागिति न करणीयः शोकः ॥ ६२०३ ॥ सम्प्रति "जड्डादितिरिक्ख" इत्यस्य व्याख्यानार्थमाह—

30 **जड्डादी तेरिच्छे, सत्थे अगणीय थणिय विज्जू य ।**
ओमे पडिभेसणता, चरियं पुव्वं परूवेउं ॥ ६२०४ ॥

जड्डः—हस्ती, आदिशब्दात् सिंहादिपरिग्रहः, तान् तिरश्चो दृष्ट्वा । किमुक्तं भवति ?—गजं वा मदोन्मत्तं सिंहं वा गुञ्जन्तं व्याघ्रं वा तीक्ष्णनखर-विकरालमुखं दृष्ट्वा काऽपि निर्ग्रन्थी

भयतः क्षिप्तचित्ता भवति । काऽपि पुनः 'शस्त्राणि' खड्गादीन्यायुधानि दृष्ट्वा, इयमत्र भावना— केनापि परिहासेनोद्गीर्णं खड्गं कुन्तं क्षुरिकादिकं वा दृष्ट्वा काऽपि 'हा ! मामेष मारयति' इति सहसा क्षिप्तचित्ता भवति । एवम् 'अग्नौ' प्रदीपनके लग्ने 'स्तनिते वा' मेघगर्जिते श्रुते विद्युतं वा दृष्ट्वा भयतः क्षिप्तचित्ता भवेत् । एवंविधायां भयेन क्षिप्तचित्तायां को विधिः ? इत्याह— 'अवमा' तस्या अपि या लघुतरी क्षुल्लिका सा वक्ष्यमाणनीत्या तस्य सिंहादेः प्रतिभेषणां 5 करोति, तत इतरा भयं मुञ्चतीति । या तु वादे पराजिताऽपमानतः क्षिप्तचित्तीभूता तस्याः प्रगुणीकरणार्थं यया चरिकया सा पराजिता तां पूर्वं 'प्ररूप्य' प्रज्ञाप्य तदनन्तरं तया स्वमुखोच्चारितेन वचसा क्षिप्तचित्तोच्चारयितव्या ॥ ६२०४ ॥ अथापमानतः क्षिप्तचित्ततां भावयति—

अवहीरिया व गुरुणा, पवत्तिणीए व कम्मि वि पमादे ।
वातम्मि वि चरियाए, परातियाए इमा जयणा ॥ ६२०५ ॥ 10

'गुरुणा' आचार्येणावधीरिता, अथवा प्रवर्तिन्या कस्मिंश्चित् प्रमादे वर्तमाना सती गाढं शिक्षिता भवेत् ततोऽपमानेन क्षिप्तचित्ता जायेत । यदि वा चरिकया वादे पराजिता इत्यपमानतः क्षिप्तचित्ता स्यात् । तस्यां च भयेन क्षिप्तचित्तायामियं यतना ॥ ६२०५ ॥

कण्णम्मि एस सीहो, गहितो अह धारिओ य सो हत्थी ।
खुड्डुलतरिया तुज्झं, ते वि य गमिया पुरा पाला ॥ ६२०६ ॥ 15

इह "पदैकदेशे पदसमुदायोपचारात्" "पाला" इत्युक्ते हस्तिपालाः सिंहपाला वा द्रष्टव्याः । तेऽपि 'पुरा' पूर्वं 'गमिताः' प्रतिबोधिताः कर्तव्याः, यथा—अस्माकमेका क्षुल्लिका युष्मदीयं सिंहं हस्तिनं वा दृष्ट्वा क्षोभमुपागता, ततः सा यथा क्षोभं मुञ्चति तथा कर्तव्यम् । एवं तेषु प्रतिबोधितेषु सा क्षिप्तचित्तीभूता तेषामन्तिके नीयते, नीत्वा च तासां मध्ये या तस्या अपि क्षुल्लिकाया लघुतरी तया स सिंहः कर्णे धार्यते, हस्ती वा तया धार्यते । ततः सा 20 क्षिप्तचित्ता प्रोच्यते—त्वत्तोऽपि या 'क्षुल्लकतरा' अतिशयेन लघुस्तया एष सिंहः कर्णे धृतः, अथवा हस्ती अनया धाटितः, त्वं तु बिभेषि, किं त्वमेतस्या अपि भीरुर्जाता ?, धार्ष्ट्यमवलम्ब्यतामिति ॥ ६२०६ ॥

सत्थऽग्गी थंभेतुं, पणोल्लणं णस्सते य सो हत्थी ।
थेरी चम्म विकड्ढण, अलायचक्कं तु दोसुं तु ॥ ६२०७ ॥ 25

यदि शस्त्रं यदि वाऽग्निं दृष्ट्वा क्षिप्ता भवेत् ततः शस्त्रमग्निं च विद्यया स्तम्भित्वा तस्य पादाभ्यां प्रणोदनं कर्तव्यम्, भणितव्यं च तां प्रति—एषोऽस्माभिरग्निः शस्त्रं च पादाभ्यां प्रणुन्नः, त्वं तु ततोऽपि बिभेषीति । यदि वा पानीयेनार्द्रीकृतहस्तादिभिः सोऽग्निः स्पृश्यते, भण्यते च—एतस्मादपि तव किं भयम् ? । तथा यतो हस्तिनस्तस्या भयमभूत् स हस्ती स्वयं पराङ्मुखो गच्छन् दर्श्यते, यथा—यतस्त्वं बिभेषि स हस्ती 'नश्यति' नश्यन् वर्तते ततः 30 कथं त्वमेवं भीरोरपि भीरुर्जाता ? । तथा या गर्जितं श्रुत्वा भयमग्रहीत् तं प्रति उच्यते— स्थविरा नभसि शुष्कं चर्म विकर्षति; एवं चोक्त्वा शुष्कचर्मण आकर्षणशब्दः श्राव्यते, ततो भयं जरयति । तथा यदि अग्नेः स्तम्भनं न ज्ञायते तदा 'द्वयोः' अग्नौ विद्युति च भयं प्रप-

माया अलातचक्रं पुनः पुनरकस्माद् दर्श्यते यावदुभयोरपि भयं जीर्णं भवति ॥ ६२०७ ॥

अथ वादे पराजयादपमानतः क्षिप्तचित्तीभूताया यतनामाह—

एईएँ जिता मि अहं, तं पुण सहसा ण लक्खियं णाए ।
धिक्कतकतितव लज्जाविताए पउणायई खुड्डी ॥ ६२०८ ॥
5 तह वि य अठायमाणे, सारक्खमरक्खणे य चउगुरुगा ।
आणाइणो य दोसा, विराहण इमेहिँ ठाणेहिँ ॥ ६२०९ ॥

यया चरिकया सा पराजिता सा प्रज्ञाप्यते यथोक्तं प्राक् । ततः साऽऽगत्य वदति— एतयाऽहं वादे जिताऽस्मि, 'तत् पुनः' स्वयंजयनमनया सहसा न लक्षितम्, ततो मे लोकस्य पुरतो जयमवादोऽभवत् । एवमुक्ते सा चरिका धिक्कृतं–धिक्कारस्तत्कैतवेन–तद्व्याजेन 'लज्जाप्यते' 10 लज्जां ग्राह्यते, लज्जां च ग्राहिता सती साऽपसार्यते । ततः क्षिप्ता भण्यते—किमिति त्वमपमानं गृहीतवती ? वादे हि ननु त्वयैषा पराजिता, तथा च त्वत्समक्षमेव एषा धिक्कारं ग्राहितेति । एवं यतनायां क्रियमाणायां यदि सा क्षुल्लिका प्रगुणीभवति ततः सुन्दरम् ॥ ६२०८ ॥

'तथापि च' एवं यतनायामपि च क्रियमाणायाम् 'अनवतिष्ठति' अनिवर्तमाने क्षिप्तचित्तत्वे संरक्षणं वक्ष्यमाणयतनया कर्तव्यम् । अरक्षणे प्रायश्चित्तं चत्वारो गुरुकाः, आज्ञादयश्च दोषाः, 15 विराधना चामीभिः 'स्थानैः' प्रकारैर्भवति ॥ ६२०९ ॥ तान्येवाह—

छक्कायाण विराहण, झामण तेणे निवायणे चेव ।
अगड विसमे पडेज व, तम्हा रक्खंति जयणाए ॥ ६२१० ॥

तया क्षिप्तचित्तया इतस्ततः परिभ्रमन्त्या षण्णां कायानां–पृथिवीकायिकादीनां विराधना क्रियते । 'ध्यामनं' प्रदीपनकं तद् वा कुर्यात् । यदि वा स्तैन्यम्, अथवा निपातनमात्मनः 20 परस्य वा विधीयते । 'अवटे' कूपेऽथवाऽन्यत्र विषमे पतेत् । तदेवमसंरक्षणे इमे दोषास्तस्माद् रक्षन्ति 'यतनया' वक्ष्यमाणया ॥ ६२१० ॥ साम्प्रतमेनामेव गाथां व्याचिख्यासुराह—

सस्सगिहादीणि दहे, तेणेज्ज व सा सयं व हीरेज्जा ।
मारण पिट्टणमुभए, तद्दोसा जं च सेसाणं ॥ ६२११ ॥

सस्यं–धान्यं तद्भृतं गृहं सस्यगृहं तदादीनि, आदिशब्दात् शेषगृहा-ऽऽपणादिपरिग्रहः, 25 'दहेत्' क्षिप्तचित्ततयाऽग्निप्रदानेन भस्मसात्कुर्यात्, एतेन ध्यामनमिति व्याख्यातम् । यदि वा 'स्तेनयेत्' चोरयेत्, अथवा सा स्वयं केनापि ह्रियेत, अनेन स्तैन्यं व्याख्यातम् । मारणं पिट्टनमुभयस्मिन् स्यात्, किमुक्तं भवति ?—सा क्षिप्तचित्तत्वेन परवशा इव स्वयमात्मानं मारयेत् पिट्टयेद्वा, यदि वा परं मारयेत् पिट्टयेद्वा, सा वा परेण मार्यते पिट्यते वेति । "तद्दोसा जं च सेसाणं" इति तस्याः–क्षिप्तचित्ताया दोषाद् यच्च 'शेषाणां' साध्वीनां मारणं पिट्टनं वा । 30 तथाहि—सा क्षिप्तचित्ता सती यदा व्यापादयति पिट्टयति तदा परे स्वरूपमजानानाः शेषसाध्वीनामपि घात-प्रहारादिकं कुर्युः तन्निमित्तमपि प्रायश्चित्तमरक्षणे द्रष्टव्यम् । शेषाणि तु स्थानानि सुगमानीति[1] न व्याख्यातानि ॥ ६२११ ॥

---

१ °ति भाष्यकृता न व्या° कां० ॥

यदुक्तं "तस्माद् रक्षन्ति यतनया" (गा० ६२१०) इति तत्र यतनामाह—

महिड्डिए उट्ठ निवेसणे य, आहार विगिंचणा विउस्सग्गो ।
रक्खंताण य फिडिया, अगवेसणे होंति चउगुरुगा ॥ ६२१२ ॥

महर्द्धिको नाम-ग्रामस्य नगरस्य वा रक्षाकारी तस्य कथनीयम् । तथा "उट्ठ निवेसणे य" त्ति मृदुबन्धैस्तथा संयतनीया यथा स्वयमुत्थानं निवेशनं च कर्तुं समर्था भवति । तथा 5 यदि 'वातादिना धातुक्षोभोऽस्या अभूत्' इति ज्ञायते तदाऽपथ्याहारपरिहारेण स्निग्ध-मधुरादिरूप आहारः प्रदातव्यः । "विगिंचण" त्ति उच्चारादेस्तस्याः परिष्ठापनं कर्तव्यम् । यदि पुनः 'देवताकृत एष उपद्रवः' इति ज्ञायते तदा प्राशुकैषणीयेन क्रिया कार्या । तथा "विउस्सग्गो" इति 'किमयं वातादिना धातुक्षोभः ? उत देवताकृत उपद्रवः ?' इति परिज्ञानाय देवताराधनार्थं कायोत्सर्गः करणीयः । ततस्तयाऽऽकम्पितया कथिते सति तदनुरूपो यत्नो यथोक्तस्वरूपः 10 करणीयः । एवंरक्षतामपि यदि सा कथञ्चित् स्फिटिता स्यात् ततस्तस्या गवेषणं कर्तव्यम् । अगवेषणे प्रायश्चित्तं चत्वारो गुरुकाः । एष द्वारगाथासङ्क्षेपार्थः ॥ ६२१२ ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतो महर्द्धिकद्वारं विवृणोति—

अम्हं एत्थ पिसादी, रक्खंताणं पि फिट्टति कताई ।
सा हु परिरक्खियव्वा, महिड्डिगाऽऽरक्खिए कहणा ॥ ६२१३ ॥ 15

'महर्द्धिके' ग्रामस्य नगरस्य वा रक्षाकारिण्यारक्षके कथना कर्तव्या, यथा—'अत्र' एतस्मिन्नुपाश्रयेऽस्माकं रक्षतामप्येषा 'पिशाची' ग्रथिला कदाचित् 'स्फिटति' अपगच्छति सा 'हुः' निश्चितं परिरक्षयितव्या, प्रतिपन्नचारित्रत्वादिति ॥ ६२१३ ॥

व्याख्यातं महर्द्धिकद्वारम् । अधुना "उट्ठ निवेसणे य" इति व्याख्यानयति—

मिउबंधेहिँ[1] तहा णं, जमेंति जह सा सयं तु उट्ठेति । 20
उव्वरग सत्थरहिते, बाहि कुडंडे असुन्नं च ॥ ६२१४ ॥

मृदुबन्धैस्तथा "णं" इति तां क्षिप्तचित्तां 'यमयन्ति' बध्नन्ति यथा सा स्वयमुत्तिष्ठति, तुशब्दस्यानुक्तसमुच्चयार्थत्वाद् निविशते च । तथा सा तस्मिन्नपवरके स्थाप्यते यत्र न किमपि शस्त्रं भवति, यतः सा क्षिप्तचित्ततया युक्तमयुक्तं वाऽजानती शस्त्रं दृष्ट्वा तेनाऽऽत्मानं व्यापादयेत् । तस्य चापवरकस्य द्वारं बहिः 'कुडण्डेन' वंशटोक्करादिना बध्यते येन न निर्गत्यापगच्छति । तथा अशून्यं यथा भवति एवं सा वारेण वारेण प्रतिजागर्यते, अन्यथा शून्यमात्मानमुपलभ्य बहुतरं क्षिप्तचित्ता भूयात् ॥ ६२१४ ॥ 25

उव्वरगस्स उ असती, पुव्वकतऽसती य खम्मते अगडो ।
तस्सोवरिं च चक्कं, ण छिवति जह उप्फिडंती वि ॥ ६२१५ ॥

अपवरकस्य 'असति' अभावे 'पूर्वकृते' पूर्वखाते कूपे निर्जले सा प्रक्षिप्यते । तस्याभावेऽवटो 30 नवः खन्यते, खनित्वा च तत्र प्रक्षिप्यते । प्रक्षिप्य च तस्यावटस्योपरि 'चक्रं' रथाङ्गं स्थगनाय तथा दीयते यथा सा 'उत्स्फिटन्त्यपि' उच्छलयन्त्यपि तच्चक्रं 'न च्छुपति' न स्पृशति ॥६२१५॥

[1] **मउबंधेहिं तहा संजमंति** ताभा० ॥

साम्प्रतं "आहार विगिंचणा" इत्यादि व्याख्यानयति—

निद्ध महुरं च भत्तं, करीससेज्जा य णो जहा वातो ।
[1]देविय धाउक्खोभे, णातुस्सग्गो ततो किरिया ॥ ६२१६ ॥

यदि 'वातादिना धातुक्षोभोऽस्याः सञ्जातः' इति ज्ञायते तदा भक्तमपथ्यपरिहारेण स्निग्धं 5 मधुरं च तस्यै दातव्यम्, शय्या च करीषमयी कर्तव्या, सा हि [2]सोष्णा भवति, उष्णे च वात-श्लेष्मापहारः, यथा च वातो न लभ्यते तथा कर्तव्यम् । तथा किमयं 'दैविकः' देवेन—भूतादिना कृत उपद्रवः ? उत धातुक्षोभः ? इति ज्ञातुं देवताराधनाय 'उत्सर्गः' कायोत्सर्गः क्रियते । तस्मिंश्च क्रियमाणे यद् आकम्पितया देवतया कथितं तदनुसारेण ततः क्रिया कर्तव्या । यदि दैविक इति कथितं तदा प्राशुकैषणीयेन तस्या उपचारः, शेषसाध्वीनां तपोवृद्धिः, 10 तदुपशमनाय च मन्त्रादिस्मरणमिति । अथ वातादिना धातुक्षोभ इति कथितं तदा स्निग्ध-मधुराद्युपचार इति ॥ ६२१६ ॥ सम्प्रति "रक्खंताण य फिडिए"त्यादि व्याख्यानयति—

अगडे पलाय मग्गण, अण्णगणो वा वि जो ण सारक्खे ।
गुरुगा जं वा जत्तो, तेसिं च णिवेयणं काउं ॥ ६२१७ ॥

अगडे इति सप्तमी पञ्चम्यर्थे, ततोऽयमर्थः—'अवटात्' कूपाद्, उपलक्षणमेतद्, अप-15 वरकाद्वा यदि पलायते कथमपि ततस्तस्याः 'मार्गणम्' अन्वेषणं कर्तव्यम् । तथा ये तत्राऽन्यत्र वाऽऽसन्ने दूरे वाऽन्यगणा विद्यन्ते तेषां च निवेद[3]नाकरणम्, निवेदनं कर्तव्यमिति भावः । यथा—अस्मदीया एका साध्वी क्षिप्तचित्ता नष्टा वर्तते । ततस्तैरपि सा गवेषणीया, दृष्टा च सा सङ्ग्रहणीया । यदि पुनर्न गवेषयन्ति नापि संरक्षन्ति स्वगणवर्तिन्या अन्यगण-वर्तिन्या वा तदा तेषां प्रायश्चित्तं चत्वारः 'गुरुकाः' गुरुमासाः । यच्च करिष्यति षड्जीवनि-20 कायविराधनादिकं यच्च प्राप्स्यति मरणादिकं तन्निमित्तं च तेषां प्रायश्चित्तमिति ॥ ६२१७ ॥

छम्मासे पडियरिउं, अणिच्छमाणेसु भुज्जयरओ वा ।
कुल-गण-संघसमाए, पुव्वगमेणं णिवेदेंति ॥ ६२१८ ॥

पूर्वोक्तप्रकारेण तावत् प्रतिचरणीया यावत् षण्मासा भवन्ति । ततो यदि प्रगुणा जायते तर्हि सुन्दरम् । अथ न प्रगुणीभूता ततः 'भूयस्तरकमपि' पुनस्तरामपि तस्याः प्रतिचरणं 25 विधेयम् । अथ ते साधवः परिश्रान्ता भूयस्तरकं प्रतिचरणं नेच्छन्ति, ततस्तेष्वनिच्छत्सु कुल-गण-सङ्घसमवायं कृत्वा 'पूर्वगमेन' ग्लानद्वारोक्तप्रकारेण तस्मै निवेदनीयम्, निवेदिते च ते कुलादयो यथाक्रमं तां प्रतिचरन्ति ॥ ६२१८ ॥

अथ सा राजादीनां सञ्ज्ञातका भवेत् तदा इयं यतना—

रण्णो निवेइयम्मि, तेसिं वयणे गवेसणा होति ।
30 **ओसह वेज्जा संबंधुवस्सए तीसु वी जयणा ॥ ६२१९ ॥**

यदि राज्ञोऽन्येषां वा सा पुत्र्यादिका भवेत् ततो राज्ञः, उपलक्षणमेतद्, अन्येषां वा

१ दिव्विय ताम० ॥ २ सोष्मा भ° कां० ॥ ३ °दना कृत्वा स्थातव्यम् । निवेदना नाम–यथा अस्म° कां० ॥

स्वजनानां निवेदनं क्रियते, यथा—युष्मदीयैषा पुत्र्यादिका क्षिप्तचित्ता जाता इति । एवं निवेदिते यदि ब्रुवते राजादयः, यथा—मम पुत्र्यादीनां क्रिया स्वयमेव क्रियमाणा वर्तते तत इहैव तामप्यानयत इति । ततः सा तेषां वचनेन तत्र नीयते, नीतायाश्च तत्र तस्या गवेषणा भवति । अयमत्र भावार्थः—साधवोऽपि तत्र गत्वा औषध-भेषजानि प्रयच्छन्ति प्रतिदिवसं च शरीरस्योदन्तं वहन्ति । यदि पुनः 'सम्बन्धिनः' स्वजना वदेयुः—वयमौषधानि वैद्यं वा 5 सम्प्रयच्छामः, परमस्माकमासन्ने उपाश्रये स्थित्वा यूयं प्रतिचरथ । तत्र यदि शोभनो भावस्तदा एवं क्रियते । अथ गृहस्थीकरणाय तेषां भावस्तदा न तत्र नयनं किन्तु स्वोपाश्रय एव भ्रियते । तत्र च 'तिसृष्वपि' आहारोपधि-शय्यासु यतना कर्तव्या । एष द्वारगाथासङ्क्षेपार्थः ॥ ६२१९ ॥

साम्प्रतमेनामेव विवरीषुः प्रथमतः "रन्नो निवेइयम्मी" इत्येतद् व्याख्यानयति—

पुत्तादीणं किरियं, सयमेव घरम्मि कोइ कारेति । 10

अणुजाणंते य तहिं, इमे वि गंतुं पडियरंति ॥ ६२२० ॥

यदि 'कोऽपि' राजाऽन्यो वा क्षिप्तचित्तायाः साध्व्याः स्वजनो गृहे 'स्वयमेव' साधुनिवेदनात् प्राग् आत्मनैव पुत्र्यादीनां 'क्रियां' चिकित्सां कारयति तदा तस्मै निवेदिते–'युष्मदीया क्षिप्तचित्ता जाता' इति कथिते यदि तेऽनुजानन्ति, यथा—अत्र समानयत इति; ततः सा तत्र नीयते, नीतां च सतीम् 'इमेऽपि' गच्छवासिनः साधवो गत्वा प्रतिचरन्ति ॥ ६२२० ॥ 15

ओसह विज्जे देमो, पडिजग्गह णं[1] इहं ठिताऽऽसण्णं ।

तेसिं च णाउ भावं, ण[2] देंति मा णं गिहीकुज्जा ॥ ६२२१ ॥

कदाचित् स्वजना ब्रूयुः, यथा—औषधानि वैद्यं च वयं दद्मः, केवलम् 'इह' अस्मिन्-स्माकमासन्ने प्रदेशे स्थिताः "णं" इति एनां प्रतिजागृत । तत्र तेषां यदि भावो विरूपो गृहस्थीकरणात्मकस्ततस्तेषां तथारूपं भावमिङ्गिताकारकुशला ज्ञात्वा न ददति, न तेषामासन्ने 20 प्रदेशे नयन्तीति भावः । कुतः ? इत्याह—मा तां गृहस्थीकुर्युरिति हेतोः ॥ ६२२१ ॥

सम्प्रति "तीसु वी जयणे"त्येतद् व्याख्यानयति—

आहार उवहि सिज्जा, उग्गम-उप्पायणादिसु जयंति[3] ।

वायादी खोभम्मि व, जयंति पत्तेग मिस्सा वा ॥ ६२२२ ॥

आहारे उपधौ शय्यायां च विषये उद्गमोत्पादनादिषु, आदिशब्दाद् एषणादिदोषपरिग्रहः, 25 'यतन्ते' यत्नपरा भवन्ति, उद्गमोत्पादनादोषविशुद्धाहाराद्युत्पादने प्रतिचरका अन्येऽपि च यतमानास्तां प्रतिचरन्तीति भावः । एषा यतना दैविके क्षिप्तचित्तत्वे द्रष्टव्या । एवं वातादिना धातुक्षोभेऽपि 'प्रत्येकं' साम्भोगिकाः 'मिश्रा वा' असाम्भोगिकैः सम्मिश्राः पूर्वोक्तप्रकारेण यतन्ते ॥ ६२२२ ॥

पुव्वुद्दिट्ठो य विही, इह वि करेंताण होति तह चेव । 30

तेइच्छम्मि कयम्मि य, आदेसा तिण्णि सुद्धा वा ॥ ६२२३ ॥

---

१ णं तहिं ठियं सव्वं । तेसिं भा० ताभा० ॥ २ ण णेंति ताभा० ॥ ३ °तामित्येनां भा० ॥ ४ जयंतत भा० कां० ताभा० ॥

यः पूर्वं–प्रथमोद्देशके ग्लानसूत्रे उद्दिष्टः–प्रतिपादितो विधिः स एव 'इहापि' क्षिप्तचित्तासूत्रेऽपि वैयावृत्त्यं कुर्वतां तथैव भवति ज्ञातव्यः। 'चैकित्स्ये च' चिकित्सायाः कर्मणि च 'कृते' प्रगुणीभूतायां च तस्यां त्रय आदेशाः प्रायश्चित्तविषया भवन्ति। एके ब्रुवते—गुरुको व्यवहारः स्थापयितव्यः। अपरे ब्रुवते—लघुकः। अन्ये व्याचक्षते—लघुस्वकः। तत्र तृतीय 5 आदेशः प्रमाणम्, व्यवहारसूत्रोक्तत्वात्। अथवा सा 'शुद्धा' न प्रायश्चित्तभाक्, परवशतया राग-द्वेषाभावेन प्रतिसेवनात्॥ ६२२३॥ एतदेव बिभावयिषुरिदमाह—

चउरो य हुंति भंगा, तेसिं वयणम्मि होति पण्णवणा।
परिसाए मज्झम्मी, पट्ठवणा होति पच्छित्ते॥ ६२२४॥

इह चारित्रविषये वृद्धि-हान्यादिगताश्चत्वारो भवन्ति भङ्गास्तेषां प्ररूपणा कर्तव्या। 'नोद-10 कवचने च' 'कथं साऽप्रायश्चित्ती?' इत्येवंरूपे 'प्रज्ञापना' सूरेः प्रतिवचनरूपा भवति। ततः पर्षदो मध्ये अगीतार्थप्रत्ययनिमित्तं 'प्रायश्चित्तस्य' लघुस्वकरूपस्य 'प्रस्थापना' प्रदानं तस्याः शुद्धाया अपि कर्तव्यमिति॥ ६२२४॥

सम्प्रति चतुरो भङ्गान् कथयन् प्रायश्चित्तदानाभावं भावयति—

वड्ढति हायति उभयं, अवट्ठियं च चरणं भवे चउहा।
15 **खइयं तहोवसमियं, मिस्समहक्खाय खेत्तं च॥ ६२२५॥**

कस्यापि चारित्रं वर्धते, कस्यापि चारित्रं हीयते, कस्यापि चारित्रं हीयते वर्धते च, कस्यापि 'अवस्थितं' न हीयते न च वर्धते, एते चत्वारो भङ्गाश्चारित्रस्य। साम्प्रतममीषामेव चतुर्णां भङ्गानां यथासङ्ख्येन विषयान् प्रदर्शयति—"खइयं" इत्यादि। क्षपकश्रेणिप्रतिपन्नस्य क्षायिकं चरणं वर्धते। उपशमश्रेणीतः प्रतिपतने औपशमिकं चरणं हानिमुपगच्छति। 20 क्षायोपशमिकं तत्तद्राग-द्वेषोत्कर्षा-ऽपकर्षवशतः क्षीयते परिवर्धते च। यथाख्यातं 'क्षिप्तं च' पदैकदेशे पदसमुदायोपचारात् क्षिप्तचित्तचारित्रं चावस्थितम्, यथाख्यातचारित्रे सर्वथा राग-द्वेषोदयाभावात् क्षिप्तचित्तचारित्रे परवशतया प्रवृत्तेः स्वतो राग-द्वेषाभावात्। तदेवं यतः क्षिप्तचित्ते चारित्रमवस्थितं अतो नासौ प्रायश्चित्तभागिति॥ ६२२५॥

पर आह—ननु सा क्षिप्तचित्ताऽऽश्रवद्वारेषु चिरकालं प्रवर्तिता बहुविधं चासमञ्जसतया 25 प्रलपितं लोक-लोकोत्तरविरुद्धं च समाचरितं ततः कथमेषा न प्रायश्चित्तभाक्? अत्र सूरिराह—

कामं आसवदारेसु वट्टियं पलवितं बहुविधं च।
लोगविरुद्धा य पदा, लोउत्तरिया य आइण्णा॥ ६२२६॥
न य बंधहेउविगलत्तणेण कम्मस्स उवचयो होति।
लोगो वि एत्थ सक्खी, जह एस परव्वसा कासी॥ ६२२७॥

30 'कामम्' इत्यनुमतौ अनुमतमेतद्, यथा—तयाऽऽश्रवद्वारेषु चिरकालं वर्तितं बहुविधं च प्रलपितं लोकविरुद्धानि लोकोत्तरविरुद्धानि च पदानि 'आचीर्णानि' प्रतिसेवितानि॥६२२६॥

तथापि 'न च' नैव तस्याः क्षिप्तचित्तायाः 'बन्धहेतुविकलत्वेन' बन्धहेतवः–राग-द्वेषादयस्तद्विकलत्वेन कर्मोपचयो भवति, कर्मोपचयस्य राग-द्वेषसमाचरिताद्यधीनत्वात्, तस्याश्च राग-

द्वेषविकलत्वात् । तस्याश्च राग-द्वेषविकलत्वं न वचनमात्रसिद्धं किन्तु लोकोऽपि 'अत्र' अस्मिन् विषये साक्षी, यथा—एषा सर्वं परवशाऽकार्षीदिति । ततो राग-द्वेषाभावान्न कर्मोपचयः, तस्य तदनुगतत्वात् ॥ ६२२७ ॥ तथा चाह—

राग-दोसाणुगया, जीवा कम्मस्स बंधगा होंति ।
रागादिविसेसेण य, बंधविसेसो वि अविगीओ ॥ ६२२८ ॥ 5

राग-द्वेषाभ्यामनुगताः—सम्बद्धा राग-द्वेषानुगताः सन्तो जीवाः कर्मणो बन्धका भवन्ति । ततः 'राग-द्वेषविशेषेण' राग-द्वेषतारतम्येन 'बन्धविशेषः' कर्मबन्धतर-तमभावः 'अविगीतः' अविप्रतिपन्नः । ततः क्षिप्तचित्ताया राग-द्वेषाभावतः कर्मोपचयाभावः ॥ ६२२८ ॥

अमुमेवार्थं दृष्टान्तेन द्रढयति—

कुणमाणा वि य चेट्ठा, परतंता णट्टिया बहुविहातो । 10
किरियाफलेण जुज्जति, ण जहा एमेव एतं पि ॥ ६२२९ ॥

यथा 'नर्तकी' यन्त्रनर्तकी काष्ठमयी 'परतन्त्रा' परायत्ता परप्रयोगत इत्यर्थः, 'बहुधा अपि' बहुप्रकारा अपि, तुशब्दोऽपिशब्दार्थः, चेष्टाः कुर्वाणा 'क्रियाफलेन' कर्मणा न युज्यते; 'एवमेव' अनेनैव प्रकारेण एनामपि क्षिप्तचित्तामनेका अपि विरुद्धाः क्रियाः कुर्वाणामकर्मकोपचयां पश्यत ॥ ६२२९ ॥ अथात्र परस्य मतमाशङ्कमान आह— 15

जइ इच्छसि सासेरा, अचेतणा तेण से चओ णत्थि ।
जीवपरिग्गहिया पुण, बोंदी असमंजसं समता ॥ ६२३० ॥

यदि त्वमेतद् 'इच्छसि' अनुमन्यसे, यथा—"सासेरा" इति देशीपदत्वाद् यन्त्रमयी नर्तकी अचेतना तेन कारणेन "से" तस्याः 'चयः' कर्मोपचयो नास्ति, 'बोन्दिः' तनुः पुनः 'जीवपरिगृहीता' जीवेनाधिष्ठिता, जीवपरिगृहीतत्वाच्चावश्यं तद्विरुद्धचेष्टातः कर्मोपचयसम्भवः, 20 ततो या सासेरादृष्टान्तेन समता आपादिता सा 'असमञ्जसम्' अयुज्यमाना, अचेतन-सचेतनयोर्दृष्टान्त-दार्ष्टान्तिकयोर्वैषम्यात् ॥ ६२३० ॥ अत्राऽऽचार्यः प्राह—

चेयणमचेयणं वा, परतंतत्तेण णणु हु तुल्लाइं ।
ण तया विसेसितं एत्थ किंचि भणती सुण विसेसं ॥ ६२३१ ॥

इह वस्तु चेतनं वाऽस्तु अचेतनं वा, यदि परतन्त्रं तदा ननु 'हुः' निश्चितं 'परतन्त्रत्वेन' 25 परायत्ततया यतो द्वे अपि तुल्ये ततो न किञ्चिद् वैषम्यम् । पर आह—न त्वयाऽत्र परकर्मोपचयचिन्तायां 'किञ्चिदपि' मनागपि विशेषितं येन 'जीवपरिगृहीतत्वेऽप्येकत्र कर्मोपचयो भवति, एकत्र न' इति प्रतिपद्यामहे । अत्राचार्यः 'भणति' ब्रूते—शृणु भण्यमानं विशेषम् ॥ ६२३१ ॥ तमेवाह—

णणु सो चेव विसेसो, जं एकमचेतणं सचित्तेगं । 30
जह चेयणे विसेसो, तह भणसु इमं णिसामेह ॥ ६२३२ ॥

ननु 'स एव' यन्त्रनर्तकी-स्वाभाविकनर्तकीदृष्टान्तसूचितो विशेषः—यद् 'एकं शरीरं'

---

१ °गा भणिया ताभा० ॥

यन्त्रनर्तकीसत्कं परायत्ततया चेष्टमानमप्यचेतनम्, 'एकं तु' स्वाभाविकनर्तकीशरीरं स्वायत्ततया प्रवृत्तेः 'सचित्तं' सचेतनमिति। पर आह—यथा एष चेतने विशेषो निःसन्दिग्धप्रतिपत्तिविषयो भवति तथा 'भणत' प्रतिपादयत। आचार्यः प्राह—ततः 'इदं' वक्ष्यमाणं 'निशमय' आकर्णय ॥ ६२३२ ॥ तदेवाह—

5 जो पेल्लिओ परेणं, हेऊ वसणस्स होइ कायाणं।
तत्थ न दोसं इच्छसि, लोगेण समं तहा तं च ॥ ६२३३ ॥

यः परेण प्रेरितः सन् 'कायानां' पृथिव्यादीनां 'व्यसनस्य' सङ्घट्टन-परितापनादिरूपस्य 'हेतुः' कारणं भवति 'तत्र' तस्मिन् परेण प्रेरिततया कायव्यसनहेतौ यथा न त्वं दोषमिच्छसि, अनात्मवशतया प्रवृत्तेः। कथं पुनर्दोषं नेच्छामि? इत्यत आह—'लोकेन समं' लोकेन सह, 10 लोके तथादर्शनत इत्यर्थः। तथाहि—यो यत्रानात्मवशतया प्रवर्तते तं तत्र लोको निर्दोषमभिमन्यते। अत एव परप्रेरिततया कायव्यसनहेतुं निर्दोषमभिमन्यताम्। यथा च तं निर्दोषमिच्छसि तथा 'तामपि च' क्षिप्तचित्तां निर्दोषां पश्य, तस्या अपि परायत्ततया तथारूपासु चेष्टासु प्रवृत्तेः ॥ ६२३३ ॥ एतदेव सविशेषं भावयति—

पस्संतो वि य काए, अपच्चलो अप्पगं विधारेउं।
15 जह पेल्लितो अदोसो, एमेव इमं पि पासामो ॥ ६२३४ ॥

यथा परेण प्रेरित आत्मानं 'विधारयितुं' संस्थापयितुम् 'अप्रत्यलः' असमर्थः सन् पश्यन्नपि 'कायान्' पृथिवीकायिकादीन् विराधयन् अन्निकापुत्राचार्य इव 'अदोषः' निर्दोषः; 'एवमेव' अनेनैव प्रकारेण परायत्ततया प्रवृत्तिलक्षणेन 'इमामपि' क्षिप्तचित्तामदोषां पश्यामः ॥ ६२३४ ॥

इह पूर्वं प्रगुणीभूतायास्तस्याः प्रायश्चित्तदानविषये त्रय आदेशा गुरुकादय उक्ता अतस्ता-20 नेव गुरुकादीन् प्ररूपयति—

गुरुगो गुरुगतरागो, अहागुरूगो य होइ ववहारो।
लहुओ लहुयतरागो, अहालहूगो य ववहारो ॥ ६२३५ ॥
लहुसो लहुसतरागो, अहालहूसो य होइ ववहारो।
एतेसिं पच्छित्तं, वोच्छामि अहाणुपुव्वीए ॥ ६२३६ ॥
25 गुरुतो य होइ मासो, गुरुगतरागो य होइ चउमासो।
अहगुरुगो छम्मासो, गुरुगे पक्खम्मि पडिवत्ती ॥ ६२३७ ॥
तीसा य पण्णवीसा, वीसा पन्नरसेव य।
दस पंच य दिवसाइं, लहुसगपक्खम्मि पडिवत्ती ॥ ६२३८ ॥
गुरुगं च अट्ठमं खलु, गुरुगतरागं च होइ दसमं तु।
30 आहागुरुग दुवालस, गुरुगे पक्खम्मि पडिवत्ती ॥ ६२३९ ॥
छट्ठं च चउत्थं वा, आयंबिल-एगठाण-पुरिमड्ढा।
निव्वियगं दायव्वं, अहलहुसगम्मि सुद्धो वा ॥ ६२४० ॥

आसां षण्णामपि गाथानां व्याख्या पूर्ववत् (गा० ६०३९ तः ४४)। नवरम्—

इहलौकिकार्थप्रत्ययार्थं यथालघुस्वको व्यवहारः प्रस्थापयितव्यः ॥ ६२३५ ॥ ६२३६ ॥ ॥ ६२३७ ॥ ६२३८ ॥ ६२३९ ॥ ६२४० ॥

सूत्रम्—

दित्तचित्तं निग्गंथिं निग्गंथे गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ ११ ॥ 5

अस्य व्याख्या प्राग्वत् । नवरम्—दीप्तचित्ता–लाभादिमदेन परवशीभूतहृदया ॥

अथ भाष्यकारो विस्तरमभिधित्सुराह—

एसेव गमो नियमा, दित्तादीणं पि होइ णायव्वो ।
जो होइ दित्तचित्तो, सो पलवति णिच्छियव्वाइं ॥ ६२४१ ॥

'एष एव' अनन्तरोक्तक्षिप्तचित्तानिर्ग्रन्थीसूत्रगत एव 'गमः' प्रकारो लौकिक-लोकोत्तरि- 10 कभेदादिरूपः 'दीप्तादीनामपि' दीप्तचित्ताप्रभृतीनामपि निर्ग्रन्थीनां नियमाद् वेदितव्यः । यत् पुनर्नानात्वं तद् अभिधातव्यम् । तदेवाधिकृतसूत्रेऽभिधित्सुराह—"जो होइ" इत्यादि, यो भवति दीप्तचित्तः सोऽनीप्सितव्यानि बहूनि प्रलपति, बह्वनीप्सितप्रलपनं तस्य लक्षणम्, क्षिप्तचित्तस्त्वपहृतचित्ततया मौनेनाप्यवतिष्ठत इति परस्परं सूत्रयोर्विशेष इति भावः ॥ ६२४१ ॥

अथ कथमेष दीप्तचित्तो भवति ? इति तत्कारणप्रतिपादनार्थमाह— 15

इति एस असम्माणा, खित्ता सम्माणतो भवे दित्ता ।
अग्गी व इंधणेणं, दिप्पति चित्तं इमेहिं तु ॥ ६२४२ ॥

'इति' अनन्तरसूत्रोक्ता 'एषा' क्षिप्तचित्ता 'असम्मानतः' अपमानतो भवति । 'दीप्ता' दीप्तचित्ता पुनः 'सम्मानतः' विशिष्टसम्मानावासितो भवति । तच्च चित्तं दीप्यतेऽग्निरिवेन्धनैः 'एभिः' वक्ष्यमाणैर्लाभमदादिभिः ॥ ६२४२ ॥ तानेवाह— 20

लाभमएण व मत्तो, अहवा जेऊण दुज्जए सत्तू ।
दित्तम्मि सायवाहणो, तमहं वोच्छं समासेण ॥ ६२४३ ॥

लाभमदेन वा मत्तः सन् दीप्तचित्तो भवति, अथवा दुर्जयान् शत्रून् जित्वा, एतस्मिन्नुभयस्मिन्नपि 'दीप्ते' दीप्तचित्ते लौकिको दृष्टान्तः सातवाहनो राजा । 'तमहं' सातवाहनदृष्टान्तं समासेन वक्ष्ये ॥ ६२४३ ॥ यथाप्रतिज्ञातमेव करोति— 25

महुराऽऽणत्ती दंडे, सहसा णिग्गम अपुच्छिउं कयरं ।
तस्स य तिक्खा आणा, दुहा गता दो वि पाडेउं ॥ ६२४४ ॥
सुतजम्म-महुरपाडण-निहिलंभनिवेदणा जुगव दित्तो ।
सयणिज्ज खंभ कुड्डे, कुट्टेइ इमाइँ पलवंतो ॥ ६२४५ ॥

गोयावरीए णदीए तडे अ पतिट्ठाणं नगरं । तत्थ सालवाहणो राया । तस्स खरओ 30 अमच्चो । अन्नया सो सालवाहणो राया दंडनायगमाणवेइ—महुरं घेत्तूणं सिग्घमागच्छ ।

---

१ सुतजम्मण महुरापाडणे य जुगवं निवेदिते दित्तो ताभा० ॥

सो य सहसा अपुच्छिऊण दंडेहिं सह निग्गओ। तओ चिंता जाया—का महुरा घेत्तव्वा? दक्खिणमहुरा उत्तरमहुरा वा?। तस्स आणा तिक्खा, पुणो पुच्छिउं न तीरति। तओ दंडा दुहा काऊण दोसु वि पेसिया। गहियाओ दो वि महुराओ। तओ वद्धावगो पेसिओ। तेण गंतूण राया वद्धाविओ—देव! दो वि महुराओ गहियाओ। इयरो आगओ—
5 देव! अग्गमहिसीए पुत्तो जाओ। अण्णो आगतो—देव! अमुगत्थ पदेसे विपुलो निही पायडो जातो। तओ उवरुवरिं कल्लाणनिवेयणेण हरिसवसविसप्पमाणहियओ परव्वसो जाओ। तओ हरिसं धरिउमचायंतो सयणिज्जं कुट्टइ, खंभे आहणइ, कुड्डे विद्दवइ, बहूणि य असमंजसाणि पलवति। तओ खरगेणामच्चेणं तमुवाएहिं पडिबोहिउकामेण खंभा कुड्डा बहू विद्दविया। रन्ना पुच्छियं—(ग्रन्थाग्रम्—८००० सर्वग्रन्थाग्रम्—४१८२५) केणेयं विद्द-
10 वियं?। सो भणेइ—तुब्भेहिं। ततो 'मम सम्मुहमलीयमेयं भणति' रुट्ठेणं रन्ना सो खरगो पाएण ताडितो। तओ संकेइयपुरिसेहिं उप्पाडिओ अण्णत्थ संगोवितो य। तओ कम्हिइ पओयणे समावडिए रण्णा पुच्छिओ—कत्थ अमच्चो चिट्ठति?। संकेइयपुरिसेहि य 'देव! तुम्हं अविणयकारि' त्ति सो मारिओ। राया विसूरियुं पयत्तो—दुट्ठु कयं, मए तया न किं पि चेइयं ति। तओ सभावत्थो जाओ ताहे संकेइयपुरिसेहिं विन्नत्तो—देव! गवेसामि, जइ वि
15 कयाइ चंडालेहिं रक्खिओ होज्जा। तओ गवेसिऊण आणिओ। राया संतुट्ठो। अमच्चेण सब्भावो कहिओ। तुट्ठेण विउला भोगा दिन्ना॥

साम्प्रतमक्षरार्थो विव्रियते—सातवाहनेन राज्ञा मथुराग्रहणे "दंडि" त्ति दण्डनायकस्याज्ञप्तिः कृता। ततो दण्डाः सहसा 'कां मथुरां गृह्णीमः?' इत्यपृष्ट्वा निर्गताः। तस्य च राज्ञ आज्ञा तीक्ष्णा, ततो न भूयः प्रष्टुं शक्नुवन्ति। ततस्ते दण्डा द्विधा गताः, द्विधा विभज्य एके
20 दक्षिणमथुरायामपरे उत्तरमथुरायां गता इत्यर्थः। द्वे अपि च मथुरे पातयित्वा ते समागताः॥ ६२४४॥

सुतजन्म-मथुरापातन-निधिलाभानां युगपद् निवेदनायां हर्षवशात् सातवाहनो राजा 'दीप्तः' दीप्तचित्तोऽभवत्। दीप्तचित्ततया च 'इमानि' वक्ष्यमाणानि प्रलपन् शयनीय-स्तम्भ-कुड्यानि कुट्टयति॥ ६२४५॥ तत्र यानि प्रलपति तान्याह—

25 **सच्चं भण गोदावरि!, पुव्वसमुद्देण साविया संती।**
साताहणकुलसरिसं, जति ते कूले कुलं अत्थि॥ ६२४६॥
उत्तरतो हिमवंतो, दाहिणतो सालिवाहणो राया।
समभारभरक्कंता, तेण न पल्हत्थए पुहवी॥ ६२४७॥

हे गोदावरि! पूर्वसमुद्रेण 'शपिता' दत्तशपथा सती सत्यं 'भण' ब्रूहि—यदि तव
30 कूले सातवाहनकुलसदृशं कुलमस्ति॥ ६२४६॥

'उत्तरतः' उत्तरस्यां दिशि हिमवान् गिरिः दक्षिणतस्तु सालवाहनो राजा, तेन समभारभराक्रान्ता सती पृथिवी न पर्यस्यति, अन्यथा यदि अहं दक्षिणतो न स्यां ततो हिमवद्गिरिभाराक्रान्ता नियमतः पर्यस्येत्॥ ६२४७॥

एयाणि य अन्नाणि य, पलवियवं सो अणिच्छियव्वाइं ।
कुसलेण अमच्चेणं, खरगेणं सो उवाएणं ॥ ६२४८ ॥

'एतानि' अनन्तरोदितानि अन्यानि च सोऽनीप्सितव्यानि बहूनि प्रलपितवान् । ततः कुशलेन खरकनाम्नाऽमात्येनोपायेन प्रतिबोधयितुकामेनेदं विहितम् ॥ ६२४८ ॥ किम् ? इत्याह—

विद्दवितं केणं ति व, तुब्भेहिं पायतालणा खरए ।　5
कत्थ त्ति मारिओ सो, दुट्ठु त्ति य दरिसिते भोगा ॥ ६२४९ ॥

'विद्रावितं' विनाशितं समस्तं स्तम्भ-कुड्यादि । राज्ञा पृष्टम्—केनेदं विनाशितम् ? । अमात्यः सम्मुखीभूय सरोषं निष्ठुरं वक्ति—युष्माभिः । ततो राज्ञा कुपितेन तस्य पादेन ताडना कृता । तदनन्तरं सङ्केतितपुरुषैः स उत्पाटितः सङ्गोपितश्च । ततः समागते कस्मिंश्चित् प्रयोजने राज्ञा पृष्टम्—कुत्रामात्यो वर्तते ? । सङ्केतितपुरुषैरुक्तम्—देव ! युष्मत्पादानाम- 10 विनयकारी इति मारितः । ततः 'दुष्टं कृतं मया' इति प्रभूतं विसूरितवान् । स्वस्थीभूते च तस्मिन् सङ्केतितपुरुषैरमात्यस्य दर्शनं कारितम् । ततः सद्भावकथनानन्तरं राज्ञा तस्मै विपुला भोगाः प्रदत्ता इति ॥ ६२४९ ॥ उक्तो लौकिको दीप्तचित्तः । अथ तमेव लोकोत्तरिकमाह—

महज्झयण भत्त खीरे, कंबलग पडिग्गहे य फलए य ।
पासाए कप्पट्ठी, वातं काऊण वा दित्ता ॥ ६२५० ॥　15

'महाध्ययनं' पौण्डरीकादिकं दिवसेन पौरुष्या वा कयाचिद् मेधाविन्या क्षुल्लिकया आगमितम्, अथवा भक्तमुत्कृष्टं लब्ध्वा 'नास्मिन् क्षेत्रे भक्तमीदृशं केनापि लब्धपूर्वम्', यदि वा क्षीरं चतुर्जातकसम्मिश्रमवाप्य 'नैतादृशमुत्कृष्टं क्षीरं केनापि लभ्यते', यदि वा कम्बलरत्नमतीवोत्कृष्टम् अथवा विशिष्टवर्णादिगुणोपेतमपलक्षणहीनं पतद्ग्रहं लब्ध्वा, "फलगे य" त्ति यदि वा 'फलकं' चम्पकपट्टकादिकम् अथवा प्रासादे सर्वोत्कृष्टे उपाश्रयत्वेन लब्धे, "कप्पट्ठी"- 20 ति ईश्वरदुहितरि रूपवत्यां प्रज्ञादिगुणयुक्तायां लब्धायां प्रमोदते, प्रमोदभरवशाच्च दीप्तचित्ता भवति । एतेन "लाभमदेन वा मत्तः" (गा० ६२४३) इति पदं लोकोत्तरे योजितम् । अधुना "दुर्जयान् शत्रून् जित्वा" (गा० ६२४३) इति पदं योजयति—वादं वा परप्रवादिन्या दुर्जयया सह कृत्वा तां पराजित्यातिहर्षतः 'दीप्ता' दीप्तचित्ता भवति ॥ ६२५० ॥

एतासु दीप्तचित्तासु यतनामाह—　25

दिवसेण पोरिसीए, तुमए पढितं इमाएँ अद्धेणं ।
एतीएँ णत्थि गव्वो, दुम्मेहतरीएँ को तुज्झं ॥ ६२५१ ॥

दिवसेन पौरुष्या वा त्वया यत् पौण्डरीकादिकमध्ययनं पठितं तद् अनया दिवसस्य पौरुष्या वाऽर्द्धेन पठितं तथाऽप्येतस्या नास्ति गर्वः, तव पुनर्दुर्मेधस्तरकायाः को गर्वः ?, नैव युक्त इति भावः, एतस्या अपि तव हीनप्रज्ञत्वात् ॥ ६२५१ ॥　30

तइव्वस्स दुगुंछण, दिट्ठंतो भावणा असरिसेणं ।

१ दुट्ठु कु° कां० ॥

काऊण होति दित्ता, वादकरणें तत्थ जा ओमा ॥ ६२५२ ॥

यद् उत्कृष्टं कलमशाल्यादिकं भक्तं क्षीरं कम्बलरत्नादिकं वा तया लब्धं तस्य द्रव्यस्य जुगुप्सनं क्रियते, यथा—नेदमपि शोभनम्, अमुको वाऽस्य दोष इति । यदि वा 'दृष्टान्तः' अन्येनापीदृशमानीतमिति प्रदर्शनं क्रियते । तस्य च दृष्टान्तस्य भावना 'असदृशेन' शतभागेन
5 सहस्रभागेन वा या तस्याः सकाशाद् हीना तया कर्तव्या । या तु वादं कृत्वा दीप्ताऽभूत् तस्याः प्रगुणीकरणाय पूर्वं चरिकादिका प्रचण्डा परवादिनी प्रज्ञाप्यते, ततः सा तस्या वादाभिमानिन्याः पुरतस्ततोऽप्यवमतरा या साध्वी तया वादकरणे पराजयं प्राप्यते, एवमपभ्राजिता सती प्रगुणीभवति ॥ ६२५२ ॥

दुल्लभदव्वे देसे, पडिसेहितगं अलद्धपुव्वं वा ।
10 **आहारोवहि वसही, अक्खतजोणी व धूया वि ॥ ६२५३ ॥**

यत्र देशे क्षीर-घृतादिकं द्रव्यं दुर्लभं तत्र तद् अन्यासामार्यिकाणां 'प्रतिषिद्धं' 'न प्रयच्छामः' इति दायकेन निषिद्धं 'अलब्धपूर्वं वा' कयाऽपि पूर्वं तत्र न लब्धं तत्र तद् लब्ध्वा दीप्तचित्ता भवतीति वाक्यशेषः, यद्वा सामान्येनोत्कृष्ट आहार उत्कृष्ट उपधिरुत्कृष्टा वा वसतिर्लब्धा अक्षतयोनिका वा 'दुहिता' काचिदीश्वरपुत्रिका लब्धा तत्रेयं यतना ॥ ६२५३ ॥

15 **पगयम्मि पण्णवेत्ता, विज्जाति विसोधि कम्ममादी वा ।**
खुड्डीय बहुविहे आणियम्मि ओभावणा पउणा ॥ ६२५४ ॥

'प्रकृते' विशिष्टतरे भक्त-क्षीर-कम्बल-रत्नादिकेऽवमतरायाः सम्पादयितव्ये तथाविधं श्रावकमितरं वा प्रज्ञाप्य, तदभावे कस्यापि महर्द्धिकस्य विद्यां आदिशब्दाद् मन्त्र-चूर्णादीन् यावत् 'कर्मादि' कार्मणमपि प्रयुज्य, आदिशब्दः स्वगतानेकभेदसूचकः, ततः क्षुल्लिकतराया
20 गुणतः शतभाग-सहस्रभागादिना हीनाया विशिष्टमाहारादिकं सम्पादयन्ति । ततो विद्यादिप्रयोगजनितपापविशुद्धये 'विशोधिः' प्रायश्चित्तं ग्राह्यम् । एवं क्षुल्लिकया 'बहुविधे' क्षीरादिके आनीते सति तस्या अपभ्राजना क्रियते ततः प्रगुणा भवति ॥ ६२५४ ॥

अदिट्ठसड्ढ कहणं, आउट्टा अभिणवो य पासादो ।
कयमित्ते य विवाहे, सिद्धाइसुता कतितवेणं ॥ ६२५५ ॥

25 यस्तया श्राद्धो न दृष्टः—अदृष्टपूर्वस्तस्यादृष्टस्य श्राद्धस्य 'कथनं' प्रज्ञापना, उपलक्षणमेतद्, अन्यस्य महर्द्धिकस्य विद्यादिप्रयोगतोऽभिमुखीकरणम्, ततस्ते आवृत्ताः सन्तस्तस्या लब्ध्यभिमानिन्याः समीपमागत्य ब्रुवते—वयमेतया क्षुल्लिकया प्रज्ञापितास्ततः 'अभिनव एव' कृतमात्र एव युष्माकमेष प्रासादो दत्त इति । तथा कैतवेन 'सिद्धादिसुताः' सिद्धपुत्रादिदुहितरः कृतमात्र एव विवाहे उत्पादनीयाः । इयमत्र भावना—सिद्धपुत्रादीनां प्रज्ञापनां कृत्वा तद्दुहितरः
30 कृतमात्रविवाहा एव व्रतार्थं तत्समक्षमुपस्थापनीयाः येन तस्या अपभ्राजना जायते । ततः प्रगुणीभूतायां तस्यां यदि तासां न तात्त्विकी व्रतश्रद्धा तदा शकुनादिवैगुण्यमुद्भाव्य मुच्यन्ते ॥ ६२५५ ॥

सूत्रम्—

जक्खाइट्ठिं निग्गंथिं निग्गंथे गिण्हमाणे वा २ नाइक्कमइ १२ ॥

अस्य सम्बन्धमाह—

पोग्गल असुभसमुदयो, एस अणागंतुगो व दोण्हं पि ।
जक्खावेसेणं पुण, नियमा आगंतुको होइ ॥ ६२५६ ॥ 5

'द्वयोः' क्षिप्तचित्ता-दीप्तचित्तयोः 'एषः' पीडाहेतुत्वेनानन्तरमुद्दिष्टोऽशुभपुद्गलसमुदयः 'अनागन्तुकः' स्वशरीरसम्भवी प्रतिपादितः। यक्षावेशेन पुनर्यो यतिपीडाहेतुरशुभपुद्गलसमुदयः स नियमादागन्तुको भवति । ततोऽनागन्तुकाशुभपुद्गलसमुदयप्रतिपादनानन्तरमागन्तुकाशुभपुद्गलसमुदयप्रतिपादनार्थमेष सूत्रारम्भः ॥ ६२५६ ॥ प्रकारान्तरेण सम्बन्धमाह— 10

अहवा भय-सोगजुया, चिंतद्दण्णा व अतिहरिसिता वा ।
आविस्सति जक्खेहिं, अयमण्णो होइ संबंधो ॥ ६२५७ ॥

'अथवा' इति प्रकारान्तरोपदर्शने । भय-शोकयुक्ता वा चिन्तार्दिता वा, एतेन क्षिप्तचित्ता उक्ता; अतिहर्षिता वा या परवशा, अनेन दीप्तचित्ताऽभिहिता; एषा द्विविधाऽपि यक्षैः परवशहृदयतया 'आविश्यते' आलिङ्ग्यते । ततः **क्षिप्त-दीप्तचित्तासूत्रानन्तरं यक्षाविष्टासूत्र**मित्ययमन्यो भवति सम्बन्धः ॥ ६२५७ ॥ 15

अनेन सम्बन्धेनायातस्यास्य व्याख्या—सा च प्राग्वत् ॥ सम्प्रति यतो यक्षाविष्टा भवति तत् प्रतिपादनार्थमाह—

पुव्वभवियवेरेणं, अहवा राएण राइया संती ।
एतेहिँ जक्खइट्ठा, सवत्ति भयए य सज्झिलगा ॥ ६२५८ ॥ 20

'पूर्वभविकेन' भवान्तरभाविना वैरेण अथवा रागेण रञ्जिता सती यक्षैराविश्यते । एताभ्यां द्वेष-रागाभ्यां कारणाभ्यां यक्षाविष्टा भवति । तथा चात्र पूर्वभविके वैरे **सपत्नीदृष्टान्तो** रागे **भृतकदृष्टान्तः सज्झिलकदृष्टान्त**श्चेति ॥ ६२५८ ॥ तत्र **सपत्नीदृष्टान्त**माह—

वेस्सा अकामतो णिज्जराए मरिऊण वंतरी जाता ।
पुव्वसवत्तिं खेत्तं, करेति सामण्णभावम्मि ॥ ६२५९ ॥ 25

एगो सेट्ठी । तस्स दो महिला । एगा पिया, एगा वेस्सा, अनिष्टेत्यर्थः । तत्थ जा वेस्सा सा अकामनिज्जराए मरिऊण वंतरी जाया । इयरा वि तहारूवाणं साहुणीणं पायमूले पव्वइया । सा य वंतरी पुव्वभववेरेण छिड्डाणि मग्गइ । अन्नया पमत्तं दट्ठूण छलियाइया ॥

अक्षरार्थस्त्वयम्—श्रेष्ठिसत्का 'द्वेष्या' अनिष्टा भार्याऽकामनिर्जरया मृत्वा व्यन्तरी जाता । ततः पूर्वसपत्नीं श्रामण्यभावे व्यवस्थितां पूर्वभविकं वैरमनुसरन्ती 'क्षिप्तां' यक्षाविष्टां कृत- 30

१ °तुगो दुवेण्हं ताभा० ॥ २ °यः **जीवस्वीकृतमनोवर्गणान्तर्गताशुभदलिकविशेषरूपः 'अनागन्तुकः'** कां० ॥

वती । गाथायां वर्तमाननिर्देशः प्राकृतत्वात् ॥ ६२५९ ॥ अथ **भृतकदृष्टान्तमाह**—

भयतो कुडुंबिणीए, पडिसिद्धो वाणमंतरो जातो ।
सामण्णम्मि पमत्तं, छलेति तं पुव्ववेरेणं ॥ ६२६० ॥

एगा कोडुंबिणी ओरालसरीरा एगेण भयगेणं ओरालसरीरेणं पत्थिया । सो तीए
5 निच्छीओ । तओ सो गाढमज्झोववन्नो तीए सह संपयोगमलभमाणो दुक्खसागरमोगाढो
अकामनिज्जराए मरिऊण वंतरो जाओ । सा य कोडुंबिणी संसारवासविरत्ता पव्वइया । सा
तेण आभोइया । पमत्तं दट्ठूण छलिया ॥

अक्षरार्थस्त्वयम्—'भृतकः' कर्मकरः कुटुम्बिन्या प्रतिषिद्धो वानमन्तरो जातः । ततः
श्रामण्यस्थितां तां प्रमत्तां मत्वा पूर्ववैरेण छलितवान् ॥ ६२६० ॥

10 अथ **सज्झिलकदृष्टान्तमाह**—

जेट्ठो कणेट्ठभज्जाएँ मुच्छिओ णिच्छितो य सो तीए ।
जीवंते य मयम्मी, सामण्णे वंतरो छलए ॥ ६२६१ ॥

एगम्मि गामे दो सज्झिलका, भायरो इत्यर्थः । तत्थ जेट्ठो कणिट्ठस्स भारियाए अज्झो-
ववन्नो । सो तं पत्थेइ । सा नेच्छइ भणइ य—तुमं अप्पणो लहुबंधवं जीवंतं न पाससि ? ।
15 तेण चिंतियं—जाव एसो जीवए ताव मे नत्थि एसा । एवं चिंतित्ता छिद्दं लभिऊण विस-
संचारेण मारिओ लहुभाया । तओ भणियं—जस्स तुमं भयं कासी सो मतो, इयाणिं पूरेहि
मे मणोरहं । तीए चिंतियं—नूणमेतेण मारितो, धिरत्थु कामभोगाणमिति संवेगेण पव्वइया ।
इयरो वि दुहसंतत्तो अकामनिज्जराए मओ वंतरो जातो विभंगेणं पुव्वभवं पासइ । तं
साहुणिं दट्ठूण पुव्वभवियं वेरमणुसरंतो पमत्तं छलियाइओ ॥

20 अक्षरयोजना त्वियम्—ज्येष्ठः कनिष्ठभार्यायां मूर्छितः, न चासौ तया ईप्सितः किन्तु
'जीवन्तं स्वभ्रातरं न पश्यसि ?' इति भणितवती । ततः 'अस्मिन् जीवति ममैषा न भवति'
इतिबुद्ध्या तं मारितवान् । मृते च तस्मिन् श्रामण्ये स्थितां तां व्यन्तरो जातः सन् छलित-
वान् ॥ ६२६१ ॥ अथैवंछलिताया यतनामाह—

तस्स य भूततिगिच्छा, भूतरवावेसणं सयं वा वि ।
25 **णीउत्तमं च भावं, णाउं किरिया जहा पुव्वं ॥ ६२६२ ॥**

तस्या एवं 'भूतरवावेशनं' भूतरवैः-भूतप्रयुक्तासमञ्जसप्रलापैः आवेशनं-यक्षावेशनं मत्वा
भूतचिकित्सा कर्तव्या । कथम् ? इत्याह—'तस्य' भूतस्य नीचमुत्तमं च भावं ज्ञात्वा । कथं
ज्ञात्वा ? इत्याह—'स्वयं वा' कायोत्सर्गेण देवतामाकम्प्य तद्वचनतः सम्यक् परिज्ञाय, अपि-
शब्दाद् अन्यस्माद्वा मान्त्रिकादेः सकाशाद् ज्ञात्वा । तस्याः क्रिया विधेया, यथा 'पूर्वं' क्षिप्त-
30 चित्ताया उक्ता ॥ ६२६२ ॥ इह यक्षाविष्टा किलोन्मादप्राप्ता भवति ततो **यक्षाविष्टासूत्रा-
नन्तरमुन्मादप्राप्तासूत्रमाह**—

---

१ °वान् । गाथायां वर्त्तमाननिर्देशः प्राकृतत्वात् ॥ ६२६० ॥ अथ कां० ॥

उम्मायपत्तिं निग्गंथिं निग्गंथे गिण्हमाणे वा २ नातिक्कमइ १३ ॥

अस्य व्याख्या प्राग्वत् ॥ अथोन्मादप्ररूपणार्थं भाष्यकारः प्राह—

उम्मातो खलु दुविधो, जक्खाएसो य मोहणिज्जो य ।
जक्खाएसो वुत्तो, मोहेण इमं तु वोच्छामि ॥ ६२६३ ॥ 5

उन्मादः 'खलु' निश्चितं 'द्विविधः' द्विप्रकारः । तद्यथा—यक्षावेशहेतुको यक्षावेशः, कार्ये कारणोपचारात् । एवं मोहनीयकर्मोदयहेतुको मोहनीयः । चशब्दौ परस्परसमुच्चयार्थौ स्वगतानेकभेदसंसूचकौ वा । तत्र यः 'यक्षावेशः' यक्षावेशहेतुकः सोऽनन्तरसूत्रे उक्तः । यस्तु 'मोहेन' मोहनीयोदयेन; मोहनीयं नाम—येनात्मा मुह्यति, तच्च ज्ञानावरणं मोहनीयं वा द्रष्टव्यम्, द्वाभ्यामप्यात्मनो विपर्यासापादनात्, तेनोत्तरत्र "अहव पित्तमुच्छाए" 10 इत्याद्युच्यमानं न विरोधभाक्; "इमो" त्ति अयम्—अनन्तरमेव वक्ष्यमाणतया प्रत्यक्षीभूत इव तमेवेदानीं वक्ष्यामि ॥ ६२६३ ॥ प्रतिज्ञातं निर्वाहयति—

रूवंगं दट्ठूणं, उम्मातो अहव पित्तमुच्छाए ।
तद्दायणा णिवाते, पित्तम्मि य सक्करादीणि ॥ ६२६४ ॥

रूपं च—नटादेराकृतिः अङ्गं च—गुह्याङ्गं रूपाङ्गं तद् दृष्ट्वा कस्या अप्युन्मादो भवेत् ।15 अथवा 'पित्तमूर्च्छया' पित्तोद्रेकेण उपलक्षणत्वाद् वातोद्रेकवशतो वा स्यादुन्मादः । तत्र रूपाङ्गं दृष्ट्वा यस्या उन्मादः सञ्जातस्तस्यास्तस्य—रूपाङ्गस्य विरूपावस्थां प्राप्तस्य दर्शना कर्तव्या । या तु वातेनोन्मादं प्राप्ता सा निवाते स्थापनीया । उपलक्षणमिदम्, तेन तैलादिना शरीरस्याभ्यङ्गो घृतपायनं च तस्याः क्रियते । 'पित्ते' पित्तवशादुन्मतीभूतायाः शर्करा-क्षीरादीनि दातव्यानि ॥ ६२६४ ॥ कथं पुनरसौ रूपाङ्गदर्शनेनोन्मादं गच्छेत्? इत्याह— 20

दट्ठूण नडं काई, उत्तरवेउव्वितं मतणखेत्ता ।
तेणेव य रूवेणं, उड्डम्मि कयम्मि निव्विण्णा ॥ ६२६५ ॥

काचिदल्पसत्त्वा संयती नटं दृष्ट्वा, किंविशिष्टम्? इत्याह—'उत्तरवैकुर्विकम्' उत्तरकालभाविवस्त्रा-ऽऽभरणादिविचित्रकृत्रिमविभूषाशोभितम्, ततः काचिद् 'मदनक्षिप्ता' उन्मादप्राप्ता भवेत् तत्रेयं यतना—उत्तरवैकुर्विकापसारणेन तेनैव स्वाभाविकेन रूपेण ◁ स नटस्तस्या 25 निर्ग्रन्थ्या दर्श्यते । अथासौ नटः स्वभावतोऽपि सुरूपस्ततोऽसौ ऊर्द्ध—वमनं कुर्वन् तस्या दर्श्यते, ततः ▷ तस्मिन्नूर्द्धे कृते सति काचिदल्पकर्मा निर्विण्णा भवति, तद्विषयं विरागं गच्छतीत्यर्थः ॥ ६२६५ ॥[२]

पण्णवितो उ दुरूवो, उम्मंडिज्जति अ तीएँ पुरतो तु ।
रूववतो पुण भत्तं, तं दिज्जति जेण छड्डेति ॥ ६२६६ ॥ 30

---

१ ◁ ▷ एतच्चिह्नान्तर्वर्त्ती पाठः कां० एव वर्त्तते ॥ २ अमुमेवार्थं सविशेषमाह—पण्ण° इत्यवतरणं कां० ॥

अन्यच्च—यदि नटः स्वरूपतो दुरूपो भवति ततः स पूर्वं प्रज्ञाप्यते, प्रज्ञापितश्च सन् 'तस्याः' उन्मादप्राप्तायाः पुरतः 'उन्मण्ड्यते' यत् तस्य मण्डनं तत् सर्वमपनीयते ततो विरूपरूपदर्शनतो विरागो भवति। अथासौ नटः स्वभावत एव रूपवान्—अतिशायिना उद्भटरूपेण युक्तस्ततस्तस्य भक्तं मदनफलमिश्रादिकं तद् दीयते येन भुक्तेन तस्याः पुरतः 'छर्दयति' उद्वमति, 5 उद्वमनं च कुर्वन् किलासौ जुगुप्सनीयो भवति ततः सा तं दृष्ट्वा विरज्यत इति ॥ ६२६६ ॥

गुज्झंगम्मि उ वियडं, पज्जावेऊण खरगमादीणं ।
तद्दायणे विरागो, तीसे तु हवेज्ज दट्ठूणं ॥ ६२६७ ॥

यदि पुनः कस्या अपि गुह्याङ्गविषय उन्मादो भवति न रूप-लावण्याद्यपेक्षः ततः 'खरकादीनां' द्व्यक्षरकप्रभृतीनां 'विकटं' मद्यं पाययित्वा प्रसुप्तीकृतानां पूतिमद्योद्गालखरण्टितसर्वशरीराणामत 10 एव मक्षिकाभिणिभिणायमानानां "तद्दायणे" त्ति तस्य—गुह्याङ्गस्य मद्योद्गालादिना बीभत्सीभूतस्य दर्शना क्रियते। तच्च दृष्ट्वा तस्या आर्यिकाया विरागो भवेत् ततः प्रगुणीभवति ॥ ६२६७ ॥

सूत्रम्—

उवसग्गपत्तं निग्गंथिं निग्गंथे गिण्हमाणे वा २ नातिक्कमइ १४ ॥

15 अस्य सम्बन्धमाह—

मोहेण पित्ततो वा, आतासंवेतिओ समक्खाओ ।
एसो उ उवस्सग्गो, अयं तु अण्णो परसमुत्थो ॥ ६२६८ ॥

'मोहेन' मोहनीयोदयेनेत्यर्थः 'पित्ततो वा' पित्तोदयेन य उन्मत्तः सः 'आत्मसंवेदिकः' आत्मनैवात्मनो दुःखोत्पादकः समाख्यातः, यच्चात्मनैवात्मदुःखोत्पादनमेष आत्मसंवेदनीय 20 उपसर्गः। ततः पूर्वमात्मसंवेदनीय उपसर्ग उक्तः। तत उपसर्गाधिकारादयमन्यः परसमुत्थ उपसर्गोऽनेन प्रतिपाद्यत इति ॥ ६२६८ ॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—सा च प्राग्वत् ॥ तत्रोपसर्गप्रतिपादनार्थमाह—

तिविहे य उवस्सग्गे, दिव्वे माणुस्सए तिरिक्खे य ।
दिव्वे य पुव्वभणिए, माणुस्से आभिओग्गे य ॥ ६२६९ ॥

25 त्रिविधः खलु परसमुत्थ उपसर्गः। तद्यथा—दैवो मानुष्यकस्तैरश्चश्च। तत्र 'दैवः' देवकृतः 'पूर्वम्' अनन्तरसूत्रस्याधस्ताद् भणितः, 'मानुष्यः पुनः' मनुष्यकृतः 'आभियोग्यः' विद्याद्यभियोगजनितस्तावद् भण्यते ॥ ६२६९ ॥

विज्जाए मंतेण व, चुण्णेण व जोतिया अणप्पवसा ।
अणुसासणा लिहावण, खमए मधुरा तिरिक्खाती ॥ ६२७० ॥

---

१ उन्मत्ततारूप उपसर्गः सः 'आत्मसंवेदिकः' आत्मसंवेदनीयनामा समाख्यातः। इदमुक्तं भवति—इह किल दैव-मानुष्यक-तैरश्चा-ऽऽत्मसंवेदनीयभेदात् चतुर्विधा उपसर्गा भवन्ति। ततः पूर्वमात्म° कां० ॥

विद्यया वा मन्त्रेण वा चूर्णेन वा 'योजिता' सम्बन्धिता सती काचिदनात्मवशा भवेत् तत्र 'अनुशासना' इति येन रूपलुब्धेन विद्यादि प्रयोजितं तस्यानुशिष्टिः क्रियते, यथा—एषा तपस्विनी महासती, न वर्तते तव तां प्रति ईदृशं कर्तुम्, एवंकरणे हि प्रभूततरपापोपचयसम्भव इत्यादि । अथैवमनुशिष्टोऽपि न निवर्तते तर्हि तस्य तां प्रतिविद्यया विद्वेषणमुत्पाद्यते । अथ नास्ति तादृशी प्रतिविद्या ततः "लिहावण" त्ति तस्य सागारिकं विद्याप्रयोगतस्तस्याः पुरत 5 आलेख्याप्यते येन सा तद् दृष्ट्वा 'तस्य सागारिकमिदमिति बीभत्सम्' इति जानाना विरागमुपपद्यते । "खमए महुरा" इति मथुरायां श्रमणीप्रभृतीनां बोधिकस्तेनकृत उपसर्गोऽभवत् तं क्षपको निवारितवान्, एषोऽपि मानुष उपसर्गः । तैरश्चमाह—"तिरिक्खाइ" त्ति तिर्यञ्चो ग्रामेयका आरण्यका वा श्रमणीनामुपसर्गान् कुर्वन्ति ते यथाशक्ति निराकर्तव्याः ॥ ६२७० ॥

साम्प्रतमेनामेव गाथां विवरीषुराह— 10

विज्जादऽभिओगो पुण, एसो माणुस्सओ य दिव्वो य ।
तं पुण जाणंति कहं, जति णामं गेण्हए तस्स ॥ ६२७१ ॥

विद्यादिभिः 'अभियोगः' अभियुज्यमानता । एष पुनः 'द्विविधः' द्विप्रकारः, तद्यथा—मानुषिको दैवश्च । तत्र मनुष्येण कृतो मानुषिकः । देवस्यायं तेन कृतत्वाद् दैवः । तत्र देवकृतो मनुष्यकृतो वा विद्यादिभिरभियोग एष एव यत् तस्मिन् दूरस्थितेऽपि तत्प्रभावात् सा 15 तथारूपा उन्मत्ता जायते । अथ 'तं' विद्याद्यभियोगं दैवं मानुषिकं वा कथं जानन्ति ? । सूरिराह—तयोर्देव-मानुषयोर्मध्ये यस्य नाम साऽभियोजिता गृह्णाति तत्कृतः स विद्याद्यभियोगो ज्ञेयः ॥ ६२७१ ॥ साम्प्रतं "अणुसासणा लिहावण" इत्येतद् व्याख्यानयति—

अणुसासियम्मि अठिए, विद्देसं देंति तह वि य अठंते ।
जक्खीए कोवीणं, तीसे पुरओ लिहावेंति ॥ ६२७२ ॥ 20

येन पुरुषेण विद्यादि अभियोजितं तस्यानुशासना क्रियते । अनुशासितेऽप्यस्थिते विद्याप्रयोगतस्तां विवक्षितां साध्वीं प्रति तस्य विद्याद्यभियोक्तुर्विद्वेषं 'ददति' उत्पादयन्ति वृषभाः । तथापि च तस्मिन् अतिष्ठति 'यक्ष्या' शुन्या तदीयं कौपीनं तस्याः पुरतो विद्याप्रयोगतो लेहयन्ति येन सा तद् दृष्ट्वा तस्येदं सागारिकमिति जानाना विरज्यते ॥ ६२७२ ॥

सम्प्रति प्रतिविद्याप्रयोगे दृढादरताख्यापनार्थमाह—[3] 25

विसस्स विसमेवेह, ओसहं अग्गिमग्गिणो ।
मंतस्स पडिमंतो उ, दुज्जणस्स विवज्जणं ॥ ६२७३ ॥

विषस्यौषधं विषमेव, अन्यथा विषानिवृत्तेः । एवमग्नेर्भूतादिप्रयुक्तस्यौषधमग्निः । मन्त्रस्य प्रतिमन्त्रः । दुर्जनस्यौषधं 'विवर्जनं' ग्राम-नगरपरित्यागेन परित्यागः । ततो विद्याद्यभियोगे साधु-साध्वीरक्षणार्थं प्रतिविद्यादि प्रयोक्तव्यमिति ॥ ६२७३ ॥ 30

जइ पुण होज्ज गिलाणी, णिरुब्भमाणी उ तो सें तेइच्छं ।

---

१ एतदनन्तरं ग्रन्थाग्रम्—९००० कां० ॥ २ °त् स तथारूप उन्मत्तो जाय° कां० विना ॥
३ दृढतरता° डे० मो० ले० ॥

संवरियमसंवरिया, उवालभंते णिसिं वसभा ॥ ६२७४ ॥

यदि पुनर्विद्याद्यभियोजिता तदभिमुखं गच्छन्ती निरुध्यमाना ग्लाना भवति ततः "से" 'तस्याः' साध्व्याश्चिकित्सां 'संवृताः' केनाप्यलक्ष्यमाणाः कुर्वन्ति । तथा 'असंवृताः' येन विद्याद्यभियोजितं तस्य प्रत्यक्षीभूता वृषभाः 'निशि' रात्रौ तं उपालभन्ते भेषयन्ति पिट्टयन्ति 5 च तावद् यावद् असौ तां मुञ्चतीति ॥ ६२७४ ॥ "खमए महुर" त्ति अस्य व्याख्यानमाह—

थूभमह सड्डिसमणी, बोहिय हरणं तु णिवसुताऽऽतावे ।
मज्झेण य अक्कंदे, कयम्मि जुद्धेण मोएति ॥ ६२७५ ॥

महुरानयरीए थूभो देवनिम्मितो । तस्स महिमानिमित्तं सड्ढीतो समणीहिं समं निग्गयातो । रायपुत्तो य तत्थ अदूरे आयावंतो चिट्ठइ । ताओ सड्ढी-समणीओ बोहिएहिं गहियाओ तेणं-10 तेणं आणियाओ । ताहिं तं साहुं दट्ठूणं अक्कंदो कओ । तओ रायपुत्तेण साहुणा जुद्धं दाऊण मोइयाओ ॥

अक्षरगमनिका त्वियम्—स्तूपस्य 'महे' महोत्सवे श्राद्धिकाः श्रमणीभिः सह निर्गताः । तासां 'बोधिकैः' चौरैर्हरणम् । नृपसुतश्च तत्रादूरे आतापयति । बोधिकैश्च तास्तस्य मध्येन नीयन्ते । ताभिश्च तं दृष्ट्वाऽऽक्रन्दे कृते स युद्धेन तेभ्यस्ता मोचयति ॥ ६२७५ ॥

15 उक्तो मानुषिक उपसर्गः । सम्प्रति तैरश्चमाह—

गामेणाऽऽरण्णेण व, अभिभूतं संजतिं तु तिरिगेणं ।
थद्धं पकंपियं वा, रक्खेज्ज अरक्खणे गुरुगा ॥ ६२७६ ॥

ग्राम्येणाऽऽरण्येन वा तिरश्चाऽभिभूतां संयतीं यदि वा 'स्तब्धां' तद्भयात् स्तम्भीभूतां 'प्रकम्पितां वा' तद्भयप्रकम्पमानशरीरां रक्षेत् । यदि पुनर्न रक्षति सत्यपि बले ततोऽरक्षणे 20 प्रायश्चित्तं 'गुरुकाः' चत्वारो गुरुका मासाः ॥ ६२७६ ॥

सूत्रम्—

साहिगरणं निग्गंथिं निग्गंथे गिण्हमाणे वा २ नातिक्कमइ १५ ॥

अस्य सूत्रस्य सम्बन्धमाह—

25 **अभिभवमाणो समणिं, परिग्गहो वा सें वारिते कलहो ।**
किं वा सति सत्तीए, होइ सपक्खे उविक्खाए ॥ ६२७७ ॥

'श्रमणीं' साध्वीमभिभवन्[1] गृहस्थो यदि वा "से" 'तस्य' गृहस्थस्य 'परिग्रहः' परिजनः, स चाऽभिभवन् वारितः कलहं श्रमण्या सार्द्धं कुर्यात् ततो य उपशामनालब्धिमान् साधुस्तेन कलह उपशमयितव्यः, न पुनरुपेक्षा विधेया । कुतः ? इत्याह—किं वा सत्यां शक्तौ 'स्वपक्षे' 30 स्वपक्षस्योपेक्षया ? नैव किञ्चिदिति भावः । केवलं स्वशक्तिनैष्फल्यमुपेक्षानिमित्तप्रायश्चित्तापत्तिश्च भवति, तस्मादवश्यं स्वशक्तिः परिस्फोरणीया । एतत्प्रदर्शनार्थमधिकृतसूत्रमारभ्यते ॥६२७७॥

---

१ °न् पूर्वसूत्रोक्तनीत्या उपसर्गयन् गृह° कां० ॥

अस्य व्याख्या प्राग्वत् ॥ अत्र भाष्यम्—

उप्पण्णे अहिगरणे, ओसमणं दुविहऽतिक्कमं दिस्स ।
अणुसासण भेस निरुंभणा य जो तीएँ पडिपक्खो ॥ ६२७८ ॥

संयत्या गृहस्थेन सममधिकरणे उत्पन्ने द्विविधमतिक्रमं दृष्ट्वा तस्याधिकरणस्य व्यवशमनं कर्तव्यम् । किमुक्तं भवति ?—स गृहस्थोऽनुपशान्तः सन् तस्याः संयत्याः संयमभेदं जीवित- 5 भेदं चेति द्विविधमतिक्रमं कुर्यात् तत उपशमयितव्यमधिकरणम् । कथम् ? इत्याह—यः 'तस्याः' संयत्याः 'प्रतिपक्षः' गृहस्थस्तस्य प्रथमतः कोमलवचनैरनुशासनं कर्तव्यम्, तथाऽप्य- तिष्ठति 'भीषणं' भापनं कर्तव्यम्, तथाऽप्यभिभवतो 'निरुम्भणं' यस्य या लब्धिस्तेन तया निवारणं कर्तव्यम् ॥ ६२७८ ॥

सूत्रम्— 10

सपायच्छित्तं निग्गंथिं निग्गंथे गिण्हमाणे वा २ नातिक्कमइ १६ ॥

अस्य सम्बन्धमाह—

अहिगरणम्मि कयम्मि, खामिय समुवट्ठिताए पच्छित्तं ।
तप्पढमताए भएणं, होति किलंता व वहमाणी ॥ ६२७९ ॥ 15

अधिकरणे कृते क्षामिते च तस्मिन् समुपस्थितायाः प्रायश्चित्तं दीयते, ततः **साधिकरण- सूत्रानन्तरं प्रायश्चित्तसूत्रमुक्तम्** ॥

अस्य व्याख्या—प्राग्वत् ॥

सा सप्रायश्चित्ता 'तत्प्रथमतायां' प्रथमतः प्रायश्चित्ते दीयमाने 'भयेन' 'कथमहमेतत् प्रायश्चित्तं वक्ष्यामि ?' इत्येवंरूपेण विषण्णा भवेत्, यदि वा प्रायश्चित्तं वहन्ती तपसा क्लान्ता 20 भवेत् ॥ ६२७९ ॥ तत्रेयं यतना—

पायच्छित्ते दिण्णे, भीताएँ विसज्जणं किलंताए ।
अणुसट्ठि वहंतीए, भएण खित्ताइ तेइच्छं ॥ ६२८० ॥

प्रायश्चित्ते दत्ते यदि बिभेति ततस्तस्या भीतायाः क्लान्तायाश्च विसर्जनम्, प्रायश्चित्तं मुत्कलं क्रियत इत्यर्थः । अथ वहन्ती क्लाम्यति ततस्तस्या वहन्त्या अनुशिष्टिर्दीयते, यथा—मा भैषीः, 25 बहु गतम्, स्तोकं तिष्ठति, यदि वा वयं साहाय्यं करिष्याम इति । अथैवमनुशिष्यमाणाऽपि भयेन क्षिप्तचित्ता भवति ततस्तस्याः 'चैकित्स्यं' चिकित्सायाः कर्म कर्तव्यम् ॥ ६२८० ॥

सूत्रम्—

भत्त-पाणपडियाइक्खियं निग्गंथिं निग्गंथे गिण्हमाणे वा २ नातिक्कमइ १७ ॥ 30

अस्य सूत्रस्य सम्बन्धमाह—

पच्छित्तं इत्तिरिओ, होइ तवो वण्णिओ य जो एस ।
आवकथितो पुण तवो, होति परिण्णा अणसणं तु ॥ ६२८१ ॥

'प्रायश्चित्तं' प्रायश्चित्तरूपं यद् एतत् तपोऽनन्तरसूत्रे वर्णितम् एतत् तप इत्वरं भवति, यत् पुनः परिज्ञारूपं तपोऽनशनं तद् यावत्कथिकम्, तत इत्वरतपःप्रतिपादनानन्तरं यावत्क-5 थिकतपःप्रतिपादनार्थमधिकृतं सूत्रम् ॥ ६२८१ ॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—प्राग्वत् । नवरम्—भक्तं च पानं च भक्त-पाने ते प्रत्याख्याते यया सा तथोक्ता । क्तान्तस्य परनिपातः सुखादिदर्शनात् ॥ अत्र भाष्यम्—

अट्ठं वा हेउं वा, समणीणं विरहिते कहेमाणो ।
मुच्छाएँ विपडिताए, कप्पति गहणं परिण्णाए ॥ ६२८२ ॥

10 'श्रमणीनाम्' अन्यासां साध्वीनां 'विरहिते' अशिवादिभिः कारणैरभावे एकाकिन्या आर्यिकाया भक्त-पानप्रत्याख्यातायां अर्थं वा हेतुं वा कथयतो निर्ग्रन्थस्य यदि सा मूर्च्छया विपतेत्, ततो मूर्च्छया विपतितायास्तस्याः "परिण्णाए" त्ति 'परिज्ञायाम्' अनशने सति कल्पते ग्रहणम्, उपलक्षणत्वाद् अवलम्बनं वा कर्तुम् ॥ ६२८२ ॥ इदमेव व्याचष्टे—

गीतऽज्जाणं असती, सव्वाऽसतीए व कारण परिण्णा ।
15 **पाणग-भत्त समाही, कहणा आलोत धीरवणं ॥ ६२८३ ॥**

गीतार्थानामार्यिकाणाम् 'असति' अभावे यदि वाऽशिवादिकारणतः सर्वासामपि साध्वीनामभावे एकाकिन्या जातया 'परिज्ञा' भक्तप्रत्याख्यानं कृतम्, ततस्तस्याः कृतभक्त-पानप्रत्याख्यानायाः सीदन्त्या योग्यपानकप्रदानेन चरमेप्सितभक्तप्रदानेन च समाधिरुत्पादनीयः । 'कथनां'[1] धर्मकथना यथाशक्ति स्वशरीरानाबाधया कर्त्तव्या । तथा 'आलोकम्' आलोचनां सा 20 दापयितव्या । यदि कथमपि चिरजीवनेन भयमुत्पद्यते, यथा—नाद्यापि म्रियते, किमपि भविष्यति इति न जानीम इति; तस्या धीरापना कर्तव्या ॥ ६२८३ ॥

जति वा ण णिव्वहेज्जा, असमाही वा वि तम्मि गच्छम्मि ।
करणिज्जं अण्णत्थ वि, ववहारो पच्छ सुद्धा वा ॥ ६२८४ ॥

यदि वा प्रबलबुभुक्षावेदनीयोदयतया कृतभक्त-पानप्रत्याख्याना सा न निर्वहेत्, न याव-25 त्कथिकमनशनं प्रतिपालयितुं क्षमा इति यावत्, असमाधिर्वा तस्मिन् गच्छे तस्या वर्तते ततोऽन्यत्र नीत्वा यद् उचितं तत् तस्याः करणीयमिति । अथ पश्चादनशनप्रत्याख्यानभङ्गविषयस्तस्याः 'व्यवहारः' प्रायश्चित्तं दातव्यः । अथ स्वगच्छासमाधिमात्रेणान्यत्र गता ततः सा मिथ्यादुष्कृतप्रदानमात्रेण शुद्धेति ॥ ६२८४ ॥

सूत्रम्—

30 **अट्ठजायम्मि निग्गंथिं निग्गंथे गिण्हमाणे वा अवलंबमाणे वा नाइक्कमइ १८ ॥**

---

१ °नां' यथाशक्ति स्वशरीरानाबाधया धर्मकथा तस्याः पुरतः कथनीया । तथा कां० ॥

अस्य सूत्रस्य सम्बन्धमाह—

वुत्तं हि उत्तमट्ठे, पडियरणट्ठा व दुक्खरे दिक्खा ।
इंती व तस्समीवं, जति हीरति अट्ठजायमतो ॥ ६२८५ ॥

उक्तं 'हि' यस्मात् पूर्वं **पञ्चकल्पे**—'उत्तमार्थे' उत्तमार्थ—प्राक्सूत्राभिहितं प्रतिपत्तुकामस्य "दुक्खरे" त्ति व्यक्षरस्य द्व्यक्षरिकाया वा दीक्षा दातव्या, यदि वा 'प्रतिचरणाय' 'एषा दीक्षिता 5 मां ग्लानां सतीं प्रतिचरिष्यति' इतिनिमित्तं व्यक्षरिका दीक्षिता भवति, सा च पश्चाद् दायकैः प्रतिगृह्येत तस्या वोत्तमार्थप्रतिपन्नाया मूलं 'आयान्ती' आगच्छन्ती बोधिकादिना स्तेनेन यदि ह्रियते अतस्तां प्रति **अर्थजातसूत्रावकाशः** ॥ ६२८५ ॥

अनेन सबन्धेनायातस्यास्य व्याख्या—सा च प्राग्वत् ॥ साम्प्रतमर्थजातशब्दव्युत्पत्ति-प्रतिपादनार्थमाह— 10

अट्ठेण जीएँ कज्जं, संजातं एस अट्ठजाता तु ।
तं पुण संजमभावा, चालिज्जंती समवलंबे ॥ ६२८६ ॥

'अर्थेन' अर्थितया सञ्जातं कार्यं यया यद्वा अर्थेन—द्रव्येण जातम्—उत्पन्नं कार्यं यस्याः सा अर्थजाता, गमकत्वादेवमपि समासः । उपलक्षणमेतत्, तेनैवमपि व्युत्पत्तिः कर्तव्या—अर्थः—प्रयोजनं जातोऽस्या इत्यर्थजाता । कथं पुनरस्या अवलम्बनं क्रियते ? इत्याह—'तां 15 पुनः' प्रथमव्युत्पत्तिसूचितां संयमभावात् चाल्यमानां द्वितीय-तृतीयव्युत्पत्तिपक्षे तु द्रव्याभावेन प्रयोजनानिष्पत्त्या वा सीदन्तीं 'समवलम्बेत' साहाय्यकरणेन सम्यग् धारयेत्, उपलक्षणत्वाद् गृह्णीयादपि ॥ ६२८६ ॥ अथ **निर्युक्तिकारो** येषु स्थानेषु संयमस्थिताया अप्यर्थजातमुत्पद्यते तानि दर्शयितुमाह—

सेवगभज्जा ओमे, आवण्ण अणत्त बोहिये तेणे । 20
एतेहि अट्ठजातं, उप्पज्जति संजमठिताए ॥ ६२८७ ॥

'सेवकभार्यायां' सेवकभार्याविषयम्, एवम् 'अवमे' दुर्भिक्षे, "आवण्णे"ति दासत्वप्राप्तायाम्, "अणत्ते"ति ऋणार्तायां परं विदेशगमनादुत्तमर्णेनानाप्तायाम्, तथा 'बोधिकाः' अनार्या म्लेच्छाः 'स्तेनाः' आर्यजनपदजाता अपि शरीरापहारिणस्तैरपहरणे च, एतैः कारणैरर्थजातं संयमस्थिताया अपि उत्पद्यते । एष **निर्युक्तिगाथासङ्क्षेपार्थः** ॥ ६२८७ ॥ 25

साम्प्रतमेनामेव विवरीषुः **सेवकभार्याद्वारमाह**—

पियविप्पयोगदुहिया, णिक्खंता सो य आगतो पच्छा ।
अगिलाणिं च गिलाणिं, जीवियकिच्छं विसज्जेति ॥ ६२८८ ॥

कोऽपि राजादीनां सेवकः, तेन राजसेवाऽव्यग्रेणात्मीया भार्या परिष्ठापिता, ततः सा प्रिय-विप्रयोगदुःखिता 'निष्क्रान्ता' तथारूपाणां स्थविराणामन्तिके प्रव्रजिता, स च पुरुषः पश्चात् 30 तयाऽर्थी जातस्ततस्तस्याः सकाशमागतः पुनरपि तां मार्गयति ततः को विधिः ? इत्याह—अग्लानामपि तां 'ग्लानां' ग्लानवेषां कुर्वन्ति, विरेचनादीनि च तस्याः क्रियन्ते, ततोऽसौ

१ जीत क° ताभा० ॥ २ °स्याः ग्रहणमवलम्बनं वा क्रि° कां० ॥

'जीवितकृच्छ्रां' 'कृच्छ्रेणेयं जीवति' इतिबुद्ध्या विसर्जयति ॥ ६२८८ ॥

अत्रैव द्वितीयमुदाहरणमाह—

अपरिग्गहियागणियाऽविसज्जिया सामिणा विणिक्खंता ।
बहुगं मे उवउत्तं, जति दिज्जति तो विसज्जेमि ॥ ६२८९ ॥

5 न विद्यते परिग्रहः कस्यापि यस्याः साऽपरिग्रहा, सा चासौ गणिका चापरिग्रहगणिका, सा येन सममुषितवती स देशान्तरं गतः, ततस्तेन अविसर्जिता सती 'विनिष्क्रान्ता' प्रव्रजिता । अन्यदा च स स्वामी समागतो भणति—बहुकं 'मे' मदीयं द्रव्यमनया 'उपयुक्तम्' उपयोगं नीतम्, भुक्तमित्यर्थः, तद् यदि दीयते ततो विसृजामि ॥ ६२८९ ॥

एवमुक्ते यत् कर्तव्यं स्थविरैस्तदाह—

10 **सरभेद वण्णभेदं, अंतद्धाणं विरेयणं वा वि ।**
वरधणुग पुंस्सभूती, गुलिया सुहुमे य झाणम्मि ॥ ६२९० ॥

गुटिकाप्रयोगतस्तस्याः स्वरभेदं वर्णभेदं वा स्थविराः कुर्वन्ति यथा स तां न प्रत्यभिजानाति । यदि वा ग्रामान्तरादिप्रेषणेन 'अन्तर्धानं' व्यवधानं क्रियते । अथवा तथाविधौषधप्रयोगतो विरेचनं कार्यते येन सा ग्लानेव लक्ष्यते, ततः 'एषा कृच्छ्रेण जीवति' इति ज्ञात्वा स तां 15 मुञ्चति । अथवा शक्तौ सत्यां यथा ब्रह्मदत्तहिण्ड्यां धनुपुत्रेण वरधनुना मृतकवेषः कृतस्तथा निश्चला निरुच्छ्वासा सूक्ष्ममुच्छ्वसनं तिष्ठति येन मृतेति ज्ञात्वा तेन विसृज्यते । यदि वा यथा पुष्यभूतिराचार्यः सूक्ष्मे ध्याने कुशलः सन् ध्यानवशात् निश्चलः निरुच्छ्वासः स्थितः (आवश्यके प्रतिक्रमणाध्ययने योगसङ्ग्रहेषु निर्यु० गा० १३१७ हारि० टीका पत्र ७२२) तथा तयाऽपि सूक्ष्मध्यानकुशलया सत्या तथा स्थातव्यं यथा स मृतेत्यवगम्य मुञ्चति ॥ ६२९० ॥

20 एतेषां प्रयोगाणामभावे—

अणुसिट्ठिमणुवरंतं, गमेंति णं मित्त-णातगादीहिं ।
एवं पि अठायंते, करेंति सुत्तम्मि जं वुत्तं ॥ ६२९१ ॥

अनुशिष्टिस्तस्य दीयते । तया यदि नोपरतस्ततस्तस्य पुरुषस्य यानि मित्राणि ये च ज्ञातयस्तैः आदिशब्दाद् अन्यैश्च तथाविधैः स्थविरास्तं 'गमयन्ति' बोधयन्ति येन स तस्या मुत्क-25 लनं करोति । एवमप्यतिष्ठति तस्मिन् यदुक्तं सूत्रे तत् कुर्वन्ति । किमुक्तं भवति ?—अर्थजातमपि दत्त्वा सा तस्मात् पुरुषाद् मोचयितव्या । एतत् तस्याः सूत्रोक्तमवलम्बनं मन्तव्यम् ॥ ६२९१ ॥ गतं सेवकभार्याद्वारम् । अथावमद्वारमाह—

सकुडुंबो मधुराए, णिक्खिविऊणं गयम्मि कालगतो ।
ओमे फिडित परंपर, आवण्णा तस्स आगमणं ॥ ६२९२ ॥

30 मधुरायां नगर्यां कोऽपि वणिक् सकुटुम्बोऽपि प्रविव्रजिषुरव्यक्तां दारिकां मित्रस्य गृहे निक्षिप्य ततः प्रव्रज्यां प्रतिपद्यान्यत्र गतः । गते च तस्मिन् स मित्रभूतः पुरुषः काल-

१ पुस्समित्ते, गु° ताभा० । चूर्णिकृता एष एव पाठ आदृतः । आवश्यकनिर्युक्ति-चूर्णि-वृत्त्यादावप्ययमेव पाठ आदृतोऽस्ति ॥ २ °था आवश्यके योगसङ्ग्रहोक्तः पुष्य° कां० ॥

गतः । ततस्तस्य कालगमनानन्तरं 'अवमे' दुर्भिक्षे जाते सति तदीयैः पुत्रैरनाद्रियमाणा सा दारिका ततो गृहात् 'स्फिटिता' परिभ्रष्टा सती परम्परकेण दासत्वमापन्ना । तस्य च पितुर्यथाविहारक्रमं विहरतस्तस्यामेव मथुरायामागमनम् । तेन च तत् सर्वं ज्ञातम् ॥ ६२९२ ॥

सम्प्रति तन्मोचने विधिमाह—

अणुसासण कह ठवणं, भेसण ववहार लिंग जं जत्थ । 5
दूराऽऽभोग गवेसण, पंथे जयणा य जा जत्थ ॥ ६२९३ ॥

पूर्वमनुशासनं तस्य कर्तव्यम् । ततः कथाप्रसङ्गेन कथनं स्थापत्यापुत्रादेः करणीयम् । एवमप्यतिष्ठति यद् निष्क्रामता स्थापितं द्रव्यं तद् गृहीत्वा समर्पणीयम् । तस्याभावे निजकानां तस्य वा 'भेषणं' भापनमुत्पादनीयम् । यदि वा राजकुले गत्वा व्यवहारः कार्यः । एवमप्यतिष्ठति यद् यत्र लिङ्गं पूज्यं तत्र तत् परिगृह्य सा मोचनीया । तस्यापि प्रयोगस्याभावे 10 दूरेण—उच्छिन्नस्वामिकतया दूरदेशव्यवधानेन वा यद् निधानं तस्याभोगः कर्तव्यः । तदनन्तरं तस्य 'गवेषणं' साक्षान्निरीक्षणं करणीयम् । गवेषणाय च गमने 'पथि' मार्गे यतना यथा ओघनिर्युक्तौ उक्ता तथा कर्त्तव्या । या च यत्र यतना साऽपि तत्र विधेया यथासूत्रमिति द्वारगाथासङ्क्षेपार्थः ॥ ६२९३ ॥ साम्प्रतमेनामेव विवरीषुः प्रथमतोऽनुशासन-कथनद्वारे प्राह—

निच्छिण्णा तुज्झ घरे, इसिकण्णा मुंच होहिती धम्मो । 15
सेहोवट्ठ विचित्तं, तेण व अण्णेण वा णिहितं ॥ ६२९४ ॥

एषा ऋषिकन्या तव गृहेऽवमादिकं समस्तमपि निस्तीर्णा अधुना व्रतग्रहणार्थमुपतिष्ठते अतो मुञ्चैनाम्, तव भूयान् धर्मो भविष्यति । एतावता गतमनुशासनद्वारम् । तदनन्तरं कथनमिति स्थापत्यापुत्रकथा कथनीया—यथा स स्थापत्यापुत्रो व्रतं जिघृक्षुर्वासुदेवेन महतरं निष्क्रमणमहिम्ना निष्काम्य पार्श्वस्थितेन व्रतग्रहणं कारितः एवं युष्माभिरपि कर्तव्यम् ॥ 20

अथ स्थापितद्वारम्—"सेहोवट्ठ" इत्यादि । शैक्षः कश्चिदुपस्थितः तस्य यद् 'विचित्रं' बहुविधमर्थजातं क्वापि स्थापितमस्ति, यदि वा गच्छान्तरे यः कोऽपि शैक्ष उपस्थितः तस्य हस्ते यद् द्रव्यमवतिष्ठते तद् गृहीत्वा तस्मै दीयते । अथवा 'तेनैव' पित्रा 'अन्येन वा' साधुना निष्क्रामता यद् द्रव्यजातं क्वचित् पूर्वं 'निहितं' स्थापितमस्ति तद् आनीय तस्मै दीयते ॥ ६२९४ ॥ तदभावे को विधिः ? इत्याह— 25

नीयल्लगाण तस्स व, भेसण ता राउले सतं वा वि ।
अविरिक्का मो अम्हे, कहं व लज्जा ण तुज्झं ति ॥ ६२९५ ॥

'निजकानाम्' आत्मीयानां स्वजनानां भेषणं कर्तव्यम्, यथा—वयं 'अविरिक्ताः' अविभक्तरिक्था वर्तामहे ततो मोचयत मदीयां दुहितरम्, कथं वा युष्माकं न लज्जा अभूत् यद् एवं मदीया पुत्रिका दासत्वमापन्नाऽद्यापि धृता वर्तते ? । अथवा येन गृहीता वर्तते तस्य भेषणं 30 विधेयम्, यथा—यदि मोचयसि तर्हि मोचय, अन्यथा भवतस्तं शापं दास्यामि येन न त्वं नेदं वा तव कुटुम्बकमिति । एवं भेषणेऽपि कृते यदि न मुञ्चति यदि वा ते स्वजना न

---

१ °चनावि° भा० ॥ २ तुम्हं ति ताभा० ॥ ३ यदि मुञ्चसि ततो मुञ्च, अन्य° कां० ॥

किमपि प्रयच्छन्ति तदा स्वयं राजकुले गत्वा निजकैः सह व्यवहारः करणीयः, व्यवहारं च कृत्वा भाग आत्मीयो गृहीत्वा तस्मै दातव्यः । यद्वा स एव राजकुले व्यवहारेणाकृष्यते, तत्र च गत्वा वक्तव्यम्, यथा—इयमृषिकन्या व्रतं जिघृक्षुः केनापि कपटेन धृताऽनेन वर्तते, यूयं च धर्मव्यापारनिषण्णाः, ततो यथा इयं धर्ममाचरति यथा चामीषामृषीणां समाधिरुपजायते 5 तथा यतध्वमिति ॥ ६२९५ ॥ ततः—

नीयल्लएहि तेण व, सद्धिं ववहार कातु मोदणता ।
जं अंचितं व लिंगं, तेण गवेसित्तु मोदेइ ॥ ६२९६ ॥

एवं निजकैस्तेन वा सार्द्धं व्यवहारं कृत्वा तस्या मोचना कर्तव्या । अस्यापि प्रकारस्याभावे यद् यत्र लिङ्गमर्चितं तत् परिगृह्णाति । ततः 'तेन' अर्चितलिङ्गेन तल्लिङ्गधारिणां मध्ये ये 10 महान्तस्तत्पार्श्वाद् गवेषयित्वा तां मोचयन्ति ॥ ६२९६ ॥

अथ "दूराऽऽभोगे"त्यादिव्याख्यानार्थमाह—

पुट्ठा व अपुट्ठा वा, चुतसामिणिहिं कहिंति ओहादी ।
घेत्तूण जावदट्ठं, पुणरवि सारक्खणा जतणा ॥ ६२९७ ॥

यदि वा 'अवध्यादयः' अवधिज्ञानिनः, आदिशब्दाद् विशिष्टश्रुतज्ञानिपरिग्रहः, पृष्टा वा 15 अपृष्टा वा तथाविधं तस्य प्रयोजनं ज्ञात्वा 'च्युतस्वामिनिधिम्' उच्छिन्नस्वामिकं निधिं कथयन्ति, तदानीं तेषां तत्कथनस्योचितत्वात् । ततः 'यावदर्थं' यावता प्रयोजनं तावद् गृहीत्वा पुनरपि तस्य निधेः संरक्षणं कर्तव्यम् । प्रत्यागच्छता च यतना विधेया, सा चाग्रे स्वयमेव वक्ष्यते ॥ ६२९७ ॥

सोऊण अट्ठजायं, अट्ठं पडिजग्गती उ आयरिओ ।
20 **संघाडगं च देती, पडिजग्गति णं गिलाणं पि ॥ ६२९८ ॥**

निधिग्रहणाय मार्गे गच्छन्तं तम् 'अर्थजातं' साधुं श्रुत्वा साम्भोगिकोऽसाम्भोगिको वाऽऽचार्योऽर्थं 'प्रतिजागर्ति' उत्पादयति । यदि पुनः तस्य द्वितीयसङ्घाटको न विद्यते ततः सङ्घाटकमपि ददाति । अथ कथमपि स ग्लानो जायते ततस्तं ग्लानमपि सन्तं प्रतिजागर्ति न तूपेक्षते, जिनाज्ञाविराधनप्रसक्तेः ॥६२९८॥ यदुक्तमनन्तरं "यतना प्रत्यागच्छता कर्तव्या" तामाह—

25 **काउं णिसीहियं अट्ठजातमावेदणं गुरुहत्थे ।**
दाऊण पडिक्कमते, मा पेहंता मिया पासे ॥ ६२९९ ॥

यत्रान्यगणे स प्राघूर्णिक आयाति तत्र नैषेधिकीं कृत्वा 'नमः क्षमाश्रमणेभ्यः' इत्यादि कृत्वा च मध्ये प्रविशति, प्रविश्य च यद् अर्थजातं तद् गुरुभ्य आवेदयति, आवेद्य च तदर्थजातं गुरुहस्ते दत्त्वा प्रतिक्रामति । कस्मान्न स्वपार्श्व एव स्थापयति ? इति चेद् अत 30 आह—मा 'प्रेक्षमाणाः' निरीक्षमाणा मृगा इव मृगा अगीतार्थाः क्षुल्लकादयः पश्येयुः, गुरुहस्ते च स्थितं न निरीक्षन्ते, अस्मद्गुरूणां समर्पितमिति विरूपसङ्कल्पाप्रवृत्तेः ॥ ६२९९ ॥

सम्प्रति "जयणा य जा जत्थे"ति तद्व्याख्यानार्थमाह—

सण्णी व सावतो वा, केवतितो दिज्ज अट्ठजायस्स ।

पुव्वुप्पण्ण णिहाणे, कारणजाते गहण सुद्धो ॥ ६३०० ॥

यत्र 'संज्ञी' सिद्धपुत्रः श्रावको वा वर्तते तत्र गत्वा तस्मै स्वरूपं निवेदनीयं प्रज्ञापना च कर्तव्या । ततो यत् तस्य पूर्वोत्पन्नं प्रकटं निधानं तन्मध्यादसौ सिद्धपुत्रादिः प्रज्ञापितः सन् तस्य 'अर्थजातस्य' द्रव्यार्थिनः साधोः कियतोऽपि भागान् दद्यात् । अस्य प्रकारस्याभावे यद् निधानं दूरमवगाढं वर्तते तदपि तेन सिद्धपुत्रादिना उत्खन्य दीयमानमधिकृते कारणजाते 5 गृह्णानोऽपि शुद्धः, भगवदाज्ञया वर्तनात् ॥ ६३०० ॥ गतमवमद्वारम् । इदानीमापन्नाद्वारमाह—

थोवं पि धरेमाणी, कत्थइ दासत्तमेइ अदलंती ।
परदेसे वि य लब्भति, वाणियधम्मे ममेस त्ती ॥ ६३०१ ॥

स्तोकमपि ऋणं शेषं धारयन्ती क्वचिद्देशे काऽपि स्त्री तद् ऋणमददती कालक्रमेण ऋण-वृद्ध्या दासत्वम् 'एति' प्रतिपद्यते । तस्या एवं दासत्वमापन्नायाः स्वदेशे दीक्षा न दातव्या । 10 अथ कदाचित् परदेशे गता सती अज्ञातस्वरूपा अशिवादिकारणतो वा दीक्षिता भवति तत्र वणिजा परदेशे वाणिज्यार्थं गतेन दृष्टा भवेत् तत्रायं किल न्यायः—परदेशेऽपि वणिज आत्मीयं लभ्यं लभन्ते । तत एवं वणिग्धर्मे व्यवस्थिते सति स एवं ब्रूयात्—ममैषा दासी इति न मुञ्चाम्यमुमिति ॥ ६३०१ ॥ तत्र यत् कर्तव्यं तत्प्रतिपादनार्थं द्वारगाथामाह—

नाहं विदेसयाऽऽहरणमादि विज्जा य मंत जोए य । 15
निमित्ते य राय धम्मे, पासंड गणे धणे चेव ॥ ६३०२ ॥

या तव दासत्वमापन्ना वर्तते न साऽहं किन्तु अहमन्यस्मिन् विदेशे जाता, त्वं तु सदृक्ष-तया विप्रलब्धोऽसि । अथ सा प्रभूतजनविदिता वर्तते तत एवं न वक्तव्यं किन्तु **स्थापत्या-पुत्रा**द्याहरणं कथनीयम्, यद्यपि कदाचित् तच्छ्रवणतः प्रतिबुद्धो मुत्कलयति । आदिशब्दाद् गुटिकाप्रयोगतः स्वरभेदादि कर्तव्यमिति परिग्रहः । एतेषां प्रयोगाणामभावे विद्या मन्त्रो योगो 20 वा ते प्रयोक्तव्या यैः परिगृहीतः सन् मुत्कलयति । तेषामप्यभावे 'निमित्तेन' अतीता-ऽनागत-विषयेण राजा उपलक्षणमेतद् अन्यो वा नगरप्रधान आवर्जनीयो येन तत्प्रभावात् स प्रेर्यते । धर्मो वा कथनीयो राजादीनां येन ते आवृत्ताः सन्तस्तं प्रेरयन्ति । एतस्यापि प्रयोगस्याभावे पाषण्डान् सहायान् कुर्यात् । यद्वा यः 'गणः' **सारस्वता**दिको बलवांस्तं सहायं कुर्यात् । तद-भावे दूराऽऽभोगादिना प्रकारेण धनमुत्पाद्य तेन मोचयेत् । एष **द्वारगाथासंक्षेपार्थः**[1] ॥६३०२॥ 25

साम्प्रतमेनामेव गाथां विवरीषुराह—

सारिक्खएण जंपसि, जाया अण्णत्थ ते वि आमं ति ।
बहुजणविण्णायम्मि, थावच्चसुतादिआहरणं ॥ ६३०३ ॥

यदि बहुजनविदिता सा न भवति, यथा—इयं तद्देशजाता इति; तत एवं ब्रूयात्—अहमन्यत्र विदेशे जाता, त्वं तु सादृक्ष्येण विप्रलब्ध एवमसमञ्जसं जल्पसि । एवमुक्ते 30 तेऽपि तत्रत्याः 'आमम्' एवमेतद् यथेयं वदतीति साक्षिणो जायन्ते । अथ तद्देशजाततया सा बहुजनविज्ञाता ततस्तस्यां बहुजनविज्ञातायां पूर्वोक्तं न वक्तव्यं किन्तु **स्थापत्यापुत्रा**द्याहरणं

---

१ °**समासार्थः** डे० ॥

प्रतिबोधनाय कथनीयम् ॥ ६३०३ ॥ "आहरणमाई" इत्यत्रादिशब्दव्याख्यानार्थमाह—

सरभेद वण्णभेदं, अंतद्धाणं विरेयणं वा वि ।
वरधणुग पुस्सभूती, गुलिया सुहुमे य झाणम्मि ॥ ६३०४ ॥

गुटिकाप्रयोगतस्तस्याः स्वरभेदं वर्णभेदं वा कुर्यात् । यद्वा अन्तर्द्धानं ग्रामान्तरप्रेषणेन वा 5 व्यवधानम् । विरेचनं वा ग्लानतोपदर्शनाय कारयितव्या येन 'कृच्छ्रेणैषा जीवति' इति ज्ञात्वा विसर्जयति । यदि वा वरधनुरिव गुटिकाप्रयोगतः पुष्यभूतिराचार्य इव वा सूक्ष्मध्यानवशतो निश्चला निरुच्छ्वासा तथा स्याद् यथा मृतेति ज्ञात्वा परित्यज्यते । विद्या-मन्त्र-प्रयोगा वा तस्य प्रयोक्तव्या येन तैरभियोजितो मुत्कलयति । एतेषां प्रयोगाणामभावे राजा निमित्तेन धर्मकथया वाऽऽवर्त्यते, ततस्तस्य प्रभावेण स प्रेर्यते ॥ ६३०४ ॥

10 अस्याऽपि प्रकारस्याभावे को विधिः ? इत्याह—

पासंडे व सहाए, गिण्हति तुज्झं पि एरिसं अत्थि ।
होहामो य सहाया, तुब्भ वि जो वा गणो बलितो ॥ ६३०५ ॥

पाषण्डान् वा सहायान् गृह्णाति । अथ ते सहाया न भवन्ति तत इदं तान् प्रति वक्तव्यम्—युष्माकमपीदृशं प्रयोजनं भवेद् भविष्यति तदा युष्माकमपि वयं सहाया भविष्यामः । 15 एवं तान् सहायान् कृत्वा तद्बलतः स प्रेरणीयः । यदि वा यो मल्ल-सारस्वतादिको गणो बलीयान् तं सहायं परिगृह्णीयात् ॥ ६३०५ ॥

एएसिं असतीए, संता व जता ण होंति उ सहाया ।
ठवणा दूराभोगण, लिंगेण व एसिउं देंति ॥ ६३०६ ॥

'एतेषां' पाषण्डानां गणानां वा 'असति' अभावे यदि वा सन्तोऽपि ते सहाया न भवन्ति 20 तदा "ठवण" त्ति निष्क्रामता यद् द्रव्यं स्थापितं तेन सा मोचयितव्या । यदि वा 'दूराभोगनेन' प्रागुक्तप्रकारेणैव अथवा यद् यत्र लिङ्गमर्चितं तेन धनम् 'एषयित्वा' उत्पाद्य ददति तस्मै वरवृषभाः ॥ ६३०६ ॥ गतमापन्नाद्वारम् । अथ ऋणार्तादिद्वाराण्याह—

एमेव अणत्ताए, तवतुलणा णवरि तत्थ णाणत्तं ।
बोहिय-तेणेहि हिते, ठवणादि गवेसणे जाव ॥ ६३०७ ॥

25 'एवमेव' अनेनैव दासत्वापन्नागतेन प्रकारेण 'ऋणार्ताया अपि' प्रभूतं ऋणं धारयन्त्या अन्यदेशे दीक्षिताया मोक्षणे यतना द्रष्टव्या । नवरम्—अत्र धनदानचिन्तायां नानात्वम् । किं तत् ? इत्याह—तपस्तुलना कर्तव्या । तथा बोधिकाः स्तेनाश्च—प्रागुक्तस्वरूपास्तैर्हृताया आर्यिकाया गवेषणं नियमेन कर्तव्यम् । तत्र च कर्तव्येऽनुशासनादिकं तदेव मन्तव्यं यावद् अर्थजातस्य स्थापना तया आदिशब्दाद् निधानस्य दूराभोगनादिप्रयोगेणापि सा मोचयितव्या । 30 अथ ऋणार्तायां या तपस्तुलनोक्ता सा भाव्यते—स द्रव्यं मार्गयन् वक्तव्यः—साधवस्तपोधना अहिरण्य-सुवर्णाः, लोकेऽपि यद् यस्य भाण्डं भवति स तत् तस्मै उत्तमर्णाय ददाति, अस्माकं च पार्श्वे धर्मस्तस्मात् त्वमपि धर्मं गृहाण ॥ ६३०७ ॥ एवमुक्ते स प्राह—

जो णातें कतो धम्मो, तं देउ ण एत्तियं समं तुलइ ।

हाणी जावेगाहं, तावतियं विज्झत्थंभणता ॥ ६३०८ ॥

योऽनया कृतो धर्मस्तं सर्वं मह्यं ददातु । एवमुक्ते साधुभिर्वक्तव्यम्—नैतावद् दद्मः, यतो नैतावत् समं तुलति। स प्राह—एकेन संवत्सरेण हीनं प्रयच्छतु; तदपि प्रतिषेधनीयः । ततो ब्रूयात्—द्वाभ्यां संवत्सराभ्यां हीनं दत्त; तदपि निषेध्यः । एवं तावद् विभाषा कर्तव्या यावद् 'एकेन दिवसेन कृतोऽनया धर्मस्तं प्रयच्छत' ततो वक्तव्यम्—नाभ्यधिकं दद्मः 5 किन्तु यावत् तव गृहीतं मुहूर्तादिकृतेन धर्मेण तोल्यमानं समं तुलति तावत् प्रयच्छामः । एवमुक्ते यदि तोलनाय ढौकते तदा विद्यादिभिस्तुला स्तम्भनीया येन क्षणमात्रकृतेनापि धर्मेण सह न समं तोलयतीति । धर्मतोलनं च धर्माधिकरणिक-नीतिशास्त्रप्रसिद्धमिति ततोऽवसातव्यम् । अथासौ क्षणमात्रकृतस्यापि धर्मस्यालाभात् तपो ग्रहीतुं नेच्छेत् ततो वक्तव्यम्—एषा **वणिग्न्यायेन** शुद्धा ॥ ६३०८ ॥ 10

स प्राह—कः पुनर्वणिग्न्यायो येनैषा शुद्धा क्रियते ? साधवो ब्रुवते—

वत्थाणाऽऽभरणाणि य, सव्वं छड्डेउ एगवत्थेणं ।
पोतम्मि विवण्णम्मि, वाणितधम्मे हवति सुद्धो ॥ ६३०९ ॥

यथा कोऽपि वाणिजः प्रभूतं ऋणं कृत्वा प्रवहणेन समुद्रमवगाढः, तत्र 'पोते' प्रवहणे विपन्ने आत्मीयानि परकीयानि च प्रभूतानि वस्त्राण्याभरणानि चशब्दात् शेषमपि च नाना- 15 विधं क्रयाणकं सर्वं 'छर्दयित्वा' परित्यज्य 'एकवस्त्रेण' एकेनैव परिधानवाससा उत्तीर्णः 'वणिग्धर्मे' वणिग्न्याये 'शुद्धो भवति' न ऋणं दाप्यते । एवमियमपि साध्वी तत्र सत्कमात्मीयं च सारं सर्वं परित्यज्य निष्क्रान्ता संसारसमुद्रादुत्तीर्णा इति वणिग्धर्मेण शुद्धा, न धनिका ऋणमात्मीयं याचितुं लभन्ते, तस्माद् न किञ्चिदत्र तत्राभाव्यमस्तीति करोत्विदानीमेषा स्वेच्छया तपोवाणिज्यम्, पोतपरिभ्रष्टवणिगिव निर्ऋणो वाणिज्यमिति ॥ ६३०९ ॥ 20

सम्प्रत्युपसंहारव्याजेन शिक्षामपवादं चाह—

तम्हा अपरायत्ते, दिक्खेज्ज अणारिए य वज्जेज्जा ।
अद्धाण अणाभोगा, विदेस असिवादिसू दो वी ॥ ६३१० ॥

यस्मात् परायत्तदीक्षणेऽनार्यदेशगमने चैते दोषास्तस्मादपरायत्तान् दीक्षयेत् अनार्यांश्च देशान् बोधिक-स्तेनबहुलान् वर्जयेत् । अत्रैवापवादमाह—"अद्धाण" त्ति अध्वानं प्रतिपन्नस्य 25 ममोपग्रहमेते करिष्यन्तीति हेतोः परायत्तानपि दीक्षयेत्, यदि वाऽनाभोगतः प्रव्राजयेत्, विदेशस्था वा स्वरूपमजानाना दीक्षयेयुः। अशिवादिषु पुनः कारणेषु "दो वि" त्ति 'द्वे अपि' परायत्तदीक्षणा-ऽनार्यदेशगमने अपि कुर्यात्। किमुक्तं भवति ?—अशिवादिषु कारणेषु समुपस्थितेषु परायत्तानपि गच्छोपग्रहनिमित्तं दीक्षयेत्, अनार्यानपि च देशान् विहरेदिति ॥ ६३१० ॥

॥ क्षिप्तचित्तादिप्रकृतं समाप्तम् ॥ 30

परिमन्थप्रकृतम्

सूत्रम्—

छ कप्पस्स पलिमंथू पण्णत्ता, तं जहा—कोक्कुइए संजमस्स पलिमंथू १ मोहरिए सच्चवयणस्स पलि-मंथू २ चक्खुलोलए इरियावहियाए पलिमंथू ३ तिंतिणिए एसणागोयरस्स पलिमंथू ४ इच्छालो-भए मुत्तिमग्गस्स पलिमंथू ५ भिज्जानियाणकरणे मोक्खमग्गस्स पलिमंथू ६। सव्वत्थ भगवता अनियाणया पसत्था १९ ॥

अस्य सूत्रस्य कः सम्बन्धः ? इत्याह—

दप्पेण जो उ दिक्खेति एरिसे एरिसेसु वा विहरे ।
तत्थ धुवो पलिमंथो, को सो कतिभेद संबंधो ॥ ६३११ ॥

'दर्पेण' कारणमन्तरेण य आचार्यः 'ईदृशान्' परायत्तान् दीक्षयति, यो वा 'ईदृशेषु' अनार्येषु देशेषु दर्पतो विहरति, तत्र 'ध्रुवः' निश्चितोऽवश्यम्भावी परिमन्थः, अतः कोऽसौ कतिभेदो वा परिमन्थः ? इत्याशङ्कानिरासाय प्रस्तुतसूत्रारम्भः । एष सम्बन्धः ॥ ६३११ ॥

अहवा सव्वो एसो, कप्पो जो वण्णिओ पलंबादी ।
तस्स उ विवक्खभूता, पलिमंथा ते उ वज्जेज्जा ॥ ६३१२ ॥

'अथवा' इति सम्बन्धस्य प्रकारान्तरद्योतने । य एष षट्स्वपि उद्देशकेषु प्रलम्बादिकः[1] 'कल्पः' समाचार उक्तः 'तस्य' कल्पस्य विपक्षभूताः 'परिमन्थाः' कौकुच्य-मौखर्यादयो भवन्ति, अतस्तान् वर्जयेदिति ज्ञापनार्थमधिकृतसूत्रारम्भः ॥ ६३१२ ॥

अथवा वज्रमध्योऽयमुद्देशकः, तथाहि—

आइम्मि दोन्नि छक्का, अंतम्मि य छक्कगा दुवे हुंति ।
सो एस वइरमज्झो, उद्देसो होति कप्पस्स ॥ ६३१३ ॥

अस्मिन् षष्ठोद्देशके आदौ 'द्वे षट्के' भाषाषट्क-प्रस्तारषट्कलक्षणे भवतः अन्तेऽपि च 'द्वे षट्के' परिमन्थषट्क-कल्पस्थितिषट्करूपे भवतः, ततः 'स एषः' कल्पोद्देशको वज्रमध्यो भवति, वज्रवदादावन्ते च द्वयोः[2] षट्कयोः सद्भावाद् विस्तीर्णः मध्ये तु सङ्क्षिप्त इत्यर्थः । तत्राद्यं षट्कद्वयं प्राग् अभिहितमेव, अथान्त्यं षट्कद्वयमभिधीयते । तत्रापि प्रथमं तावदिदम् ॥ ६३१३ ॥

---

१ 'कः प्रलम्बपरिहारादिरूपः 'कल्पः' कां० ॥ २ द्वयोर्द्वयोर्वक्तव्यपदार्थषट्कयोः सद्भावाद् विस्तीर्णः मध्ये तु प्रतिसूत्रमेकैकस्य पदार्थस्य वक्तव्यतया सम्भवात् सङ्क्षिप्त कां० ॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—'षड्' इति षट्सङ्ख्याः 'कल्पस्य' कल्पाध्ययनोक्त-साधुसमाचारस्य परिः—सर्वतो मश्नन्ति—विलोडयन्तीति परिमन्थवः, उणादित्वादुप्रत्ययः, पाठान्तरेण परिमन्था वा, व्याघातका इत्यर्थः, 'प्रज्ञप्ताः' तीर्थकरादिभिः प्रणीताः । तद्यथा—"कुकुइए" त्ति "कुचण् अवस्पन्दने" इति वचनात् कुत्सितम्—अप्रत्युपेक्षित-त्वादिना कुचितम्—अवस्पन्दितं यस्य स कुकुचितः, स एव प्रज्ञादिदर्शनात् स्वार्थिकाणप्रत्यये 5 कौकुचितः; कुकुचा वा—अवस्पन्दितं प्रयोजनमस्येति कौकुचिकः; सः 'संयमस्य' पृथिव्यादि-रक्षणरूपस्य 'परिमन्थुः' व्याघातकारी १ । "मोहरिए" त्ति मुखं—प्रभूतभाषणातिशायि वदनमस्यास्तीति मुखरः, स एव मौखरिकः—बहुभाषी, विनयादेराकृतिगणत्वाद् इकण्प्रत्ययः; यद्वा मुखेनारिमावहतीति व्युत्पत्त्या निपातनाद् मौखरिकः; 'सत्यवचनस्य' मृषावादविरतेः परिमन्थुः, मौखर्ये सति मृषावादसम्भवात् २ । चक्षुषा लोलः—चञ्चलो यद्वा चक्षुः लोलं 10 यस्य स चक्षुर्लोलः, स स्तूप-देवकुलादीनि विलोकमानो व्रजति, ईर्या—गमनं तस्याः पन्था ईर्यापथस्तत्र भवा या समितिः सा ऐर्यापथिकी—ईर्यासमितिस्तस्याः परिमन्थुर्भवति ३ । 'तिन्तिणिकः' आहाराद्यभावे खेदाद् यत्किञ्चनाभिधायी, स एषणा—उद्गमादिदोषविमुक्तभक्त-पानादिगवेषणारूपा तत्प्रधानो यो गोचरः—गोरिव मध्यस्थतया भिक्षार्थं चरणं स एषणागो-चरस्तस्य परिमन्थुः; सखेदो हि अनेषणीयमपि गृह्णातीति भावः ४ । इच्छा—अभिलाषः 15 स चासौ लोभश्च इच्छालोभः, महालोभ इत्यर्थः, यथा निद्रानिद्रा महानिद्रेति; स च इच्छा-लोभः—अधिकोपकरणादिमेलनलक्षणः 'मुक्तिमार्गस्य' मुक्तिः—निष्परिग्रहत्वम् अलोभतेत्यर्थः सैव निर्वृतिपुरस्य मार्ग इव मार्गस्तस्य परिमन्थुः ५ । "भिज्ज" त्ति लोभस्तेन यद् निदान-करणं—देवेन्द्र-चक्रवर्त्यादिविभूतिप्रार्थनं तद् 'मोक्षमार्गस्य' सम्यग्दर्शनादिरूपस्य परिमन्थुः, आर्तध्यानचतुर्थभेदरूपत्वात् । भिज्जाग्रहणेन यदलोभस्य भवनिर्वेद-मार्गानुसारितादिप्रार्थनं 20 तन्न मोक्षमार्गस्य परिमन्थुरित्यावेदितं प्रतिपत्तव्यम् ६ । ननु तीर्थकरत्वादिप्रार्थनं न राज्यादि-प्रार्थनवद् दुष्टम्, अतस्तद्विषयं निदानं मोक्षस्य परिमन्थुर्न भविष्यति, नैवम्, यत आह—"सव्वत्थे"त्यादि 'सर्वत्र' तीर्थकरत्व-चरमदेहत्वादिविषयेऽपि आस्तां राज्यादौ 'अनिदानता' अप्रार्थनमेव 'भगवता' समग्रैश्वर्यादिमता श्रीमन्महावीरस्वामिना "पसत्थ" त्ति 'प्रशंसिता' श्लाघिता । एष सूत्रार्थः ॥ अथ **निर्युक्तिविस्तरः**— 25

पलिमंथे णिक्खेवो, णामा एगट्ठिया इमे पंच ।
पलिमंथो वक्खेवो, वक्खोड विणास विग्घो य ॥ ६३१४ ॥

'परिमन्थे' परिमन्थपदस्य निक्षेपश्चतुर्धा कर्तव्यः । तस्य चामूनि पञ्च एकार्थिकानि भवन्ति—परिमन्थो व्याक्षेपो व्याखोटो विनाशो विघ्नश्चेति ॥ ६३१४ ॥

स च परिमन्थश्चतुर्द्धा—नाम-स्थापना-द्रव्य-भावभेदात् । तत्र नाम-स्थापने सुगमे । 30 द्रव्य-भावपरिमन्थौ प्रतिपादयति—

करणे अधिकरणम्मि य, कारग कम्मे य दव्वपलिमंथो ।

---

१ अथ भाष्यकारः परिमन्थुपदं विषमत्वाद् विवरीषुराह इत्यवतरणं कां० ॥

एमेव य भावम्मि वि, चउसु वि ठाणेसु जीवे तु ॥ ६३१५ ॥

'करणे' साधकतमे 'अधिकरणे' आधारे कारकः—कर्ता तस्मिन् तथा 'कर्मणि च' व्याप्ये द्रव्यतः परिमन्थो भवति । तथाहि—करणे येन मन्थानादिना दध्यादिकं मथ्यते, अधिकरणे यस्यां पृथिवीकायनिष्पन्नायां मन्थन्यां दधि मथ्यते, कर्तरि यः पुरुषः स्त्री वा दधि विलोड-5यति, कर्मणि तन्मथ्यमानं यद् नवनीतादिकं भवति, एष चतुर्विधो द्रव्यपरिमन्थः । एवमेव 'भावेऽपि' भावविषयः परिमन्थश्चतुर्ष्वपि करणादिषु स्थानेषु भवति । तद्यथा—करणे येन कौत्कुच्यादिव्यापारेण दधितुल्यः संयमो मथ्यते, अधिकरणे यस्मिन् आत्मनि स मथ्यते, कर्तरि यः साधुः कौत्कुच्यादिभावपरिणतस्तं संयमं मथ्नाति, कर्मणि यद् मथ्यमानं संयमादिकमसंयमादितया परिणमते । एष चतुर्विधोऽपि परिमन्थो जीवादनन्यत्वाद् जीव एव 10मन्तव्यः ॥ ६३१५ ॥ अथ करणे द्रव्य-भावपरिमन्थौ भाष्यकारोऽपि भावयति—

दव्वम्मि मंथितो[1] खलु, तेणं मंथिज्जए जहा दधियं ।
दधितुल्लो खलु कप्पो, मंथिज्जति कोक्कुआदीहिं ॥ ६३१६ ॥

द्रव्यपरिमन्थो मन्थिकः[2], मन्थान इत्यर्थः, 'तेन' मन्थानेन यथा दधि मथ्यते तथा दधितुल्यः खलु 'कल्पः' साधुसमाचारः कौकुचिकादिभिः प्रकारैर्मथ्यते, विनाश्यत इत्यर्थः[3] 15॥ ६३१६ ॥ तदेवं व्याख्यातं परिमन्थपदम् । सम्प्रति शेषाणि सूत्रपदानि कौत्कुचिकादीनि व्याचिख्यासुराह—

कोक्कुइओ संजमस्स उ, मोहरिए चेव सच्चवयणस्स ।
इरियाएँ चक्खुलोलो, एसणसमिईएँ तिंतिणिए ॥ ६३१७ ॥
णासेति मुत्तिमग्गं, लोभेण णिदाणताए सिद्धिपहं ।
20 एतेसिं तु पदाणं, पत्तेय परूवणं वोच्छं ॥ ६३१८ ॥

कौकुचिकः संयमस्य, मौखरिकः सत्यवचनस्य, चक्षुर्लोल ईर्यासमितेः, तिन्तिणिक एषणासमितेः परिमन्थुरिति प्रक्रमादवगम्यते ॥ ६३१७ ॥

लोभेन[4] च मुक्तिमार्गं नाशयति, निदानतया तु सिद्धिपथम् । एतेषां पदानां[5] प्रत्येकं प्ररूपणां वक्ष्ये ॥ ६३१८ ॥ प्रतिज्ञातमेव करोति—

25 ठाणे सरीर भासा, तिविधो पुण[6] कुक्कुओ समासेणं ।
चलणे देहे पत्थर, सविगार कहकहे लहुओ ॥ ६३१९ ॥
आणाइणो य दोसा, विराहणा होइ संजमा-ऽऽयाए ।

---

१ मंथतो ताभा० मो० ले० ॥ २ मन्थकः मो० ले० ॥ ३ °र्थः । ते भावतः परिमन्था उच्यन्ते ॥ ६३१६ ॥ तदेवं व्याख्यातं विषमत्वात् परिमन्थपदं भाष्यकृता । सम्प्रति निर्युक्तिविस्तरमाह—कोकु° कां० ॥ ४ "लोभेण" त्ति पदैकदेशे पदसमुदायोपचाराद् इच्छालोभेन मुक्ति° कां० ॥ ५ पदानां सूत्रोक्तानां षण्णामपि 'प्रत्येकं' पृथक् पृथक् प्ररूपणां वक्ष्ये ॥ ६३१८ ॥ प्रतिज्ञातमेव निर्वाहयन् कौकुचिकप्ररूपणां तावद् निर्युक्तिकार एव करोति—ठाणे कां० ॥ ६ °ण कोक्कुओ ताभा० ॥

जंते व णट्टिया वा, विराहण मइल्लए सुत्ते ॥ ६३२० ॥

'स्थाने' स्थानविषयः शरीरविषयो भाषाविषयश्चेति त्रिविधः समासेन कौकुचिकः । तत्र स्थानकौकुचिको यश्चलनम्—अभीक्ष्णं भ्रमणं करोति । देहः—शरीरं तद्विषयः कौकुचिको यः प्रस्तरान् हस्तादिना क्षिपति । यस्तु 'सविकारं' परस्य हास्योत्पादकं भाषते, 'कहकहं वा' महता शब्देन हसति स भाषाकौकुचिकः । एतेषु त्रिष्वपि प्रत्येकं मासलघु, आज्ञादयश्च 5 दोषाः । संयमे आत्मनि च विराधना भवति । यन्त्रकवद् नर्तिकावद्वा भ्राम्यन् [स्थान-शरीर]-कौकुचिक उच्यते । यस्तु महता शब्देन हसति तस्य मक्षिकादीनां मुखप्रवेशेन संयम-विराधना शूलादिरोगप्रकोपेनात्मविराधना । "मएल्लए सुत्ति" त्ति मृतदृष्टान्तः सुप्तदृष्टान्त-श्चात्र हास्यदोषदर्शनाय भवति, स चोत्तरत्र दर्शयिष्यते ॥ ६३१९ ॥ ६३२० ॥

अथैतदेव निर्युक्तिगाथाद्वयं बिभावयिषुः स्थानकौकुचिकं व्याचष्टे— 10

आवडइ खंभकुड्डे, अभिक्खणं भमति जंतए चेव ।
कमफंदण आउंटण, ण यावि बद्धासणो ठाणे ॥ ६३२१ ॥

इहोपविष्ट ऊर्द्धस्थितो वा स्तम्भे कुड्ये वा य आपतति, यन्त्रकमिव वाऽभीक्ष्णं भ्रमति, क्रमस्य—पादस्य स्पन्दनमाकुञ्चनं वा करोति, न च नैव 'बद्धासनः' निश्चलासनस्तिष्ठति, एष स्थानकौकुचिकः ॥ ६३२१ ॥ अत्रामी दोषाः— 15

संचारोवतिगादी, संजमे आयाऽहि-विच्छुगादीया ।
दुब्बद्ध कुहिय मूले, चडप्फडंते य दोसा तु ॥ ६३२२ ॥

सञ्चारकाः—कुड्यादौ सञ्चरणशीला ये उवइकादयः—उद्देहिका-मन्थुकीटिकाप्रभृतयो जीवा-स्तेषां या विराधना सा संयमविषया मन्तव्या । आत्मविराधनायामहि-वृश्चिकादयस्तत्रोपद्रव-कारिणो भवेयुः, यदि वा यत्र स्तम्भादौ स आपतति तद् दुर्बद्धं मूले वा कुथितं भवेत् तत- 20 स्तस्य पतने परितापनादिका ग्लानारोपणा, "चडप्फडंते य" त्ति अभीक्ष्णमितस्ततो भ्राम्यतः सन्धिर्विसन्धीभवेदित्यादयो बहवो दोषाः । एवमुत्तरत्रापि दोषा मन्तव्याः ॥ ६३२२ ॥

अथ शरीरकौकुचिकमाह—

कर-गोफण-धणु-पादादिएहिँ उच्छुभति पत्थरादीए ।
भमुगा-दाढिग-थण-पुतविकंपणं णट्टवाइत्तं ॥ ६३२३ ॥ 25

कर-गोफणा-धनुः-पादादिभिः प्रस्तरादीन् य उत्—प्राबल्येन क्षिपति स शरीरकौकुचिकः । भ्रू-दाढिका-स्तन-पुतानां विकम्पनं—विविधम्—अनेकप्रकारैः कम्पनं यत् करोति तद् नृत्यपा-

---

१ भवति । तत्र स्थानकौकुचिकस्य यन्त्रवद् भ्राम्यतः शरीरकौकुचिकस्य तु नर्तकीवद् नृत्यतः षट्कायविराधना । भाषाकौकुचिकस्य पुनर्महता शब्देन प्रसारितवदनस्य हसतो मक्षिकादीनां मुखप्रवेशेन संयमविराधना परिस्फुटैव । तथा भ्राम्यतो नृत्यतो हसतश्च शूलादिरोगप्रकोपेनाऽऽत्मविराधना द्रष्टव्या । "मएल्लए कां० ॥ २ °षुर्भाष्यकारः स्थान-कौकुचिकं तावदाह—आव° कां० ॥ ३ ताटी० डे० विनाऽन्यत्र—°का-मधुकीटिका° मो० ले० । °का-कुन्थु-कीटिका° भा० का० ॥ ४ °नायां चिन्त्यमानायामहि° कां० ॥ ५ नृत्तपा° डे० ॥

तित्वमुच्यते, नर्तकीत्वमित्यर्थः । एतेन "नट्टिया व" त्ति पदं व्याख्यातं मतिपत्तव्यम् ॥ ६३२३ ॥ गतः शरीरकौकुचिकः । अथ भाषाकौकुचिकमाह—

छेलिय मुहवाइत्ते, जंपति य तहा जहा परो हसति ।
कुणइ य रुए बहुविधे, वग्घाडिय-देसभासाए ॥ ६३२४ ॥

5 यः सेण्टितं मुखवादित्रं वा करोति, तथा वा वचनं जल्पति यथा परो हसति, बहुविधानि वा मयूर-हंसे-कोकिलादीनां जीवानां रुतानि करोति, वग्घाडिकाः—उद्धट्टककारिणीः देशभाषा वा—मालव-महाराष्ट्रादिदेशप्रसिद्धास्तादृशीर्भाषा भाषते याभिः सर्वेषामपि हास्यमुपजायते, एष भाषाकौकुचिकः ॥ ६३२४ ॥ अस्य दोषानाह—

मच्छिगमाइपवेसो, असंपुडं चेव सेट्ठिदिट्ठंतो ।
10 **दंडिय घतणो हासण, तेइच्छिय तत्तफालेणं ॥ ६३२५ ॥**

तदीयभाषणदोषेण ये मुखं विस्फाल्य हसन्ति तेषां मुखे मक्षिकादयः प्राणिनः प्रविशेयुः, प्रविष्टाश्च ते यत् परितापनादिकं प्राप्नुवन्ति तन्निष्पन्नं तस्य प्रायश्चित्तम् । हसतश्च मुखमसम्पुटमेव भवेद्, न भूयो मिलेदित्यर्थः । तथा चात्र श्रेष्ठिदृष्टान्तः—

कश्चिद् 'दण्डिकः' राजा, तस्य "घयणो" भण्डः । तेन राजसभायामीदृशं किमपि 'हासनं' 15 हास्यकारि वचनं भणितं येन प्रभूतजनस्य हास्यमायातम् । तत्र श्रेष्ठिनो महता शब्देन हसतो मुखं तथैव स्थितं न सम्पुटीभवति । वास्तव्यवैद्यानां दर्शितो नैकेनापि प्रगुणीकर्तुं पारितः । नवरं प्राघुणकेनैकेन चैकित्सिकेन लोहमयः फालः तप्तः—अग्निवर्णः कृत्वा मुखे ढौकितः, ततस्तदीयेन भयेन श्रेष्ठिनो मुखं सम्पुटं जातम् ॥ ६३२५ ॥

अथ प्रागुद्दिष्टं मृत-सुप्तदृष्टान्तद्वयमाह—

20 **गोयर साहू हसणं, गवक्खे दट्ठुं निवं भणति देवी ।**
हसति मयगो कहं सो, त्ति एस एमेव सुत्तो वी ॥ ६३२६ ॥

एगो साहू गोचरचरियाए हिंडमाणो हसंतो देवीए गवक्खोवविट्ठाए दिट्ठो । राया भणिओ—सामि ! पेच्छ अच्छेरयं, मुयं माणुसं हसंतं दीसइ । राया संभंतो—कहं कहिं वा ? । सा साहुं दरिसेइ । राया भणइ—कहं मउ ? त्ति । देवी भणइ—इह भवे शरीर-25 संस्कारादिसकलसांसारिकसुखवर्जितत्वाद् मृत इव मृतः ॥

एवं सुत्तदिट्ठंतो वि भाणियव्वो ॥

अक्षरगमनिका त्वियम्—गोचरे साधोः पर्यटतः 'हसनं' हास्यं दृष्ट्वा देवी नृपं भणति—मृतको हसति । नृपः पृच्छति—कुत्र स मृतको हसति ? । देवी हस्तसंज्ञया दर्शयति—एष इति । 'एवमेव' मृतवत् सुप्तोऽपि मन्तव्यः, उभयोरपि निश्चेष्टतया विशेषाभावात् ॥ ६३२६ ॥ 30 गतः कौकुचिकः । सम्प्रति मौखरिकमाह—

मुहरिस्स गोण्णणामं, आवहति अरिं मुहेण भासंतो ।
लहुगो य होति मासो, आणादि विराहणा दुविहा ॥ ६३२७ ॥

१ °हा जणो हस° ताभा० ॥ २ °स-काकोलूकादी° कां० ॥

मौखरिकस्य 'गौणं' गुणनिष्पन्नं नाम 'मुखेन' प्रभूतभाषणादिमुखदोषेण भाषमाणः 'अरिं' वैरिणम् 'आवहति' करोतीति मौखरिकः । तस्यैवं मौखरिकत्वं कुर्वाणस्य लघुको मासः आज्ञादयश्च दोषाः । विराधना च संयमा-ऽऽत्मविषया द्विविधा । तत्र संयमविराधना मौखरिकस्य सत्यव्रतपरिमन्थुतया सुप्रतीता ॥ ६३२७ ॥ आत्मविराधनां तु दृष्टान्तेनाह—

को गच्छेज्जा तुरियं, अमुगो त्ति य लेहएण सिट्ठम्मि । 5
सिग्घाऽऽगतो य ठवितो, केणाहं लेहगं हणति ॥ ६३२८ ॥

एगो राया । तस्स किंचि तुरियं कज्जं उप्पन्नं ताहे सभामज्झे भणइ—को सिग्धं वच्चेज्जा ? । लेहगो भणइ—अमुगो पवणवेगेणं गच्छइ त्ति । रन्ना सो पेसिओ तं कज्जं काऊण तद्दिवसमेव आगओ । रन्ना 'एसो सिग्घगामि' त्ति काउं धावणओ ठविओ । तेण रुट्ठेणं पुच्छियं—केणाहं सिग्घो त्ति अक्खातो ? । अन्नेण सिट्ठं—जहा लेहएणं । पच्छा सो 10 तेण तल्लिच्छेण छिद्दं लद्धूण उद्दविओ । एवं चेव जो संजओ मोहरियत्तं करेइ सो आय-विराहणं पावेइ त्ति ॥

अक्षरार्थस्त्वयम्—'कस्त्वरितं गच्छेत् ?' इति राज्ञोक्ते लेखकेन शिष्टम्—अमुक इति । ततः स तत् कार्यं कृत्वा शीघ्रमागतः । ततः 'स्थापितः' राज्ञा दौत्यकर्मणि नियुक्तः । ततः 'केनाहं कथितः ?' इति पृष्ट्वा 'लेखकेन' इति विज्ञाय लेखकं हतवान् । गाथायामतीतकालेऽपि 15 वर्तमानानिर्देशः प्राकृतत्वात् ॥ ६३२८ ॥ गतो मौखरिकः । अथ चक्षुर्लोलमाह—

आलोयणा य कहणा, परियट्टऽणुपेहणा अणाभोए ।
लहुगो य होति मासो, आणादि विराहणा दुविहा ॥ ६३२९ ॥

स्तूपादीनामालोकनां कुर्वाणः 'कथनां' धर्मकथां परिवर्तनाम् अनुप्रेक्षां च कुर्वन् यदि 'अनाभोगेन' अनुपयुक्तो मार्गे व्रजति तदा लघुमासः, आज्ञादयश्च दोषाः, द्विविधा च 20 विराधना भवेत् ॥ ६३२९ ॥ इदमेव भावयति—

आलोएंतो वच्चति, थूभादीणि व कहेति वा धम्मं ।
परियट्टणाऽणुपेहण, न यावि पंथम्मि उवउत्तो ॥ ६३३० ॥

'स्तूपादीनि' स्तूप-देवकुला-ऽऽरामादीनि आलोकमानो धर्मं वा कथयन् परिवर्तनामनुप्रेक्षां वा कुर्वाणो व्रजति । यद्वा सामान्येन 'न च' नैवोपयुक्तः पथि व्रजति एष चक्षुर्लोल उच्यते 25 ॥ ६३३० ॥ अस्यैते दोषाः—

छक्कायाण विराहण, संजमे आयाए कंटगादीया ।
आवडणे भाणभेदो, खद्धे उड्डाह परिहाणी ॥ ६३३१ ॥

अनुपयुक्तस्य गच्छतः संयमे षट्कायानां विराधना भवेत् । आत्मविराधनायां कण्टकादयः पदयोर्लगेयुः, विषमे वा प्रदेशे आपतनं भवेत् तत्र भाजनभेदः । 'खद्धे च' प्रचुरे 30 भक्त-पाने भूमौ छर्दिते उड्डाहो भवेत्—अहो ! बहुभक्षका अमी इति । भाजने च भिन्ने

---

१ °णा-ऽसमञ्जसभाषणादि° कां० ॥ २ °कः, पृषोदरादित्वादिष्टरूपनिष्पत्तिः । तस्यै° कां० ॥ ३ °पितोऽसौ राज्ञा डे० ॥ ४ पुनरमी दो° कां० ॥

'परिहाणिः' सूत्रार्थपरिमन्थो भाजनान्तरगवेषणे तत्परिकर्मणायां च भवति ॥ ६३३१ ॥

गतश्चक्षुर्लोलः । अथ तिन्तिणिकमाह—

तिंतिणिएँ पुव्व भणिते, इच्छालोभे य उवहिमतिरेगे ।
लहुओ तिविहं व तहिं, अतिरेगे जे भणिय दोसा ॥ ६३३२ ॥

5 तिन्तिणिक आहारोपधि-शय्याविषयभेदात् त्रिविधः, स च 'पूर्वं' पीठिकायां सप्रपञ्चमुक्त इति नेहोच्यते । स च सुन्दरमाहारादिकं गवेषयन्नेषणासमितेः परिमन्थुर्भवतीति । इच्छा-लोभस्तु स उच्यते यद् लोभाभिभूतत्वेनोपधिमतिरिक्तं गृह्णाति, तत्र लघुको मासः । त्रिविधं वा तत्र प्रायश्चित्तम् । तद्यथा—जघन्ये उपधौ प्रमाणेन गणनया वाऽतिरिक्ते धार्यमाणे पञ्चकम्, मध्यमे मासलघु, उत्कृष्टे चतुर्लघु । ये चातिरिक्ते उपधौ दोषाः पूर्वं तृतीयोद्देशके 10 भणितास्ते द्रष्टव्याः ॥ ६३३२ ॥ अथ निदानकरणमाह—

अनियाणं निव्वाणं, काऊणमुवट्ठितो भवे लहुओ ।
पावति धुवमायातिं, तम्हा अणियाणया सेया ॥ ६३३३ ॥

'अनिदानं' निदानमन्तरेण साध्यं निर्वाणं भगवद्भिः प्रज्ञप्तम्, ततो यो निदानं करोति तस्य तत् कृत्वा पुनरकरणेनोपस्थितस्य लघुको मासः प्रायश्चित्तम् । अपि च यो निदानं 15 करोति स यद्यपि तेनैव भवग्रहणेन सिद्धिं गन्तुकामस्तथापि 'ध्रुवम्' अवश्यम् 'आयातिं' पुनर्भवागमनं प्राप्नोति, तस्मादनिदानता श्रेयसी ॥ ६३३३ ॥ इदमेव व्याचष्टे—

इह-परलोगनिमित्तं, अवि तित्थकरत्तचरिमदेहत्तं ।
सव्वत्थेसु भगवता, अणिदाणत्तं पसत्थं तु ॥ ६३३४ ॥

इहलोकनिमित्तम्—'इहैव मनुष्यलोकेऽस्य तपसः प्रभावेण चक्रवर्त्यादिभोगानहं प्राप्नुयाम्, 20 इहैव वा भवे विपुलान् भोगानासादयेयम्' इतिरूपम् परलोकनिमित्तं—मनुष्यापेक्षया देवभवादिकः परलोकस्तत्र 'महर्द्धिक इन्द्रसामानिकादिरहं भूयासम्' इत्यादिरूपं सर्वमपि निदानं प्रतिषिद्धम् । किं बहुना ? तीर्थकरत्वेन—आर्हन्त्येन युक्तं चरमदेहत्वं मे भवान्तरे भूयात् इत्येतदपि नाशंसनीयम् । कुतः ? इत्याह—'सर्वार्थेषु' सर्वेष्वपि—ऐहिका-ऽऽमुष्मिकेषु प्रयोजनेषु अभिष्वङ्गविषयेषु भगवताऽनिदानत्वमेव 'प्रशस्तं' श्लाघितम् । तुशब्द एवकारार्थः, स 25 च यथास्थानं योजितः ॥ ६३३४ ॥

व्याख्याताः षडपि परिमन्थवः । साम्प्रतमेतेष्वेव द्वितीयपदमाह—

बिइयपदं गेलण्णे, अद्धाणे चेव तह य ओमम्मि ।
मोत्तूणं चरिमपदं, णायव्वं जं जहिं कमति ॥ ६३३५ ॥

द्वितीयपदं ग्लानत्वे अध्वनि तथा अवमे च भवति, तच्च 'चरमपदं' निदानकरणरूपं 30 मुक्त्वा ज्ञातव्यम्, तत्र द्वितीयपदं न भवतीत्यर्थः । शेषेषु तु कौकुचिकादिषु यद् यत्र क्रमते तत् तत्रावतारणीयम् ॥ ६३३५ ॥ एतदेव भावयति—

---

१ °त्र द्वितीयपदं क्रमते तत् तत्रावतारणीयम् । एषा निर्युक्तिगाथा ॥ ६३३५ ॥ अथैनामेव भाष्यकृद् व्याख्यानयति—कडि° कां० ॥

कडिवेयणमवतंसे, गुदपागऽरिसा भगंदलं वा वि ।
गुदखील सक्करा वा, ण तरति बद्धासणो होउं ॥ ६३३६ ॥

कटिवेदना कस्यापि दुःसहा, 'अवतंसो वा' पुरुषव्याधिनामको रोगो भवेत्, एवं गुदयोः पाकोऽर्शांसि भगन्दरं गुदकीलको वा भवेत्, 'शर्करा' कृच्छ्रमूत्रको रोगः स वा कस्यापि भवेत्, ततो न शक्नोति बद्धासनः 'भवितुं' स्थातुम् । एवंविधे ग्लानत्वेऽभीक्ष्णपरिस्पन्दनादिकं 5 स्थानकौकुचिकत्वमपि कुर्यात् ॥ ६३३६ ॥

उव्वत्तेति गिलाणं, ओसहकज्जे व पत्थरे छुभति ।
वेवति य खित्तचित्तो, बितियपदं होति दोसुं तु ॥ ६३३७ ॥

ग्लानम् 'उद्वर्तयति' एकस्मात् पार्श्वतो द्वितीयस्मिन् पार्श्वे करोति, 'औषधकार्ये वा' औषधदानहेतोस्तमेव ग्लानमन्यत्र सङ्क्राम्य भूयस्तत्रैव स्थापयति, यस्तु क्षिप्तचित्तः स परवश-[1] तया 'प्रस्तरान्' पाषाणान् क्षिपति वेपते वा, चशब्दात् सेण्टितं मुखवादित्रादिकं वा करोति[2] । एतद् द्वितीयपदं यथाक्रमं 'द्वयोरपि' शरीर-भाषाकौकुचिकयोर्भवति ॥ ६३३७ ॥

मौखरिकत्वेऽपवादमाह—

तुरियगिलाणाहरणे, मुहरित्तं कुज्ज वा दुपक्खे वी ।
ओसह विज्जं मंतं, पेल्लिज्जा सिग्घगामि त्ति ॥ ६३३८ ॥ 15

त्वरितं ग्लाननिमित्तमौषधादेः आहरणे कर्तव्ये 'द्विपक्षे' संयतपक्षे संयतीपक्षे च मौखरिकत्वं कुर्यात् । कथम्? इत्याह—एष शीघ्रगामी अत औषधमानेतुं विद्यां मन्त्रं वा प्रयोक्तुं "पेल्लिज्ज" त्ति प्रेर्यताम्, व्यापार्यतामित्यर्थः ॥ ६३३८ ॥[3]

अच्चाउरकज्जे वा, तुरियं व न वा वि इरियमुवओगो ।
विज्जस्स वा वि कहणं, भए व विस सूल ओमज्जे ॥ ६३३९ ॥ 20

अत्यातुरस्य वा—आगाढग्लानस्य कार्ये त्वरितं गच्छेत्, 'न वाऽपि' नैवेर्यायामुपयोगं दद्यात्, वैद्यस्य वा 'कथनं' धर्मकथां कुर्वन् गच्छेद् येन स आवृत्तः सम्यग् ग्लानस्य चिकित्सां करोति, भये वा मन्त्रादिकं परिवर्तयन् गच्छति, विषं वा केनापि साधुना भक्षितं तस्य मन्त्रेणापमार्जनं कुर्वन्, विषविद्या वा नवगृहीता तां परिवर्तयन् गच्छति, शूलं वा कस्यापि साधोरुद्धावति तदपमार्जयन् गच्छति ॥ ६३३९ ॥ 25

तिंतिणिया वि तदट्ठा, अलब्भमाणे वि दव्वतिंतिणिता ।
वेज्जे गिलाणगादिसु, आहारुवधी य अतिरित्तो ॥ ६३४० ॥

तस्य—ग्लानस्य उपलक्षणत्वाद् आचार्यादेश्चार्थाय 'तिन्तिणिकताऽपि' स्निग्ध-मधुराहारादिसं-योजनलक्षणा कर्तव्या । अलभ्यमाने वा ग्लानप्रायोग्ये[4] औषधादौ 'द्रव्यतिन्तिणिकता' 'हा !

---

१ °यति, स एव ग्लानमितस्ततः कुर्वन् स्थापयन् वा स्थानकौकुचिकत्वं विदध्यादपि। तथा यस्तु क्षिप्तचित्तः उपलक्षणत्वाद् दीप्तचित्तादिर्वा स परवश° कां० ॥ २ करोति महता शब्देन हसति वा। एत° कां० ॥ ३ अथ चक्षुर्लोलत्वे द्वितीयपदमाह इत्यवतरणं कां० ॥ ४ °ग्ये पथ्यौषधादौ द्रव्ये-द्रव्यतश्चिन्ताभिष्वङ्गमन्तरेण तिन्ति° कां० ॥

कष्टं न लभ्यते ग्लानयोग्यमत्र' इत्येवंरूपा कार्या । इच्छालोभे पुनरिदं द्वितीयपदम्—वैद्यस्य दानार्थं ग्लानार्थं वा आहार उपधिश्चातिरिक्तोऽपि ग्रहीतव्यः, आदिशब्दाद् आचार्यादिपरिग्रहः, गणचिन्तको वा गच्छोपग्रहहेतोरतिरिक्तमुपधिं धारयेत् ॥ ६३४० ॥ एवं तावद् निदानपदं वर्जयित्वा शेषेषु सर्वेष्वपि ग्लानत्वमङ्गीकृत्य द्वितीयपदमुक्तम् । सम्प्रति तदेवाध्वनि दर्शयति—

5 **अवयक्खंतो व भया, कहेति वा सत्थिया-ऽऽतिअत्तीणं ।**
विज्जं आइसुतं वा, खेद भदा वा अणाभोगा ॥ ६३४१ ॥

अध्वनि स्तेनानां सिंहादीनां वा भयादप्रेक्षमाण इतश्चेतश्च विलोकमानोऽपि व्रजेत् । यदि वा अध्वनि गच्छन् सार्थिकानाम् 'आयत्तिकानां वा' सार्थचिन्तकानां धर्मं कथयति येन ते आवृत्ताः सन्तो भक्तपानाद्युपग्रहं कुर्युः । अथवा विद्या काचिदभिनवगृहीता सा 'मा विस्म-10 रिष्यति' इति कृत्वा परिवर्तयन्ननुप्रेक्षमाणो वा गच्छेत् । 'आदिश्रुतं' पञ्चमङ्गलं तद्वा चौरादिभये परावर्तयन् व्रजेत् । 'खेदो नाम' परिश्रमः तेन आतुरीभूतो भयाद्वा सम्भ्रान्त ईर्यायामुपयुक्तो न भवेदपि । "अणाभोग" त्ति विस्मृतिवशात् सहसा वा नेर्यायामुपयोगं कुर्यात् ॥६३४१॥

संजोयणा पलंबातिगाण कप्पादिगो य अतिरेगो ।
ओमादिए वि विहुरे, जोइज्जा जं जहिं कमति ॥ ६३४२ ॥

15 अध्वनि गच्छन्नाहारादीनां संयोजनामपि कुर्यात् । प्रलम्बादीनां विकरणकरणाय पिप्पल-कादिकमतिरिक्तमप्युपधिं गृह्णीयाद् धारयेद्वा । अथवा परलिङ्गेन तानि ग्रहीतव्यानि ततः परलिङ्गमपि धारयेत् । कल्पाः—और्णिकादयस्तदादिकः आदिशब्दात् पात्रादिकश्च दुर्लभ उपधिरतिरिक्तोऽपि ग्रहीतव्यः । तदेवमध्वनि द्वितीयपदं भावितम् । एवम् अवमं—दुर्भिक्षं तत्र आदिशब्दाद् अशिवादिकारणेषु वा 'विधुरे' आत्यन्तिकायामापदि पञ्चविधं परिमन्थुमङ्गीकृत्य 20 यद् यत्र द्वितीयपदं क्रमते तत् तत्र योजयेत् । एवं निदानपदं मुक्त्वा पञ्चस्वपि कौकुचिका-दिषु परिमन्थुषु द्वितीयपदमुक्तम् ॥ ६३४२ ॥ आह—निदाने किमिति द्वितीयपदं नोक्तम् ? उच्यते—नास्ति । कुतः ? इति चेद् अत आह—

जा सालंबणसेवा, तं बीयपदं वयंति गीयत्था ।
आलंबणरहियं पुण, निसेवणं दप्पियं बेंति ॥ ६३४३ ॥

25 या 'सालम्बनसेवा' ज्ञानाद्यालम्बनयुक्ता प्रतिषेवा तां द्वितीयं पदं गीतार्था वदन्ति, आलम्ब-नरहितां पुनः 'निषेवणां' प्रतिषेवां दर्पिकां ब्रुवते । तच्चालम्बनं निदानकरणे किमपि न विद्यते, "सव्वत्थ अनियाणया भगवया पसत्थे"ति वचनात् ॥ ६३४३ ॥[2]

आह—भोगार्थं विधीयमानं निदानं तीव्रविपाकं भवतीति कृत्वा मा क्रियताम्, यत् पुनरमुना प्रणिधानेन निदानं करोति—मा मम राजादिकुले उत्पन्नस्य भोगाभिष्वक्तस्य प्रव्रज्या 30 न भविष्यतीत्यतो दरिद्रकुलेऽहमुत्पद्येयम्, तत्रोत्पन्नस्य भोगाभिष्वङ्गो न भविष्यति; एवं निदानकरणे को दोषः ? सूरिराह—

---

१ अजितसुतं कां० विना । अहियसुतं ताभा० । "आदिसुतं पंचमंगलं, दंडपरिहारणिमित्तं अणु-पेहंतो परियट्टंतो वा वच्चेज्ज" इति विशेषचूर्णौ ॥ २ अत्रान्तरे ग्रन्थाग्रम्—९५०० कां० ॥

एवं सुनीहरो मे, होहिति अप्प त्ति तं परिहरंति ।
हंदि ! हु णेच्छंति भवं, भववोच्छित्तिं विमग्गंता ॥ ६३४४ ॥

'एवम्' अवधारणे । किमवधारयति ? दरिद्रकुले उत्पन्नस्य 'मे' ममात्माऽसंयमात् 'सुनिर्हरः' सुनिर्गमो भविष्यति, सुखेनैव संयममङ्गीकरिष्यामि इत्यर्थः; 'इति' ईदृशमपि यद् निदानं तदपि साधवः परिहरन्ते । कुतः ? इत्याह—'हन्दि !' इति नोदकामन्त्रणे । हुः इति यस्मादर्थे । 5 हे सौम्य ! यस्माद् निदानकरणेन भवानां परिवृद्धिर्भवति, सर्वोऽपि च प्रव्रज्याप्रयत्नोऽस्माकं भवव्यवच्छित्तिनिमित्तम्, ततो भवव्यवच्छित्तिं विविधैः प्रकारैर्मार्गयन्तः साधवो भवं नेच्छन्ति ॥ ६३४४ ॥ अमुमेवार्थं दृष्टान्तेन द्रढयति—

जो रयणमणग्घेयं, विकिज्जऽप्पेण तत्थ किं साहू ।
दुग्गयभवमिच्छंते, एसो चिय होति दिट्ठंतो ॥ ६३४५ ॥ 10

यः 'अनर्घ्यम्' इन्द्रनील-मरकतादिकं रत्नम् 'अल्पेन' स्वल्पमूल्येन काचादिना विक्रीणीयात् तत्र 'किं साधु' किं नाम शोभनम् ? न किञ्चिदित्यर्थः । 'दुर्गतभवं' दरिद्रकुलोत्पत्तिमिच्छत एष एव दृष्टान्त उपनेतव्यो भवति । तथाहि—अनर्घ्यरत्नस्थानीयं चारित्रम्, निरुपमा-ऽनन्तानन्दमयमोक्षफलसाधकत्वात्; काचशकलस्थानीयो दुर्गतभवः, तुच्छत्वात् । ततो यश्चारित्रविक्रयेण तत्प्रार्थनं करोति स मन्दभाग्योऽनर्घ्यरत्नं विक्रीय काचशकलं गृह्णातीति 15 मन्तव्यम्[1] ॥ ६३४५ ॥ अपि च—

संगं अणिच्छमाणो, इह-परलोए य मुच्चति अवस्सं ।
एसेव तस्स संगो, आसंसति तुच्छतं जं तु ॥ ६३४६ ॥

इहलोकविषयं परलोकविषयं च 'सङ्गं' मुक्तिपदप्रतिपक्षभूतमभिष्वङ्गमनिच्छन्नवश्यं 'मुच्यते' कर्मविमुक्तो भवति । कः पुनस्तस्य सङ्गः ? इत्याह—एष एव तस्य सङ्गो यद् 20 मोक्षाख्यविपुलफलदायिना तपसा तुच्छकं फलम् 'आशास्ते' प्रार्थयति ॥ ६३४६ ॥

---

१ मन्तव्यम् । तथा च दशाश्रुतस्कन्धसूत्रम्—एवं खलु समणाउसो ! मए धम्मे पण्णत्ते, जस्स णं धम्मस्स निग्गंथे वा निग्गंथी वा सिक्खाए उवट्ठिए इमं एयारूवं नियाणं करेज्जा—जइ इमस्स तव-नियम-बंभचेरवासस्स फलवित्तिविसेसे अत्थि तो वयमवि आगमिस्सा णं जाइं इमाइं अंतकुलाणि वा तुच्छकुलाणि वा दरिद्दकुलाणि वा एएसि णं अन्नयरंसि कुलंसि पुमत्ताए पच्चायामो एवं मे आया परियाए सुनीहरे भविस्सइ । एवं खलु समणाउसो ! निग्गंथे वा निग्गंथी वा नियाणं किच्चा तस्स ठाणस्स अणालोइय-अप्पडिक्कंते कालमासे कालं किच्चा अन्नयरेसु देवलोएसु देवत्ताए उववज्जित्ता ताओ देवलोगाओ आउक्खएणं ३ अणंतरं चयं चइत्ता अंत-तुच्छ-दरिद्दकुलेसु पच्चायाइ से णं भंते ! तहारूवाणं थेराणं अंतिए केवलिपन्नत्तं धम्मं पडिसुणित्ता पव्वइज्जा ? हंता ! पव्वइज्जा । से णं भंते ! तेणेव भवग्गहणेणं सिज्झिज्जा ? नो इणट्ठे समट्ठे, एवं खलु समणाउसो ! तस्स नियाणस्स पावए फलविवागे जं नो संचाएइ तेणेव भवग्गहणेणं सिज्झित्तए ॥ यत एवमतो न विधेयं निदानम् ॥ ६३४५ ॥ अपि च कां० ॥

तद् भूयोऽपि निदानस्यैव पर्यायकथनद्वारेण दोषमाह—

बंधो त्ति णियाणं ति य, आससजोगो य होंति एगट्ठा ।
ते पुण ण बोहिहेऊ, बंधावचया भवे बोही ॥ ६३४७ ॥

बन्ध इति वा निदानमिति वा आशंसायोग इति वा एकार्थानि पदानि भवन्ति । 'ते 5 पुनः' बन्धादयः 'न बोधिहेतवः' न ज्ञानाद्यवाप्तिकारणं भवन्ति, किन्तु ये 'बन्धापचयाः' कारणे कार्योपचारात् कर्मबन्धस्यापचयहेतवोऽनिदानतादयस्तेभ्यो बोधिर्भवति ॥ ६३४७ ॥

आह—यदि नाम साधवो भवं नेच्छन्ति ततः कथं देवलोकेषूत्पद्यन्ते ? उच्यते—

नेच्छंति भवं समणा, सो पुण तेसिं भवो इमेहिं तु ।
पुव्वतव-संजमेहिं, कम्मं तं चावि संगेणं ॥ ६३४८ ॥

10 'श्रमणाः' साधवो नेच्छन्त्येव भवं परं स पुनः 'भवः' देवत्वरूपस्तेषाममीभिः कारणै-र्भवेत् । तद्यथा—पूर्वं—वीतरागावस्थापेक्षया प्राचीनावस्थाभावि यत् तपस्तेन, सरागावस्थाभाविना तपसा साधवो देवलोकेषूत्पद्यन्ते इत्यर्थः, एवं पूर्वसंयमेन—सरागेण सामायिकादिचारित्रेण साधूनां देवत्वं भवति । कुतः ? इत्याह—"कम्मं" ति पूर्वतपः-संयमावस्थायां हि देवायु-र्देवगतिप्रभृतिकं कर्म बध्यते ततो भवति देवेषूपपातः । एतदपि कर्म केन हेतुना बध्यते ? 15 इति चेद् अत आह—तदपि कर्म 'सङ्गेन' संज्वलनक्रोधादिरूपेण बध्यते ॥ ६३४८ ॥

॥ परिमन्थप्रकृतं समाप्तम् ॥

क ल्प स्थि ति प्र कृ त म्

सूत्रम्—

छव्विहा कप्पट्ठिती पण्णत्ता, तं जहा—सामाइय-
20 **संजयकप्पट्ठिती १ छेतोवट्ठावणियसंजयकप्पट्ठिती २**
निव्विसमाणकप्पट्ठिती ३ निव्विट्ठकाइयकप्पट्ठिती
४ जिणकप्पट्ठिती ५ थेरकप्पट्ठिति ६ त्ति बेमि २० ॥

अथास्य सूत्रस्य कः सम्बन्धः ? इत्याह—

पलिमंथविप्पमुक्कस्स होति कप्पो अवट्ठितो णियमा ।
25 **कप्पे य अवट्ठाणं, वदंति कप्पट्ठितिं थेरा ॥ ६३४९ ॥**

अनन्तरसूत्रोक्तैः परिमन्थैर्विप्रमुक्तस्य साधोः 'अवस्थितः' सर्वकालभावी कल्पो नियमाद् भवति । यच्च कल्पेऽवस्थानं तामेव कल्पस्थितिं 'स्थविराः' श्रीगौतमादयः सूरयो वदन्ति । अतः परिमन्थसूत्रानन्तरं कल्पस्थितिसूत्रमारभ्यते ॥ ६३४९ ॥

अनेन सम्बन्धेनायातस्यास्य व्याख्या—'षड्विधा' षट्प्रकारा कल्पे—कल्पशास्त्रोक्तसाधु-

---

१ °द्यो गुणास्ततो बो° कां० ॥ २ °ण कषायांशसम्पर्केण ब° कां० ॥

समाचारे स्थितिः—अवस्थानं कल्पस्थितिः कल्पस्य वा स्थितिः—मर्यादा कल्पस्थितिः 'प्रज्ञप्ता' तीर्थकर-गणधरैः प्ररूपिता । 'तद्यथा' इति उपन्यासार्थः । 'सामायिकसंयतकल्पस्थितिः' समः—राग-द्वेषरहितस्तस्य आयः—लाभो ज्ञानादीनां प्राप्तिरित्यर्थः, समाय एव सामायिकं—सर्व-सावद्ययोगविरतिरूपम् तत्प्रधाना ये संयताः—साधवस्तेषां कल्पस्थितिः सामायिकसंयतकल्प-स्थितिः १ । तथा पूर्वपर्यायच्छेदेनोपस्थापनीयम्—आरोपणीयं यत् तत् छेदोपस्थापनीयम्, 5 व्यक्तितो महाव्रतारोपणमित्यर्थः, तत्प्रधाना ये संयतास्तेषां कल्पस्थितिः छेदोपस्थापनीयसंयत-कल्पस्थितिः २ । निर्विशमानाः—परिहारविशुद्धिकल्पं वहमानास्तेषां कल्पस्थितिः निर्विशमान-कल्पस्थितिः ३ । निर्विष्टकायिका नाम—यैः परिहारविशुद्धिकं तपो व्यूढम्, निर्विष्टः—आसे-वितो विवक्षितचारित्रलक्षणः कायो यैस्ते निर्विष्टकायिका इति व्युत्पत्तेः, तेषां कल्पस्थितिः निर्विष्टकायिककल्पस्थितिः ४ । जिनाः—गच्छनिर्गताः साधुविशेषास्तेषां कल्पस्थितिः जिन- 10 कल्पस्थितिः ५ । स्थविराः—आचार्यादयो गच्छप्रतिबद्धास्तेषां कल्पस्थितिः स्थविरकल्पस्थितिः ६ । 'इतिः' अध्ययनपरिसमाप्तौ । 'ब्रवीमि' इति तीर्थकर-गणधरोपदेशेन सकलमपि प्रस्तुत-शास्त्रोक्तं कल्पा-ऽकल्पविधिं भणामि, न पुनः स्वमनीषिकया इति सूत्रसङ्क्षेपार्थः ॥

सम्प्रति विस्तरार्थं बिभणिषुर्भाष्यकारः कल्पस्थितिपदे परस्याभिप्रायमाशङ्क्य परिहरन्नाह—

आहारो त्ति य ठाणं, जो चिट्ठति सो ठिइ त्ति ते बुद्धी । 15
ववहार पडुच्चेवं, ठिईरेव तु णिच्छए ठाणं ॥ ६३५० ॥

"कल्पस्थितिः" इति सूत्रे यत् पदं तत्र कल्पः—आधार इति कृत्वा स्थानम्, यस्तु तत्र कल्पे तिष्ठति स स्थितेरनन्यत्वात् स्थितिः, ततश्चैवं पृथग्नामा-ऽभिधेयत्वेन स्थिति-स्थानयोः परस्परमन्यत्वमापन्नमिति 'ते' तव बुद्धिः स्यात् तत्रोच्यते—'व्यवहारं' व्यवहारनयं प्रतीत्य 'एवं' स्थिति-स्थानयोरन्यत्वम्, 'निश्चयतस्तु' निश्चयनयाभिप्रायेण यैव स्थितिस्तदेव स्थानम्, 20 तुशब्दाद् यदेव स्थानं सैव स्थितिः ॥ ६३५० ॥ कथं पुनः ? इत्यत आह—

ठाणस्स होति गमणं, पडिवक्खो तह गती ठिईए तु ।
एतावता सकिरिए, भवेज्ज ठाणं व गमणं वा ॥ ६३५१ ॥

सक्रियस्य जीवादिद्रव्यस्य तावदेतावदेव क्रियाद्वयं भवति—स्थानं वा गमनं वा । तत्र स्थानस्य गमनं प्रतिपक्षो भवति, तत्परिणतस्य स्थानाभावात् । एवं स्थितेरपि गतिः प्रतिपक्षो 25 भवति ॥ ६३५१ ॥ ततः किम् ? इत्याह—

ठाणस्स होति गमणं, पडिपक्खो तह गती ठिईए उ ।
ण य गमणं तु गतिमतो, होति पुढो एवमितरं पि ॥ ६३५२ ॥

स्थानस्य गमनं प्रतिपक्षो भवति न स्थितिः, स्थितेरपि गतिः प्रतिपक्षो न स्थानम्, एवं स्थिति-स्थानयोरेकत्वम् । तथा 'न च' नैव गमनं गतिमतो द्रव्यात् 'पृथग्' व्यतिरिक्तं भवति, 30 एवम् 'इतरदपि' स्थानं स्थितिमतो द्रव्यादव्यतिरिक्तं मन्तव्यम् ॥ ६३५२ ॥

इदमेव व्यतिरेकद्वारेण द्रढयति—

---

१ **ठिति चेव तु** ताभा० ॥

जय गमणं तु गतिमतो, होज्ज पुढो तेण सो ण गच्छेज्जा ।
जह गमणातो अण्णा, ण गच्छती वसुंधरा कसिणा ॥ ६३५३ ॥

यदि गमनं गतिमतः पुरुषादेः पृथग् भवेत् ततः 'असौ' गतिमान् न गच्छेत् । दृष्टान्तमाह—यथा गमनात् 'अन्या' पृथग्भूता 'कृत्स्ना' सम्पूर्णा वसुन्धरा न गच्छति । कृत्स्नाग्रहणं 5 लेष्टुप्रभृतिकस्तदवयवो गच्छेदपि इति ज्ञापनार्थम् । एवं स्थानेऽपि भावनीयम् ॥ ६३५३ ॥

यत एवमतः स्थितमेतत्—

ठाण-ट्ठिइणाणत्तं, गति-गमणाणं च अत्थतो णत्थि ।
वंजणणाणत्तं पुण, जहेव वयणस्स वायातो ॥ ६३५४ ॥

स्थान-स्थित्योर्गति-गमनयोश्चार्थतो नास्ति नानात्वम्, एकार्थत्वात्; व्यञ्जननानात्वं पुनरस्ति । 10 यथैव वचनस्य वाचश्च परस्परमर्थतो नास्ति भेदः, शब्दतः पुनरस्तीति ॥ ६३५४ ॥

अथवा नात्र स्थितिशब्दोऽवस्थानवाची किन्तु मर्यादावाचकः । तथा चाह—

अहवा ज एस कप्पो, पलंबमादि बहुधा समक्खातो ।
छट्ठाणा तस्स ठिई, ठिति त्ति मेर त्ति एगट्ठा ॥ ६३५५ ॥

अथवा य एष प्रस्तुतशास्त्रे प्रलम्बादिकः 'बहुधा' अनेकविधः कल्पः समाख्यातः तस्य 15 'षट्स्थाना' षट्प्रकारा स्थितिर्भवति । स्थितिरिति मर्यादा इति चैकार्थौ शब्दौ ॥ ६३५५ ॥

भूयोऽपि विनेयानुग्रहार्थं स्थितेरेवैकार्थिकान्याह—

पतिट्ठा ठावणा ठाणं, ववत्था संठिती ठिती ।
अवट्ठाणं अवत्था य, एकट्ठा चिट्ठणाऽऽति य ॥ ६३५६ ॥

प्रतिष्ठा स्थापना स्थानं व्यवस्था संस्थितिः स्थितिः अवस्थानम् अवस्था च, एतान्येकार्थि- 20 कानि पदानि । तथा "चिट्ठणं" ऊर्द्ध्वस्थानम् आदिशब्दाद् निषदनं त्वग्वर्तनं च, एतानि त्रीण्यपि स्थितिविशेषरूपाणि मन्तव्यानि ॥ ६३५६ ॥ सा च कल्पस्थितिः षोढा, तद्यथा—

सामाइए य छेदे, निव्विसमाणे तहेव निव्विट्ठे ।
जिणकप्पे थेरेसु य, छव्विह कप्पट्ठिती होति ॥ ६३५७ ॥

सामायिकसंयतकल्पस्थितिः छेदोपस्थापनीयसंयतकल्पस्थितिः निर्विशमानकल्पस्थितिः तथैव 25 निर्विष्टकायकल्पस्थितिः जिनकल्पस्थितिः स्थविरकल्पस्थितिश्चेति षड्विधा कल्पस्थितिः ॥ ६३५७ ॥ अथैनामेव यथाक्रमं विवरीषुः प्रथमतः सामायिककल्पस्थितिं विवृणोति—

कतिठाण ठितो कप्पो, कतिठाणेहिँ अट्ठितो ।
वुत्तो धूतरजो कप्पो, कतिठाणपतिट्ठितो ॥ ६३५८ ॥

यः किल 'धुतरजाः' अपनीतपापकर्मा सामायिकसाधूनां 'कल्पः' आचारो भगवद्भिरुक्तः 30 स कतिषु स्थानेषु स्थितः ? कतिषु च स्थानेषु अस्थितः ? कतिस्थानप्रतिष्ठितश्चोक्तः ? ॥ ६३५८ ॥ सूरिराह—

---

१ °म्बविधि-मासकल्पविधिप्रभृतिकोऽनेक° कां० ॥ २ °वृण्वन् शिष्येण प्रश्नं कारयति—कति कां० ॥

चउठाणठिओ कप्पो, छहिं ठाणेहिं अट्ठिओ ।
एसो धूयरय कप्पो, दसट्ठाणपतिट्ठिओ ॥ ६३५९ ॥

चतुःस्थानस्थितः कल्पः, षट्सु च स्थानेष्वस्थितः । तदेवमेष धुतरजाः सामायिकसंयत-कल्पो दशस्थानप्रतिष्ठितः, केषुचित् स्थित्या केषुचित् पुनरस्थित्या दशसु स्थानेषु प्रतिबद्धो मन्तव्य इत्यर्थः ॥ ६३५९ ॥ इदमेव व्यक्तीकरोति— 5

चउहिँ ठिता छहिँ अठिता, पढमा बितिया ठिता दसविहम्मि ।
वहमाणा णिव्विसगा, जेहि वहं ते उ णिव्विट्ठा ॥ ६३६० ॥

'प्रथमाः' सूत्रक्रमप्रामाण्येन सामायिकसंयतास्ते चतुर्षु स्थानेषु स्थिताः, षट्सु पुनरस्थिताः । गाथायां सप्तम्यर्थे तृतीया । ये तु 'द्वितीयाः' छेदोपस्थापनीयसंयतास्ते दशविधेऽपि कल्पे स्थिताः । पश्चार्द्धेन तृतीय-चतुर्थकल्पस्थित्योः शब्दार्थमाह—"वहमाणा" इत्यादि । ये 10 परिहारविशुद्धिकं तपो वहन्ति ते निर्विशमानकाः । यैस्तु तदेव तपो व्यूढं ते निर्विष्टकायिका उच्यन्ते ॥ ६३६० ॥ आह—कानि पुनस्तानि चत्वारि षड् वा स्थानानि येषु सामायिकसंयता यथाक्रमं स्थिता अस्थिताश्च ? इति अत्रोच्यते—

सिज्जायरपिंडे या, चाउज्जामे य पुरिसजेट्ठे य ।
कितिकम्मस्स य करणे, चत्तारि अवट्ठिया कप्पा ॥ ६३६१ ॥ 15

"सिज्जातरपिंडे" त्ति "सूचनात् सूत्रम्" इति शय्यातरपिण्डस्य परिहरणं चतुर्यामः पुरुष-ज्येष्ठश्च धर्मः कृतिकर्मणश्च करणम् । एते चत्वारः कल्पाः सामायिकसाधूनामप्यवस्थिताः । तथाहि—सर्वेऽपि मध्यमसाधवो महाविदेहसाधवश्च शय्यातरपिण्डं परिहरन्ति, चतुर्यामं च धर्ममनुपालयन्ति, 'पुरुषज्येष्ठश्च धर्मः' इति कृत्वा तदीया अप्यार्यिकाश्चिरदीक्षिता अपि तद्दिन-दीक्षितमपि साधुं वन्दन्ते, कृतिकर्म च यथारात्निकं तेऽपि कुर्वन्ति । अत एते चत्वारः कल्पा 20 अवस्थिताः ॥ ६३६१ ॥ इमे पुनः षडनवस्थिताः—

आचेलकुद्देसिय, सपडिकमणे य रायपिंडे य ।
मासं पज्जोसवणा, छऽप्पेतऽणवट्ठिता कप्पा ॥ ६३६२ ॥

आचेलक्यमौद्देशिकं सप्रतिक्रमणो धर्मो राजपिण्डो मासकल्पः पर्युषणाकल्पश्चेति षडप्येते कल्पा मध्यमसाधूनां विदेहसाधूनां चानवस्थिताः । तथाहि—यदि तेषां वस्त्रप्रत्ययो रागो द्वेषो 25 वा उत्पद्यते तदा अचेलाः, अथ न रागोत्पत्तिस्ततः सचेलाः, महामूल्यं प्रमाणातिरिक्तमपि च वस्त्रं गृह्णन्तीति भावः । 'औद्देशिकं नाम' साधूनुद्दिश्य कृतं भक्तादिकम् आधाकर्मेत्यर्थः, तदप्यन्यस्य साधोरर्थाय कृतं तेषां कल्पते, तदर्थं तु कृतं न कल्पते । प्रतिक्रमणमपि यदि अतिचारो भवति ततः कुर्वन्ति अतिचाराभावे न कुर्वन्ति । राजपिण्डे यदि वक्ष्यमाणा दोषा

---

१ 'चतुःस्थानस्थितः' वक्ष्यमाणनीत्या शय्यातरपिण्डपरिहारादौ स्थानचतुष्टये नियमेन कृतावस्थानः कल्पः, 'षट्सु च स्थानेषु' आचेलक्यादिषु वक्ष्यमाणनीत्यैवास्थितः । तदेव° कां० ॥ २ 'दशविधेऽपि' वक्ष्यमाणलक्षणे कल्पे 'स्थिताः' अवश्यन्तया कृतावस्थानाः । पश्चा° कां० ॥ ३ °काः । "जेहि वहं ते उ निव्विट्ठ" त्ति प्राकृतत्वाद् यैस्तु कां० ॥

भवन्ति ततः परिहरन्ति अन्यथा गृह्णन्ति । मासकल्पे यदि एकक्षेत्रे तिष्ठतां दोषा न भवन्ति ततः पूर्वकोटीमप्यासते, अथ दोषा भवन्ति ततो मासे पूर्णेऽपूर्णे वा निर्गच्छन्ति । पर्युषणायामपि यदि वर्षासु विहरतां दोषा भवन्ति तत एकत्र क्षेत्रे आसते, अथ दोषा न भवन्ति ततो वर्षारात्रेऽपि विहरन्ति ॥ ६३६२ ॥

5 गता सामायिकसंयतकल्पस्थितिः । अथ च्छेदोपस्थापनीयसाधूनां कल्पस्थितिमाह—

दसठाणठितो कप्पो, पुरिमस्स य पच्छिमस्स य जिणस्स ।
एसो धुतरत कप्पो, दसठाणपतिट्ठितो होति ॥ ६३६३ ॥

दशस्थानस्थितः कल्पः पूर्वस्य च पश्चिमस्य च जिनस्य तीर्थे छेदोपस्थापनीयसाधूनां मन्तव्यः । तदेवमेष धुतरजाः कल्पो दशस्थानप्रतिष्ठितो भवति ॥ ६३६३ ॥

10 तान्येव दश स्थानानि दर्शयति—

आचेलकुद्देसिय, सिज्जायर रायपिंड कितिकम्मे ।
वत जेट्ठ पडिकमणे, मासं-पज्जोसवणकप्पे ॥ ६३६४ ॥

आचेलक्यम् १ औद्देशिकं २ शय्यातरपिण्डो ३ राजपिण्डः ४ कृतिकर्म ५ व्रतानि ६ "जेट्ठ" त्ति पुरुषज्येष्ठो धर्मः ७ प्रतिक्रमणं ८ मासकल्पः ९ पर्युषणाकल्पश्च १० इति द्वारगाथासमासार्थः ॥ ६३६४ ॥ साम्प्रतमेनामेव विवरीषुराह—

15

दुविहो होति अचेलो, संताचेलो असंतचेलो य ।
तित्थगर असंतचेला, संताचेला भवे सेसा ॥ ६३६५ ॥

द्विविधो भवत्यचेलः—सदचेलोऽसदचेलश्च । तत्र तीर्थकरा असदचेलाः, देवदूष्यपतनानन्तरं सर्वदैव तेषां चीवराभावात् । 'शेषाः' सर्वेऽपि जिनकल्पिकादिसाधवः सदचेलाः, जघन्यतोऽपि रजोहरण-मुखवस्त्रिकासम्भवात् ॥ ६३६५ ॥

20

आह—यद्येवं ततः कथममी अचेला भण्यन्ते ? उच्यते—

सीसावेढियपुत्तं, णदिउत्तरणम्मि नग्गयं बेंति ।
जुण्णेहि णग्गियाॅ मी, तुर सालिय ! देहि मे पोत्तिं ॥ ६३६६ ॥

जलतीमनभयात् शीर्षे–शिरसि आवेष्टितं पोतं–परिधानवस्त्रं येन स शीर्षावेष्टितपोतस्तम्, एवंविधं सचेलमपि 'नद्युत्तरणे' अगाधायाः कस्याश्चिद् नद्या उत्तरणं कुर्वन्तं दृष्ट्वा नग्नकं ब्रुवते, 'नग्नोऽयम्' इति लोके वक्तारो भवन्तीत्यर्थः । यथा वा काचिदविरतिका परिजीर्णवस्त्रपरिधाना प्राक्समर्पितवेतनं तन्तुवायं शाटिकानिष्पादनालसं ब्रवीति, यथा—जीर्णैर्वस्त्रैः परिहितैर्नग्निकाऽहमस्मि ततस्त्वरस्व 'हे शालिक !' तन्तुवाय ! देहि मे 'पोतिकां' शाटिकाम् ॥ ६३६६ ॥ अथात्रैवोपनयमाह—

25

30 **जुण्णेहिँ खंडिएहि य, असव्वतणुपाउतेहिँ ण य णिच्चं ।**
संतेहिँ वि णिग्गंथा, अचेलगा होंति चेलेहिं ॥ ६३६७ ॥

---

१ °यसंयतकल्प° कां० ॥ २ 'धुतरजाः' प्रक्षालितसकलपापमलपटलः कल्पो कां० ॥ ३ °कालक्षणोपकरणद्वयसम्भ° कां० ॥ ४ °या मिं, तुर ताभा० ॥

एवं 'जीर्णैः' पुराणैः, 'खण्डितैः' छिन्नैः, 'असर्वतनुप्रावृतैः' स्वल्पप्रमाणतया सर्वस्मिन् शरीरेऽप्रावृतैः प्रमाणहीनैरित्यर्थः, न च 'नित्यं' सदैव प्रावृतैः किन्तु शीतादिकारणसद्भावे, एवंविधैश्चेलैः 'सद्भिरपि' विद्यमानैरपि निर्ग्रन्था अचेलका भवन्ति ॥ ६३६७ ॥

अत्र पराभिप्रायमाशङ्क्य परिहरति—

एवं दुग्गत-पहिता, अचेलगा होंति ते भवे बुद्धी । 5
ते खलु असंततीए, धरेंति ण तु धम्मबुद्धीए ॥ ६३६८ ॥

यदि जीर्ण-खण्डितादिभिर्वस्त्रैः प्रावृतैः साधवोऽचेलकास्तत एवं दुर्गताश्च—दरिद्राः पथिकाश्च—पान्था दुर्गत-पथिकास्तेऽपि[1] अचेलका भवन्तीति 'ते' तव बुद्धिः स्यात् तत्रोच्यते— 'ते खलु' दुर्गत-पथिकाः 'असत्तया' नव-व्यूत-सदशकादीनां वस्त्राणामसम्पत्त्या परिजीर्णादीनि वासांसि धारयन्ति, न पुनर्धर्मबुद्ध्या, अतो भावतस्तद्विषयमूर्च्छापरिणामस्यानिवृत्तत्वान्नैते 10 अचेलकाः; साधवस्तु सति लाभे महाधनादीनि परिहृत्य जीर्ण-खण्डितादीनि धर्मबुद्ध्या धारयन्तीत्यतोऽचेला उच्यन्ते ॥ ६३६८ ॥ यद्येवमचेलास्ततः किम् ? इत्याह—

आचेलक्को धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स ।
मज्झिमगाण जिणाणं, होति अचेलो सचेलो वा ॥ ६३६९ ॥

अचेलकस्य भाव आचेलक्यम्, तदत्रास्तीति आचेलक्यः, अभ्रादेराकृतिगणत्वादप्रत्ययः । 15 एवंविधो धर्मः पूर्वस्य च पश्चिमस्य च जिनस्य तीर्थे भवति । मध्यमकानां तु जिनानामचेलः सचेलो वा भवति ॥ ६३६९ ॥ इदमेव भावयति—

पडिमाएँ पाउता वा, णऽतिक्कमंते उ मज्झिमा समणा ।
पुरिम-चरिमाण अमहद्धणा तु भिण्णा इमे मोत्तुं ॥ ६३७० ॥

'मध्यमाः' मध्यमतीर्थकरसत्काः साधवः 'प्रतिमया वा' नग्नतया 'प्रावृता वा' प्रमाणा- 20 तिरिक्त-महामूल्यादिभिर्वासोभिराच्छादितवपुषो नातिक्रामन्ति भागवतीमाज्ञामिति गम्यते । पूर्व-चरमाणां तु प्रथम-पश्चिमतीर्थकरसाधूनां 'अमहाधनानि' स्वल्पमूल्यानि 'भिन्नानि च' अकृत्स्नानि, प्रमाणोपेतान्यदशकानि चेत्यर्थः, परमिमानि कारणानि मुक्त्वा ॥ ६३७० ॥

तान्येवाह—

आसज्ज खेत्तकप्पं, वासावासे अभाविते असहू । 25
काले अद्धाणम्मि य, सागरि तेणे व पाउरणं ॥ ६३७१ ॥

'क्षेत्रकल्पं' देशविशेषाचारमासाद्याभिन्नान्यपि प्राव्रियन्ते, यथा सिन्धुविषये तादृशानि प्रावृत्य हिण्ड्यते । वर्षावासे वा वर्षाकल्पं प्रावृत्य हिण्ड्यते । 'अभावितः' शैक्षः कृत्स्नानि प्रावृतो हिण्डते यावद् भावितो भवति । असहिष्णुः शीतमुष्णं वा नाधिसोढुं शक्नोति ततः कृत्स्नं प्रावृणुयात् । 'काले वा' प्रत्यूषे भिक्षार्थं प्रविशन् प्रावृत्य निर्गच्छेत् । अध्वनि वा प्रावृता 30 गच्छन्ति । यदि सागारिकप्रतिबद्धप्रतिश्रये[2] स्थितास्ततः प्रावृताः सन्तः कायिकादिभुवं गच्छन्ति । स्तेना वा पथि वर्तन्ते तत उत्कृष्टोपधिं स्कन्धे कक्षायां वा विण्टिकां कृत्वा उपरि

१ °स्तेऽपि जीर्ण-खण्डितादिवस्त्रपरिधायितया अचेल° कां० ॥ २ °बद्धे उपाश्रये भा० ॥

सर्वाङ्गीणं प्रावृता गच्छन्ति। एतेषु कारणेषु कृत्स्नस्योपधेः प्रावरणं कर्तव्यम् ॥ ६३७१ ॥ तथा—

निरुवहय लिंगभेदे, गुरुगा कप्पति तु कारणजाए।
गेलण्ण लोय रोगे, सरीरवेतावडितमादी ॥ ६३७२ ॥

निरुपहतो नाम—नीरोगस्तस्य लिङ्गभेदं कुर्वतश्चतुर्गुरुकाः। अथवा निरुपहतं नाम—यथा-5जातलिङ्गं तस्य भेदे चतुर्गुरु ॥ तस्य च लिङ्गभेदस्येमे भेदाः—

खंधे दुवार संजति, गरुलऽद्धंसे य पट्ट लिंगदुवे।
लहुगो लहुगो लहुगा, तिसु चउगुरु दोसु मूलं तु ॥ ६३७३ ॥

[1]स्कन्धे कल्पं करोति मासलघु। शीर्षद्वारिकां करोति मासलघु। संयतीप्रावरणं करोति चतुर्लघु। गरुडपाक्षिकं प्रावृणोति, अर्धांसकृतं करोति, कटीपट्टकं बध्नाति, एतेषु त्रिष्वपि 10चतुर्गुरु। गृहस्थलिङ्गं परलिङ्गं वा करोति द्वयोरपि मूलम् ॥ ६३७३ ॥

द्वितीयपदे तु—कारणजाते लिङ्गभेदोऽपि कर्तुं कल्पते। कुत्र? इत्याह—ग्लानत्वं कस्यापि विद्यते तस्योद्वर्त्तनमुपवेशनमुत्थापनं वा कुर्वन् कटीपट्टकं बध्नीयात्। लोचं वाऽन्यस्य साधोः कुर्वाणः कटीपट्टकं बध्नाति। "रोगि" त्ति कस्यापि रोगिणोऽर्शांसि लम्बन्ते द्वौ भ्रातरौ वा शूनौ स कटीपट्टकं बध्नीयात्। "सरीरवेयावडियं" ति मृतसंयतशरीरस्य वैयावृत्यं—नीहरणं 15कुर्वन्, आदिग्रहणात् प्रतिश्रयं प्रमार्जयन् अलाबूनि वा विहायसि लम्बमानः कटीपट्टकं बध्नीयात् ॥ ६३७२ ॥ गृहिलिङ्गा-ऽन्यलिङ्गयोरयमपवादः—

असिवे ओमोयरिए, रायदुट्ठे व वादिदुट्ठे वा।
आगाढ अन्नलिंगं, कालक्खेवो व गमणं वा ॥ ६३७४ ॥

स्वपक्षप्रान्ते आगाढे अशिवेऽन्यलिङ्गं कृत्वा तत्रैव कालक्षेपं कुर्वन्ति, अन्यत्र वा 20गच्छन्ति। एवं 'राजद्विष्टे' राज्ञि साधूनामुपरि द्वेषमापन्ने, 'वादिद्विष्टे वा' वादपराजिते क्वापि वादिनि व्यपरोपणादिकं कर्तुकामे, एवंविधे आगाढे कारणेऽन्यलिङ्गम् उपलक्षणत्वाद् गृहिलिङ्गं वा कृत्वा कालक्षेपो वा गमनं वा विधेयम् ॥ ६३७४ ॥

गतमाचेलक्यद्वारम्। अथौद्देशिकद्वारमाह—

आहा अधे य कम्मे, आयाहम्मे य अत्तकम्मे य।
25 **तं पुण आहाकम्मं, कप्पति ण व कप्पती कस्स ॥ ६३७५ ॥**

---

१ इह पूर्वार्द्ध-पश्चार्द्धपदानां यथासङ्ख्यं योजना कार्या। तद्यथा—स्कन्धे चतुष्पलं मुत्कलं वा कल्पं करोति लघुको मासः। शीर्षद्वारिकां-कल्पेन शिरःस्थगनरूपां करोति लघुक एव मासः। संयतीवद्भुावपि बाहू आच्छाद्य प्रावृणोति चतुर्लघुकाः। गरुड-पाक्षिकम्-एकत उभयतो वा स्कन्धोपरि कल्पाञ्चलानामारोपणरूपं प्रावृणोति, अर्धांसकृतम्-उत्तरासङ्गलक्षणं करोति, कटीपट्टकं बध्नाति, एतेषु त्रिष्वपि प्रत्येकं चतुर्गुरु। गृहस्थलिङ्गं परलिङ्गं वा करोति द्वयोरपि मूलम् ॥ ६३७३ ॥

अथात्रैव द्वितीयपदमाह—"कप्पइ उ कारणजाए" इत्यादि अर्द्धव्याख्यातप्राक्तनगाथायाः शेषम्। द्वितीयपदे तु कारणजाते कां० ॥

आधाकर्म अधःकर्म आत्मघ्नम् आत्मकर्म चेति औद्देशिकस्य-साधूनुद्दिश्य कृतस्य भक्तादेश्चत्वारि नामानि । 'तत् पुनः' आधाकर्म कस्य कल्पते ? कस्य वा न कल्पते ? ॥ ६३७५॥

एवं शिष्येण पृष्टे सूरिराह—

संघस्सोह विभाए, समणा-समणीण कुल गणे संघे ।
कडमिह ठिते ण कप्पति, अट्ठित कप्पे जमुद्दिस्स ॥ ६३७६ ॥ 5

अस्या व्याख्या सविस्तरं तृतीयोद्देशके कृता अतोऽत्राक्षरार्थमात्रमुच्यते—ओघतो वा विभागतो वा सङ्घस्य श्रमणानां श्रमणीनां कुलस्य गणस्य सङ्घस्य वा सङ्कल्पेन यद् भक्त-पानादिकं कृतं तत् 'स्थितकल्पिकानां' प्रथम-पश्चिमसाधूनां न कल्पते । ये पुनरस्थितकल्पे स्थिताः तेषां यमुद्दिश्य कृतं तस्यैवैकस्य न कल्पते अन्येषां तु कल्पते ॥ ६३७६ ॥

द्वितीयपदे तु स्थितकल्पिकानामपि कल्पते । यत आह— 10

आयरिए अभिसेए, भिक्खुम्मि गिलाणगम्मि भयणा उ ।
तिक्खुत्तऽडविपवेसे, चउपरियट्टे ततो गहणं ॥ ६३७७ ॥

आचार्येऽभिषेके भिक्षौ वा ग्लाने सञ्जाते सति आधाकर्मणो 'भजना' सेवनाऽपि क्रियते । तथा अटवी—विप्रकृष्टोऽध्वा तस्यां प्रवेशे कृते यदि शुद्धं न लभ्यते ततः त्रिकृत्वः शुद्धमन्वेषितमपि यदि न लब्धं ततश्चतुर्थे परिवर्ते आधाकर्मणो ग्रहणं कार्यम् ॥ ६३७७ ॥ 15

गतमौद्देशिकद्वारम् । अथ शय्यातरपिण्डद्वारमाह—

तित्थंकरपडिकुट्ठो, आणा अण्णात उग्गमो ण सुज्झे ।
अविमुत्ति अलाघवता, दुल्लभ सेज्जा विउच्छेदो ॥ ६३७८ ॥

आद्यन्तवर्जैर्मध्यमैर्विदेहजैश्च[1] तीर्थकरैराधाकर्म कथञ्चिद् भोक्तुमनुज्ञातं न पुनः शय्यातर-पिण्डो अतस्तैः प्रतिकुष्ट इति कृत्वा वर्जनीयोऽयम् । "आण" त्ति तं गृह्णता तीर्थकृतामाज्ञा 20 कृता न भवति । "अण्णाय" त्ति यत्र स्थितस्तत्रैव भिक्षां गृह्णता अज्ञातोञ्छं सेवितं न स्यात् । "उग्गमो न सुज्झे" त्ति आसन्नादिभावतः पुनः पुनस्तत्रैव भिक्षा-पानकादिनिमित्तं प्रविशत उद्गमदोषा न शुध्येयुः । स्वाध्यायश्रवणादिना च प्रीतः शय्यातरः क्षीरादि स्निग्धद्रव्यं ददाति, तच्च गृह्णता 'अविमुक्तिः' गार्ध्याभावो न कृतः स्यात् । शय्यातर-तत्पुत्र-भ्रातृव्यादिभ्यो[2] बहू-पकरणं स्निग्धाहारं च गृह्णत उपकरण-शरीरयोर्लाघवं न स्यात् । तत्रैव चाहारादि गृह्णतः शय्या- 25 तरवैमनस्यादिकरणात् शय्या दुर्लभा स्यात्, सर्वथा तद्व्यवच्छेदो वा स्यात् । अतस्तत्पिण्डो वर्जनीयः ॥ ६३७८ ॥ अथ द्वितीयपदमाह—

दुविहे गेलण्णम्मि, निमंतणे दव्वदुल्लभे असिवे ।
ओमोदरिय पओसे, भए य गहणं अणुण्णातं ॥ ६३७९ ॥

'द्विविधे' आगाढा-ऽनागाढे ग्लानत्वे शय्यातरपिण्डोऽपि ग्राह्यः । तत्रागाढे क्षिप्रमेव 30 अनागाढे पञ्चकपरिहाण्या मासलघुके प्राप्ते सतीति । 'निमन्त्रणे च' शय्यातरनिर्बन्धे सकृत् तं गृहीत्वा पुनः पुनः प्रसङ्गो निवारणीयः । दुर्लभे च क्षीरादिद्रव्येऽन्यत्रालभ्यमाने तथाऽशिवेऽ-

---

[1] °ताः मध्यमसाधवो महाविदेहवर्त्तिसाधवश्च तेषां कां० ॥ [2] °तृ-बन्ध्वादि° डे० ॥

अवमौदर्ये राजप्रद्वेषे तस्करादिभये च शय्यातरपिण्डस्य ग्रहणमनुज्ञातम् ॥ ६३७९ ॥

अत्र दुर्लभद्रव्यग्रहणे विधिमाह—

तिक्खुत्तो सक्खेत्ते, चउद्दिसिं जोयणम्मि कडजोगी ।
दव्वस्स य दुल्लभता, सागारिणिसेवणा ताहे ॥ ६३८० ॥

5 त्रिकृत्वः स्वक्षेत्रे चतसृषु दिक्षु सक्रोशयोजने गवेषितस्यापि घृतादेर्द्रव्यस्य यदा दुर्लभता भवति तदा सागारिकपिण्डस्य निषेवणं कर्तव्यम् ॥ ६३८० ॥

गतं सागारिकपिण्डद्वारम् । अथ राजपिण्डद्वारमाह—

केरिसगु त्ति व राया, भेदा पिंडस्स के व से दोसा ।
केरिसगम्मि व कज्जे, कप्पति काए व जयणाए ॥ ६३८१ ॥

10 कीदृशोऽसौ राजा यस्य पिण्डः परिह्रियते ? इति । के वा 'तस्य' राजपिण्डस्य भेदाः ? । के वा "से" तस्य ग्रहणे दोषाः ? । कीदृशे वा कार्ये राजपिण्डो ग्रहीतुं कल्पते ? । कया वा यतनया कल्पते ? । एतानि द्वाराणि चिन्तनीयानि ॥ ६३८१ ॥ तत्र प्रथमद्वारे निर्वचनं तावदाह—

मुइए मुद्धभिसित्ते, मुतितो जो होइ जोणिसुद्धो उ ।
अभिसित्तो व परेहिं, सतं व भरहो जहा राया ॥ ६३८२ ॥

15 राजा चतुर्द्धा—मुदितो मूर्धाभिषिक्तश्च १ मुदितो न मूर्धाभिषिक्तः २ न मुदितो मूर्धाभिषिक्तः ३ न मुदितो न मूर्धाभिषिक्तः । तत्र मुदितो नाम—यो भवति 'योनिशुद्धः' शुद्धोभयपक्षसम्भूतः, यस्य माता-पितरौ राजवंशीयाविति भावः । यः पुनः 'परेण'[1] मुकुटबद्धेन पट्टबद्धेन राज्ञो[2] प्रजया वा राज्येऽभिषिक्तः । यो वा 'स्वयं' आत्मनैवाभिषिक्तो यथा भरतो राजा एष मूर्धाभिषिक्त उच्यते ॥ ६३८२ ॥ एषु[3] विधिमाह—

20 **पढमग भंगे वज्जो, होतु व मा वा वि जे तहिं दोसा ।**
सेसेसु होतऽपिंडो, जहिं दोसा ते विवज्जंति ॥ ६३८३ ॥

प्रथमे भङ्गे राजपिण्डः 'वर्ज्यः' परित्यक्तव्यः, ये 'तत्र' राजपिण्डे गृह्यमाणे दोषास्ते भवन्तु वा मा वा तथापि वर्जनीयः । 'शेषेषु' त्रिषु भङ्गेषु 'अपिण्डः' राजपिण्डो न भवति तथापि येषु दोषा भवन्ति 'तान्' द्वितीयादीनपि भङ्गान् वर्जयन्ति । इयमत्र भावना—यः 25 सेनापति-मन्त्रि-पुरोहित-श्रेष्ठि-सार्थवाहसहितो राज्यं भुङ्क्ते तस्य पिण्डो वर्जनीयः, अन्यत्र तु भजनेति ॥ ६३८३ ॥

गतं 'कीदृशो राजा ?' इति द्वारम् । अथ 'के तस्य भेदाः ?' इति द्वारं चिन्तयन्नाह—

असणाईआ चउरो, वत्थे पादे य कंबले चेव ।
पाउंछणए य तहा, अट्ठविधो रायपिंडो उ ॥ ६३८४ ॥

30 'अशनादयः' अशन-पान-खादिम-स्वादिमरूपा ये चत्वारो भेदाः ४ यच्च वस्त्रं ५ पात्रं ६

---

१ परेणं इति पाठानुसारेण टीका, न चासौ पाठः कस्मिंश्चिदप्यादर्शे उपलभ्यते । कां० पुस्तके तु परेणं इति परेहिं इति पाठद्वयानुसारेण टीका, दृश्यतां टिप्पणी २ ॥ २ °ज्ञा 'परैर्वा' प्रधानपुरुषै राज्येऽभिषिक्तः स मूर्धाभिषिक्तः, यो वा स्वयं कां० ॥ ३ एतेषु चतुर्ष्वपि भङ्गेषु विधि° कां० ॥

कम्बलं ७ 'पादप्रोञ्छनकं' रजोहरणं ८ एषोऽष्टविधो राजपिण्डः ॥ ६३८४ ॥

अथ 'के तस्य दोषाः ?' इति द्वारमाह—

अट्ठविह रायपिंडे, अण्णतरागं तु जो पडिग्गाहे ।
सो आणा अणवत्थं, मिच्छत्त विराहणं पावे ॥ ६३८५ ॥

अष्टविधे राजपिण्डे 'अन्यतरत्' अशनादिकं यः प्रतिगृह्णाति स साधुराज्ञाभङ्गमनवस्थां 5 मिथ्यात्वं विराधनां च प्राप्नुयात् ॥ ६३८५ ॥ एते चापरे दोषाः—

ईसर-तलवर-माडंबिएहि सिट्ठीहिँ सत्थवाहेहिं ।
णिंतेहिँ अतिंतेहि य, वाघातो होति भिक्खुस्स ॥ ६३८६ ॥

ईश्वर-तलवर-माडम्बिकैः श्रेष्ठिभिः सार्थवाहैश्च निर्गच्छद्भिः 'अतियद्भिश्च' प्रविशद्भिर्भिक्षोर्भिक्षार्थं प्रविष्टस्य व्याघातो भवति ॥ ६३८६ ॥ एतदेव व्याचष्टे— 10

ईसर भोइयमाई, तलवरपट्टेण तलवरो होति ।
वेट्टणबद्धो सेट्ठी, पच्चंतऽहिवो उ माडंबी ॥ ६३८७ ॥

ईश्वरः 'भोगिकादिः' ग्रामस्वामिप्रभृतिक उच्यते । यस्तु परितुष्टनृपतिप्रदत्तेन सौवर्णेन तलवरपट्टेनाङ्कितशिराः स तलवरो भवति । श्रीदेवताध्यासितः पट्टो वेष्टनकमुच्यते, तद् यस्य राज्ञाऽनुज्ञातं स वेष्टनकबद्धः श्रेष्ठी । यस्तु 'प्रत्यन्ताधिपः' छिन्नमडम्बनायकः स माडम्बिकः । 15 सार्थवाहः प्रतीत इति कृत्वा न व्याख्यातः ॥ ६३८७ ॥[1]

जा णिंति इंति ता अच्छओ अ सुत्तादि-भिक्खहाणी य ।
इरिया अमंगलं ति य, पेल्लाऽऽहणणा इयरहा वा ॥ ६३८८ ॥

एते ईश्वरादयो यावद् निर्गच्छन्ति प्रविशन्ति च तावद् असौ साधुः प्रतीक्षमाण आस्ते, तत एवमासीनस्य सूत्रार्थयोर्भैक्षस्य च परिहाणिर्भवति । अश्व-हस्त्यादिसम्मर्देन चेर्यां 20 शोधयितुं न शक्नोति । अथ शोधयति ततस्तैरभिघातो भवति । कोऽपि निर्गच्छन् प्रविशन् वा तं साधुं विलोक्यामङ्गलमिति मन्यमानस्तेनैवाश्व-हस्त्यादिना प्रेरणं कशादिना वाऽऽहननं कुर्यात् । "इतरहा व" त्ति यद्यपि कोऽप्यमङ्गलं न मन्यते तथापि जनसम्मर्दे प्रेरणमाहननं वा यथाभावेन भवेत् ॥ ६३८८ ॥ किञ्च—

लोभे एसणघाते, संका तेणे नपुंस इत्थी य । 25
इच्छंतमणिच्छंते, चाउम्मासा भवे गुरुगा ॥ ६३८९ ॥

राजभवनप्रविष्टः 'लोभे' उत्कृष्टद्रव्यलोभवशत एषणाघातं कुर्यात् । 'स्तेनोऽयम्' इत्यादिका च शङ्का राजपुरुषाणां भवेत् । नपुंसकः स्त्रियो वा तत्र निरुद्धेन्द्रियाः साधुमुपसर्गयेयुः । तत्र चेच्छतोऽनिच्छतश्च संयमविराधनादयो बहवो दोषाः । राजभवनं च प्रविशतः शुद्धशुद्धेनाऽपि चत्वारो मासा गुरुकाः प्रायश्चित्तम् ॥ ६३८९ ॥ एनामेव गाथां व्याख्यानयति— 30

अन्नत्थ एरिसं दुल्लभं ति गेण्हेज्जऽणेसणिज्जं पि ।

---

१ अथ तैर्यथा व्याघातो भवति तथा दर्शयति इत्यवतरणं कां० ॥ २ तावऽच्छए उ सुत्ता° ताभा० ॥

अण्णेणावि अवहिते, संकिज्जति एस तेणो त्ति ॥ ६३९० ॥

अन्तःपुरिकाभिरुत्कृष्टं द्रव्यं दीयमानं दृष्ट्वा 'नास्त्यन्यत्रेदृशम्, दुर्लभं वा' इति लोभवशतोऽनेषणीयमपि गृह्णीयात्। राज्ञश्च विप्रकीर्णे सुवर्णादौ द्रव्येऽन्येनाप्यपहृते स एव साधुः शङ्क्यते एष स्तेन इति ॥ ६३९० ॥

5 **संका चारिग चोरे, मूलं निस्संकियम्मि अणवट्ठो ॥**
परदारि अभिमरे वा, णवमं णिस्संकिए दसमं ॥ ६३९१ ॥

चारिकोऽयं चौरो वाऽयं भविष्यति इति शङ्कायां मूलम् । निःशङ्किते अनवस्थाप्यम् । पारदारिकशङ्कायामभिमरशङ्कायां च 'नवमम्' अनवस्थाप्यम्। निःशङ्किते 'दशमं' पाराञ्चिकम् ॥ ६३९१ ॥

10 **अलभंता पवियारं, इत्थि-नपुंसा बला वि गेण्हेज्जा ।**
आयरिय कुल गणे वा, संघे व करेज्ज पत्थारं ॥ ६३९२ ॥

तत्र 'प्रविचारं' बहिर्निर्गममलभमानाः स्त्री-नपुंसका बलादपि साधुं गृह्णीयुः । तान् यदि प्रतिसेवते तदा चारित्रविराधना । अथ न प्रतिसेवते तदा ते उड्डाहं कुर्युः । ततः प्रान्तापनादयो दोषाः । अथवा राजा रुष्ट आचार्यस्य कुलस्य गणस्य वा सङ्घस्य वा 'प्रस्तारं' 15 विनाशं कुर्यात् ॥ ६३९२ ॥

अण्णे वि होंति दोसा, आइण्णे गुम्म रतणमादीया ।
तण्णिस्साएँ पवेसो, तिरिक्ख मणुया भवे दुट्ठा ॥ ६३९३ ॥

अन्येऽपि तत्र प्रविष्टस्य दोषा भवन्ति। तद्यथा—रत्नादिभिराकीर्णे "गुम्म" त्ति 'गौल्मिकाः' स्थानपालास्ते 'अतिभूमिं प्रविष्टः' इति कृत्वा तं साधुं गृह्णन्ति प्रान्तापयन्ति वा, एवमादयो 20 दोषाः। अथवा 'तन्निश्रया' तस्य—साधोर्निश्रया रत्नादिमोषणार्थं स्तेनकाः प्रवेशं कुर्युः। 'तिर्यञ्चः' वानरादयः 'मनुजाश्च' म्लेच्छादयो दुष्टास्तत्र राजभवने भवेयुस्ते साधोरुपद्रवं कुर्वीरन् ॥ ६३९३॥

एनामेव **निर्युक्तिगाथां** व्याख्याति—

आइण्णे रतणादी, गेण्हेज्ज सयं परो व तन्निस्सा ।
गोम्मिय गहणाऽऽहणणं, रण्णो व णिवेदिए जं तु ॥ ६३९४ ॥

25 रत्नादिभिराकीर्णे स प्रविष्टः स्वयमेव तद् रत्नादिकं गृह्णीयात्, परो वा तन्निश्रया गृह्णीयात्। गौल्मिकाश्च ग्रहणमाहननं वा कुर्युः। राज्ञो वा ते तं साधुं निवेदयन्ति उपढौकयन्ति ततो निवेदिते सति 'यत्' प्रान्तापनादिकमसौ करिष्यति तन्निष्पन्नं प्रायश्चित्तम् ॥ ६३९४ ॥

चारिय चोराऽभिमरा, कामी व विसंति तत्थ तण्णीसा ।
वाणर-तरच्छ-वग्घा, मिच्छादि णरा व घातेज्जा ॥ ६३९५ ॥

30 चारिकाश्चौरा अभिमराः कामिनो वा तत्र तस्य—साधोर्निश्रया प्रविशेयुः। तथा वानर-तरक्षु-

१ 'चारिकाः' हेरिकाः 'चौराः' स्तेनाः 'अभिमराः' घातकाः 'कामिनो वा' अन्तःपुरलुब्धाः, एते 'तत्र' राजभवने तस्य-साधो° कां० ॥

व्याघ्रा म्लेच्छादयो वा नरास्तत्र साधुं घातयेयुः ॥ ६३९५ ॥

अथ कीदृशे कार्ये कल्पते ? कया वा यतनया ? इति द्वारद्वयमाह—

दुविहे गेलण्णम्मी, णिमंतणे दव्वदुल्लभे असिवे ।
ओमोयरिय पदोसे, भए य गहणं अणुण्णायं ॥ ६३९६ ॥
तिक्खुत्तो सक्खित्ते, चउद्दिसिं जोयणम्मि कडजोगी । 5
दव्वस्स य दुल्लभया, जयणाए कप्पई ताहे ॥ ६३९७ ॥

गाथाद्वयं शय्यातरपिण्डवद् द्रष्टव्यम् (गा० ६३७९-८०) । नवरम् आगाढे ग्लानत्वे क्षिप्रमेव राजपिण्डं गृह्णाति । अनागाढे तु त्रिकृत्वो मार्गयित्वा यदा न लभ्यते तदा पञ्चकपरिहाण्या चतुर्गुरुकप्राप्तो गृह्णाति । 'निमन्त्रणे तु' राज्ञा निर्बन्धेन निमन्त्रितो भणति—यदि भूयो न भणसि ततो गृह्णीमो वयम् नान्यथा । अवमेऽशिवे चान्यत्रालभ्यमाने राजकुलं वा 10 नाशिवेन गृहीतं ततस्तत्र गृह्णाति । राजद्विष्टे तु अपरस्मिन् राज्ञि कुमारे वा प्रद्विष्टे बोधिक-म्लेच्छभये वा राज्ञो गृहादनिर्गच्छन् गृह्णीयात् ॥ ६३९६ ॥ ६३९७ ॥

गतं राजपिण्डद्वारम् । अथ कृतिकर्मद्वारमाह—

कितिकम्मं पि य दुविहं, अब्भुट्ठाणं तहेव वंदणगं ।
समणेहि य समणीहि य, जहारिहं होति कायव्वं ॥ ६३९८ ॥ 15

कृतिकर्मापि च द्विविधम्—अभ्युत्थानं तथैव वन्दनकम् । एतच्च द्विविधमपि तृतीयोद्देशके सविस्तरं व्याख्यातम् । उभयमपि च श्रमणैः श्रमणीभिश्च 'यथार्हं' यथारत्नाधिकं परस्परं कर्तव्यम् ॥ ६३९८ ॥ तथा श्रमणीनामयं विशेषः—

सव्वाहिँ संजतीहिं, कितिकम्मं संजताण कायव्वं ।
पुरिसुत्तरितो धम्मो, सव्वजिणाणं पि तित्थम्मि ॥ ६३९९ ॥ 20

सर्वाभिरपि[2] संयतीभिश्चिरप्रव्रजिताभिरपि संयतानां तद्दिनदीक्षितादीनामपि कृतिकर्म[3] कर्तव्यम् । कुतः ? इत्याह—'सर्वजिनानामपि' सर्वेषामपि तीर्थकृतां तीर्थे पुरुषोत्तरो धर्म इति ॥ ६३९९ ॥

तुच्छत्तणेण गव्वो, जायति ण य संकते परिभवेणं ।
अण्णो वि होज्ज दोसो, थियासु माहुज्जहज्जासु ॥ ६४०० ॥ 25

स्त्रियाः साधुना वन्द्यमानायास्तुच्छत्वेन गर्वो जायते । गर्विता च साधुं परिभवबुद्ध्या पश्यति । ततः परिभवेन 'न च' नैव साधोः 'शङ्कते' बिभेति । अन्योऽपि दोषः स्त्रीषु 'माधुर्यहार्यासु' मार्दवग्राह्यासु वन्द्यमानासु भवति, भावसम्बन्ध इत्यर्थः ॥ ६४०० ॥

अवि य हु पुरिसपणीतो, धम्मो पुरिसो य रक्खिउं सत्तो ।
लोगविरुद्धं चेयं, तम्हा समणाण कायव्वं ॥ ६४०१ ॥ 30

---

१ °युः । यत एवं ततो न ग्रहीतव्यो राजपिण्डः ॥ ६३९५ ॥ कां० ॥ २ 'सर्वाभिरपि' प्रथम-पश्चिम-मध्यमतीर्थकरसम्बन्धिनीभिः संयतीभि° कां० ॥ ३ 'कृतिकर्म' वन्दनका-ऽभ्युत्थानलक्षणं द्विविधमपि कर्त्त° कां० ॥

'अपि च' इति कारणान्तराभ्युच्चये । पुरुषैः–तीर्थकर-गणधरलक्षणैः प्रणीतः पुरुषप्रणीतो धर्मः । पुरुष एव च तं धर्मं 'रक्षितुं' प्रत्यनीकादिनोपद्रूयमाणं पालयितुं शक्तः । लोकविरुद्धं च 'एतत्' पुरुषेण स्त्रिया वन्दनम् । तस्मात् श्रमणानां ताभिः कर्तव्यम् ॥ ६४०१ ॥

गतं कृतिकर्मद्वारम् । अथ व्रतद्वारमाह—

5 **पंचायामो धम्मो, पुरिमस्स य पच्छिमस्स य जिणस्स ।**
मज्झिमगाण जिणाणं, चाउज्जामो भवे धम्मो ॥ ६४०२ ॥

पञ्च यामाः–व्रतानि यत्र स पञ्चयामः, "दीर्घ-ह्रस्वौ मिथो वृत्तौ" (सिद्ध० ८–१–४) इति प्राकृतलक्षणवशात् चकारस्य दीर्घत्वम् । एवंविधो धर्मः पूर्वस्य च पश्चिमस्य च जिनस्य । मध्यमकानां जिनानां पुनश्चतुर्यामो धर्मो भवति, मैथुनव्रतस्य परिग्रहव्रत एवान्तर्भाव-10 विवक्षणात् ॥ ६४०२ ॥ कुत एवम्? इति चेद् उच्यते—

पुरिमाण दुव्विसोज्झो, चरिमाणं दुरणुपालओ कप्पो ।
मज्झिमगाण जिणाणं, सुविसोज्झो सुरणुपालो य ॥ ६४०३ ॥

पूर्वेषां साधूनां दुर्विशोध्यः कल्पः, 'चरमाणां' पश्चिमानां दुरनुपाल्यः, मध्यमकानां तु जिनानां तीर्थे साधूनां सुविशोध्यः सुखानुपाल्यश्च भवति । इयमत्र भावना—पूर्वे साधव 15 ऋजु-जडाः, ततः परिग्रहव्रत एवान्तर्भावं विवक्षित्वा यदि मैथुनव्रतं साक्षान्नोपदिश्यते ततस्ते जडतया नेदमवबुध्यन्ते, यथा—मैथुनमपि परिहर्तव्यम्; यदा तु पृथक् परिस्फुटं मैथुनं प्रतिषिध्यते ततः सुखेनैव पर्यवस्यन्ति परिहरन्ति च । पश्चिमास्तु वक्र-जडाः, ततो मैथुने साक्षादप्रतिषिद्धे परिग्रहान्तस्तदन्तर्भावं जानन्तोऽपि वक्रतया परपरिगृहीतायाः स्त्रियाः प्रतिसेवनां कुर्वीरन्, पृष्टाश्च ब्रवीरन्—नैषाऽस्माकं परिग्रह इति । तत एतेषां पूर्व-पश्चिमानां पञ्चयामो 20 धर्मो भगवता ऋषभस्वामिना वर्द्धमानस्वामिना च स्थापितः । ये तु मध्यमाः साधवस्ते ऋजु-प्राज्ञाः, ततः परिग्रहे प्रतिषिद्धे प्राज्ञत्वेनोपदेशमात्रादपि अशेषहेयोपादेयविशेषाभ्यूहन-पटीयस्तया चिन्तयेयुः—नापरिगृहीता स्त्री परिभुज्यते अतो मैथुनमपि न वर्तते सेवितुम्; एवं मैथुनं परिग्रहेऽन्तर्भाव्य तथैव परिहरन्ति ततस्तेषां चतुर्यामो धर्मो मध्यमजिनैरुक्त इति ॥ ६४०३ ॥ अमुमेवार्थं समर्थयन्नाह—

25 **जडुत्तणेण हंदिं, आइक्ख-विभाग-उवणता दुक्खं ।**
सुहसमुदिय दंताण व, तितिक्ख अणुसासणा दुक्खं ॥ ६४०४ ॥

सर्वेषां (पूर्वेषां) साधूनां जडतया 'हन्दि' इत्युपप्रदर्शने वस्तुतत्त्वस्याख्यानं 'दुःखं' कृच्छ्रेण, महता वचनाटोप (ग्र० ९०००) प्रयासेन कर्तुं शक्यमित्यर्थः । एवमाख्यातेऽपि वस्तुतत्त्वे विभागः–पार्थक्येन व्यवस्थापनं महता कष्टेन कर्तुं शक्यते । विभक्तेऽपि वस्तुतत्त्वे 30 उपनयः–हेतु-दृष्टान्तैः प्रतीतावारोपणं कर्तुं दुःशकम् । ते च प्रथमतीर्थकरसाधवः 'सुखसमु-

१ 'श्रमणानां' साधूनां संयतीभिः कृतिकर्म कर्त्त° कां० ॥ २ चकाराकारस्य कां० ॥ ३ सुहणु° ताभा० ॥ ४ 'पूर्वेषां' प्रथमतीर्थकरसम्बन्धिनां साधूनां दुर्विशोधः कल्पः, 'चरमाणां' चरमतीर्थकरसाधूनां दुरनुपालो भवति । मध्य° कां० ॥

दिताः' कालस्य स्निग्धतया शीतोष्णादीनां तथाविधदुःखहेतूनामभावात् सुखेन सम्पूर्णास्ततः 'तितिक्षा' परीषहादेरधिसहनं तेषां 'दुःखं' दुष्करम् । तथा दान्ताः—एकान्तेनोपशान्तास्ते ततः क्वचित् प्रमादस्खलितादौ शिष्यमाणानामनुशासनाऽपि कर्तुं दुःशका ॥ ६४०४ ॥

मिच्छत्तभावियाणं, दुवियड्डमतीण वामसीलाणं ।
आइक्खिउं विभइउं, उवणेउं वा वि दुक्खं तु ॥ ६४०५ ॥ 5
दुक्खेहि भंत्थितार्ण, तणु-धितिअबलत्तओ य दुतितिक्खं ।
एमेव दुरणुसासं, माणुक्कडओ य चरिमाणं ॥ ६४०६ ॥

ये तु चरमतीर्थकरसाधवस्ते प्रायेण मिथ्यात्वभाविता दुर्विदग्धमतयो वामशीलाश्च, ततस्तेषामपि वस्तुतत्त्वमाख्यातुं विभक्तुमुपनेतुं वा 'दुःखं' दुःखतरम् ॥ ६४०५ ॥

तथा कालस्य रूक्षतया 'दुःखैः' विविधाऽऽधि-व्याधिप्रभृतिभिः शारीर-मानसैः 'भर्त्सितानाम्' 10 अत्यन्तमुपतापितानां तनुः—शरीरं धृतिः—मानसोऽवष्टम्भः तद्विषयं यद् अबलत्वं—बलाभावस्ततः कारणाद् दुस्तितिक्षं तेषां परीषहादिकं भवति । एवमेव मानस्य—अहङ्कारस्य उपलक्षणत्वात् क्रोधादेश्चोत्कटतया दुरनुशासं चरमाणां भवति, उत्कटकषायतया दुःखेनानुशासनां ते प्रपद्यन्त इत्यर्थः । अत एषां पूर्वेषां च पञ्चयामो धर्म इति प्रक्रमः ॥ ६४०६ ॥

एए चेव य ठाणा, सुप्पण्णुज्जुत्तणेण मज्झाणं । 15
सुह-दुह-उभयबलाण य, विमिस्सभावा भवे सुगमा ॥ ६४०७ ॥

'एतान्येव' आख्यानादीनि स्थानानि मध्यमानां 'सुगमानि' सुकराणि भवेयुरिति सम्बन्धः । कुतः ? इत्याह—सुप्रज्ञ-ऋजुत्वेन, प्राज्ञतया ऋजुतया चेत्यर्थः, स्वल्पप्रयत्नेनैव प्रज्ञापनीयास्ते, तत आख्यान-विभजनोपनयनानि सुकराणि । "सुह-दुह" त्ति कालस्य स्निग्ध-रूक्षतया सुख-दुःखे उभे अपि तेषां भवतः, तथा "उभयबलाण य" त्ति शारीरं मानसिकं चोभयमपि 20 बलं तेषां भवति, तत एव सुख-दुःखोभयबलोपेतानां परीषहादिकं सुतितिक्षं भवति । "विमिस्सभाव" त्ति नैकान्तेनोपशान्ता न वा उत्कटकषायास्ते, ततो विमिश्रभावादनुशासनमपि सुकरमेव तेषां भवति, अतश्चतुर्यामस्तेषां धर्म इति ॥ ६४०७ ॥

गतं व्रतद्वारम् । अथ ज्येष्ठद्वारमाह—

पुव्वतरं सामइयं, जस्स कयं जो वतेसु वा ठविओ । 25
एस कितिकम्मजेट्ठो, ण जाति-सुततो दुपक्खे वी ॥ ६४०८ ॥

यस्य सामायिकं 'पूर्वतरं' प्रथमतरं 'कृतम्' आरोपितम् यो वा 'व्रतेषु' महाव्रतेषु प्रथमं स्थापितः स एष कृतिकर्मज्येष्ठो भण्यते, न पुनः 'द्विपक्षेऽपि' संयतपक्षे संयतीपक्षे च जातितः—बृहत्तरं जन्मपर्यायमङ्गीकृत्य श्रुततः—प्रभूतं श्रुतमाश्रित्य ज्येष्ठ इहाधिक्रियते । इह च मध्यमसाधूनां यस्य सामायिकं पूर्वतरं स्थापितं स ज्येष्ठः, पूर्व-पश्चिमानां तु यस्य प्रथममुपस्थापना 30 कृता स ज्येष्ठ इति ॥ ६४०८ ॥ अथोपस्थापनामेव निरूपयितुमाह—

सा जेसि उवट्ठवणा, जेहि य ठाणेहिँ पुरिम-चरिमाणं ।

---

१ भक्छियाणं ताभा० ॥

पंचायामे धम्मे, आदेसतिगं च मे सुणसु ॥ ६४०९ ॥

सा उपस्थापना येषां भवति ते वक्तव्याः । येषु वा 'स्थानेषु' अपराधपदेषु पूर्व-चरमाणां साधूनां पञ्चयामे धर्मे स्थितानामुपस्थापना भवति तान्यपि वक्तव्यानि । तत्र येषामुपस्थापना ते तावदभिधीयन्ते, तत्रादेशत्रयम्—दश वा षड् वा चत्वारो वा उपस्थापनायामर्हा भवन्ति ।
5 तच्चाऽऽदेशत्रिकं "मे" इति मया यथाक्रमं वक्ष्यमाणं शृणु ॥ ६४०९ ॥

तओ पारंचिया वुत्ता, अणवट्ठा य तिण्णि उ ।
दंसणम्मि य वंतम्मि, चरित्तम्मि य केवले ॥ ६४१० ॥
अदुवा चियत्तकिच्चे, जीवकाए समारभे ।
सेहे दसमे वुत्ते, जस्स उवट्ठावणा भणिया ॥ ६४११ ॥

10 ये चतुर्थोद्देशके 'त्रयः' दुष्ट-प्रमत्त-अन्योन्यंकुर्वाणाख्याः पाराञ्चिका उक्ताः ३ ये च 'त्रयः' साधर्मिका-ऽन्यधार्मिकस्तैन्यकारि-हस्ताताडरूपा अनवस्थाप्याः ६ येन च 'दर्शनं' सम्यक्त्वं 'केवलं' सम्पूर्णमपि वान्तं ७ येन वा चारित्रं 'केवलं' सम्पूर्णं मूलगुणविराधनया वान्तम् ८ ॥ ६४१० ॥

अथवा यः 'त्यक्तकृत्यः' परित्यक्तसकलसंयमव्यापारः आकुट्टिकया दर्पेण वा 'जीवकायान्'
15 पृथिवीकायादीन् समारभते ९, यश्च 'शैक्षः' अभिनवदीक्षितः स दशमः १० उक्तः । एतद् दशकं मन्तव्यं यस्योपस्थापना प्रथम-चरमतीर्थकरैर्भणिता ॥ ६४११ ॥ द्वितीयादेशमाह—

जे य पारंचिया वुत्ता, अणवट्टप्पा य जे विदू ।
दंसणम्मि य वंतम्मि, चरित्तम्मि य केवले ॥ ६४१२ ॥
अदुवा चियत्तकिच्चे, जीवकाए समारभे ।
20 **सेहे छट्ठे वुत्ते, जस्स उवट्ठावणा भणिया ॥ ६४१३ ॥**

ये च पाराञ्चिकाः सामान्यत उक्ताः १ ये च विद्वांसो अनवस्थाप्याः २ येन च दर्शनं केवलं वान्तं ३ येन वा चारित्रं केवलं वान्तम् ४ ॥ ६४१२ ॥

अथवा यस्त्यक्तकृत्यो जीवकायान् समारभते ५ यश्च शैक्षः षष्ठः ६ । एते षट्कं प्रतिपत्तव्यं यस्योपस्थापना द्वितीयादेशे भणिता ॥ ६४१३ ॥ तृतीयादेशमाह—

25 **दंसणम्मि य वंतम्मि, चरित्तम्मि य केवले ।**
चियत्तकिच्चे सेहे य, उवट्ठप्पा य आहिया ॥ ६४१४ ॥

दर्शने 'केवले' निःशेषे वान्ते यो वर्तते १ यो वा चारित्रे केवले वान्ते २ पाराञ्चिका-ऽनवस्थाप्ययोः अत्रैवान्तर्भावो विवक्षितः, यश्च 'त्यक्तकृत्यः' षट्कायविराधकः ३ यश्च शैक्षः ४ एते चत्वारः 'उपस्थाप्याः' उपस्थापनायोग्या आख्याताः ॥ ६४१४ ॥

30 अथ तेषां मध्ये क उपस्थापनीयः ? न वा ? इति चिन्तायामिदमाह—

केवलगहणा कसिणं, जति वमती दंसणं चरित्तं वा ।
तो तस्स उवट्ठवणा, देसे वंतम्मि भयणा तु ॥ ६४१५ ॥

---

१ °णुत ॥ ६४०९ ॥ तद्यथा—तओ कां० ॥ २ °त्यः' दर्पेण षट्का° कां० ॥

दर्शन-चारित्रपदयोर्यत् केवलग्रहणं कृतं तत इदं ज्ञाप्यते—यदि 'कृत्स्नं' निःशेषमपि दर्शनं चारित्रं वा वमति ततस्तस्योपस्थापना भवति, 'देशे' देशतः पुनर्दर्शने चारित्रे वा वान्ते 'भजना' उपस्थापना भवेद्वा न वा ॥ ६४१५ ॥ भजनामेव भावयति—

एमेव य किंचि पदं, सुयं व असुयं व अप्पदोसेणं ।
अविकोवितो कहिंतो, चोदिय आउट्ट सुद्धो तु ॥ ६४१६ ॥　5

'एवमेव' अविमृश्य 'किञ्चिद्' जीवादिकं सूत्रार्थविषयं वा पदं श्रुतं वाऽश्रुतं वा 'अल्पदोषेण' कदाग्रहा-ऽभिनिवेशादिदोषाभावेन 'अविकोविद:' अगीतार्थः कस्यापि पुरतोऽन्यथा कथयन् आचार्यादिना 'मा एवं वितथप्ररूपणां कार्षीः' इति नोदितः सन् यदि सम्यगावर्तते तदा स मिथ्यादुष्कृतप्रदानमात्रेणैव शुद्ध इति ॥ ६४१६ ॥

तच्च दर्शनमनाभोगेनाभोगेन वा वान्तं स्यात्, तत्रानाभोगेन वान्ते विधिमाह—　10

अणाभोएण मिच्छत्तं, सम्मत्तं पुणरागते ।
तमेव तस्स पच्छित्तं, जं मग्गं पडिवज्जई ॥ ६४१७ ॥

एकः श्राद्धो निह्नवान् साधुवेषधारिणो दृष्ट्वा 'यथोक्तकारिणः साधव एते' इतिबुद्ध्या तेषां सकाशे प्रव्रजितः । स चापरैः साधुभिर्भणितः—किमेवं निह्नवानां सकाशे प्रव्रजितः ? । स प्राह—नाहमेनं विशेषं ज्ञातवान् । ततः स मिथ्यादुष्कृतं कृत्वा शुद्धदर्शनिनां समीपे　15 उपसम्पन्नः । एवमनाभोगेन दर्शनं वमित्वा मिथ्यात्वं गत्वा सम्यक्त्वं पुनरागतस्य तदेव प्रायश्चित्तं यदसौ सम्यग् मार्गं प्रतिपद्यते, स एव च तस्य व्रतपर्यायः, न भूय उपस्थापना कर्तव्या ॥ ६४१७ ॥ आभोगेन वान्ते पुनरयं विधिः—

आभोगेण मिच्छत्तं, सम्मत्तं पुणरागते ।
जिण-थेराण आणाए, मूलच्छेज्जं तु कारए ॥ ६४१८ ॥　20

यः पुनः 'आभोगेन' 'निह्नवा एते' इति जानन्नपि मिथ्यात्वं सङ्क्रान्त इति शेषः, निह्नवानामन्तिके प्रव्रजित इत्यर्थः, स च सम्यक्त्वमन्येन प्रज्ञापितः सन् 'पुनर्' भूयोऽपि यदि आगतस्ततस्तं 'जिन-स्थविराणां' तीर्थकर-गणभृतामाज्ञया मूलच्छेद्यं प्रायश्चित्तं कारयेत्, मूलत एवोपस्थापनां तस्य कुर्यादिति भावः ॥ ६४१८ ॥ एवं दर्शने देशतो वान्ते उपस्थापनाभजना भाविता । सम्प्रति चारित्रे देशतो वान्ते तामेव भावयति—　25

छण्हं जीवनिकायाणं, अणप्पज्झो तु विराहओ ।
आलोइय-पडिकंतो, सुद्धो हवति संजओ ॥ ६४१९ ॥

षण्णां जीवनिकायानां "अणप्पज्झो" 'अनात्मवशः' क्षिप्तचित्तादिर्यदि विराधको भवति ततः 'आलोचित-प्रतिक्रान्तः' गुरूणामालोच्य प्रदत्तमिथ्यादुष्कृतः संयतः शुद्धो भवति ॥ ६४१९ ॥

छण्हं जीवनिकायाणं, अप्पज्झो उ विराहतो ।　30
आलोइय-पडिकंतो, मूलच्छेज्जं तु कारए ॥ ६४२० ॥

षण्णां जीवनिकायानां "अप्पज्झो" त्ति स्ववशो यदि दर्पेणाऽऽकुट्टिकया वा विराधको

---

१ °हणं निर्युक्तिकृता कृतं कां० ॥

भवति तत आलोचित-प्रतिक्रान्तं तं मूलच्छेद्यं प्रायश्चित्तं कारयेत्। वाशब्दोपादानाद् यदि तपोऽर्हप्रायश्चित्तमापन्नस्ततः तपोऽर्हमेव दद्यात्, तत्रापि यद् मासलघुकादिकमापन्नस्तदेव दद्यात् ॥ ६४२० ॥ अथ हीनादिकं ददाति ततो दोषा भवन्तीति दर्शयति—

जं जो उ समावन्नो, जं पाउग्गं व जस्स वत्थुस्स ।
5 तं तस्स उ दायव्वं, असरिसदाणे इमे दोसा ॥ ६४२१ ॥

'यत्' तपोऽर्हं छेदार्हं वा प्रायश्चित्तं यः समापन्नः, यस्य वा 'वस्तुनः' आचार्यादेरसहिष्णुप्रभृतेर्वा 'यत्' प्रायश्चित्तं 'प्रायोग्यम्' उचितं तत् तस्य दातव्यम् । अथासदृशम्—अनुचितं ददाति तत इमे दोषाः ॥ ६४२१ ॥

अप्पच्छित्ते य पच्छित्तं, पच्छित्ते अतिमत्तया ।
10 धम्मस्साऽऽसायणा तिव्वा, मग्गस्स य विराहणा ॥ ६४२२ ॥

'अप्रायश्चित्ते' अनापद्यमानेऽपि प्रायश्चित्ते यः प्रायश्चित्तं ददाति प्राप्ते वा प्रायश्चित्ते यः 'अतिमात्रम्' अतिरिक्तप्रमाणं प्रायश्चित्तं ददाति सः 'धर्मस्य' श्रुतधर्मस्य तीव्रामाशातनां करोति, 'मार्गस्य च' मुक्तिपथस्य सम्यग्दर्शनादेः विराधनां करोति ॥ ६४२२ ॥ किञ्च—

उस्सुत्तं ववहरंतो, कम्मं बंधति चिक्कणं ।
15 संसारं च पवड्ढेति, मोहणिज्जं च कुव्वती ॥ ६४२३ ॥

'उत्सूत्रं' सूत्रोत्तीर्णं राग-द्वेषादिना 'व्यवहरन्' प्रायश्चित्तं प्रयच्छन् 'चिक्कणं' गाढतरं कर्म बध्नाति, संसारं च 'प्रवर्द्धयति' प्रकर्षेण वृद्धिमन्तं करोति, 'मोहनीयं च' मिथ्यात्वमोहादिरूपं करोति ॥ ६४२३ ॥ इदमेव सविशेषमाह—

उम्मग्गदेसणाए य, मग्गं विप्पडिवातए ।
20 परं मोहेण रंजिंतो, महामोहं पकुव्वती ॥ ६४२४ ॥

'उन्मार्गदेशनया च' सूत्रोत्तीर्णप्रायश्चित्तादिमार्गप्ररूपणया 'मार्गं' सम्यग्दर्शनादिरूपं विविधैः प्रकारैः प्रतिपातयति—व्यवच्छेदं प्रापयति । तत एवं परमपि मोहेन रञ्जयन् महामोहं प्रकरोति । तथा च त्रिंशति महामोहस्थानेषु पठ्यते—

"नेयाउयस्स मग्गस्स, अवगारम्मि वट्टई ।"

25 (आव० प्रति० अध्य० संग्र० हरि० टीका पत्र ६६१)

यत एवमतो न हीनाधिकं प्रायश्चित्तं दातव्यमिति ॥ ६४२४ ॥ गतं ज्येष्ठद्वारम् । अथ प्रतिक्रमणद्वारमाह—

सपडिक्कमणो धम्मो, पुरिमस्स इ पच्छिमस्स य जिणस्स ।
मज्झिमयाण जिणाणं, कारणजाए पडिक्कमणं ॥ ६४२५ ॥

30 'सप्रतिक्रमणः' उभयकालं षड्विधावश्यककरणयुक्तो धर्मः पूर्वस्य पश्चिमस्य च जिनस्य तीर्थे भवति, तत्तीर्थसाधूनां प्रमादबहुलत्वात् शठत्वाच्च । मध्यमानां तु जिनानां तीर्थे 'कारण-

---

१ °क्रान्तो गुरुसमीपे आलोच्य प्रदत्तमिथ्यादुष्कृतो यदि जायते तदा तं साधुं मूल° कां० ॥ २ °लं नियमेन षड्वि° कां० ॥

जाते' तथाविधेऽपराधे उत्पन्ने सति प्रतिक्रमणं भवति, तत्तीर्थसाधूनामशठत्वात् प्रमादरहितत्वाच्च ॥ ६४२५ ॥ अथास्या एव पूर्वार्द्धं व्याचष्टे—

गमणाऽऽगमण वियारे, सायं पाओ य पुरिम-चरिमाणं ।
नियमेण पडिक्कमणं, अतियारो होउ वा मा वा ॥ ६४२६ ॥

'गमनाऽऽगमने' चैत्यवन्दनादिकार्येषु प्रतिश्रयाद् निर्गत्य हस्तशतात् परतो गत्वा भूयः 5 प्रत्यागमने, "वियारे" त्ति हस्तशतमध्येऽप्युच्चारादेः परिष्ठापने कृते, तथा 'सायं' सन्ध्यायां 'प्रातश्च' प्रभाते पूर्व-चरमाणां साधूनामतिचारो भवतु वा मा वा तथापि नियमेनैतेषु स्थानेषु प्रतिक्रमणं भवति ॥ ६४२६ ॥ परः प्राह—

अतिचारस्स उ असती, णणु होति णिरत्थयं पडिक्कमणं ।
ण भवति एवं चोदग !, तत्थ इमं होति णातं तु ॥ ६४२७ ॥ 10

अतिचारस्य 'असति' अभावे ननु निरर्थकं प्रतिक्रमणं भवति । सूरिराह—हे नोदक ! 'एवं' त्वदुक्तं प्रतिक्रमणस्य निरर्थकत्वं 'न भवति' न घटते, किन्तु सार्थकं प्रतिक्रमणम् । तत्र च सार्थकत्वे इदं 'ज्ञातम्' उदाहरणं भवति ॥ ६४२७ ॥

सति दोसे होअगतो, जति दोसो णत्थि तो गतो होति ।
बितियस्स हणति दोसं, न गुणं दोसं व तदभावा ॥ ६४२८ ॥ 15
दोसं हंतूण गुणं, करेति गुणमेव दोसरहिते वि ।
ततियसमाहिकरस्स उ, रसातणं[1] **डिंडियसुतस्स ॥ ६४२९ ॥**
जति दोसो तं छिंदति, असती दोसम्मि णिज्जरं कुणई ।
कुसलतिगिच्छरसायणमुवणीयमिदं पडिक्कमणं ॥ ६४३० ॥

एगस्स रन्नो पुत्तो अईव वल्लहो । तेण चिंतियं—अणागयं किंचि तहाविहं रसायणं 20 करावेमि जेण मे पुत्तस्स कयाइ रोगो न होइ त्ति । विज्जा सद्दाविया—मम पुत्तस्स तिगिच्छं करेह जेण निरुओ होइ । ते भणंति—करेमो । राया भणइ—केरिसाणि तुम्ह ओसहाणि ? । एगो भणइ—मम ओसहमेरिसं—जइ रोगो अत्थि तो उवसामेइ, अह णत्थि तं चेव जीवंतं मारेइ । बिइओ भणइ—मम ओसहं जइ रोगो अत्थि तो उवसामेइ, अह णत्थि तो न गुणं न दोसं करेइ । तइओ भणइ—जइ रोगो अत्थि तो उवसामेइ, अह णत्थि तो वण्ण-रूव- 25 जोव्वण-लावण्णत्ताए परिणमइ, अपुव्वो य रोगो न पाउब्भवइ । एवमायण्णिऊण रण्णा तइयविज्जेण किरिया कारिया । एवमिमं पि पडिक्कमणं जइ अइयारदोसा अत्थि तो तेसिं विसोहिं करेति, अह नत्थि अइयारो तो चारित्तं विसुद्धं करेइ अभिनवकम्मरोगस्स य आगमं निरुंभइ ॥

अथाक्षरगमनिका—प्रथमवैद्यस्यौषधेन 'सति दोषे' रोगसम्भवे उपयुज्यमानेन 'अगदः' नीरोगो भवति, यदि पुनर्दोषो नास्ति ततः प्रत्युत 'गदः' रोगो भवति । द्वितीयस्य तु वैद्यस्यौषधं[2] 30 'दोषं' रोगं हन्ति, 'तदभावात्' दोषाभावान्न गुणं न वा दोषं करोति ॥

तृतीयस्य तु दोषं हत्वा गुणं करोति, दोषरहितेऽपि च 'गुणमेव' वर्णादिपुष्टयभिनवरोगा-

---

१ °तणं दंडिय° ताभा० ॥ २ °षधमुपयुज्यमानं 'दोषं' कां० ॥

भावात्मकं करोति । ततः 'तृतीयसमाधिकरस्य' तृतीयस्य वैद्यस्य रसायनं दण्डिकसुतस्य योग्यमिति कृत्वा राज्ञा कारितम् ॥

एवं प्रतिक्रमणमपि यदि अतिचारलक्षणो दोषो भवति ततस्तं छिनत्ति, अथ नास्ति दोषस्ततोऽसति दोषे महतीं कर्मनिर्जरां करोति । एवं 'कुशलचिकित्सस्य' तृतीयवैद्यस्य रसायनेन 5 'उपनीतम्' उपनयं प्रापितमिदं प्रतिक्रमणं मन्तव्यम् ॥ ६४२८ ॥ ६४२९ ॥ ६४३० ॥

गतं प्रतिक्रमणद्वारम् । अथ मासकल्पद्वारमाह—

दुविहो य मासकप्पो, जिणकप्पे चेव थेरकप्पे य ।
एक्केको वि य दुविहो, अट्ठियकप्पो य ठियकप्पो ॥ ६४३१ ॥

द्विविधो मासकल्पः, तद्यथा—जिनकल्पे चैव स्थविरकल्पे च । पुनरेकैको द्विविधः— 10 अस्थितकल्पः स्थितकल्पश्च । तत्र मध्यमसाधूनां[1] मासकल्पोऽस्थितः, पूर्व-पश्चिमानां तु स्थितः । ततः पूर्व-पश्चिमाः साधवो नियमाद् ऋतुबद्धे मासं मासेन विहरन्ति । मध्यमानां पुनरनियमः, कदाचिद् मासमपूरयित्वाऽपि निर्गच्छन्ति कदाचित्तु देशोनपूर्वकोटीमप्येकत्र क्षेत्रे आसते ॥ ६४३१ ॥ गतं मासकल्पद्वारम् । अथ पर्युषणाद्वारमाह—

पज्जोसवणाकप्पो, होति ठितो अट्ठितो य थेराणं ।
15 **एमेव जिणाणं पि य, कप्पो ठितमट्ठितो होति ॥ ६४३२ ॥**

पर्युषणाकल्पः स्थविरकल्पिकानां जिनकल्पिकानां च भवति । तत्र स्थविराणां[2] स्थितोऽस्थितश्च भवति । एवमेव जिनानामपि[3] स्थितोऽस्थितश्च पर्युषणाकल्पः प्रतिपत्तव्यः ॥ ६४३२ ॥

इदमेव भावयति—

चाउम्मासुक्कोसे, सत्तरिराइंदिया जहण्णेणं ।
20 **ठितमट्ठितमेगतरे, कारणवच्चासितऽण्णयरे ॥ ६४३३ ॥**

उत्कर्षतः पर्युषणाकल्पश्चतुर्मासं यावद् भवति, आषाढपूर्णिमायाः[4] कार्तिकपूर्णिमां यावदित्यर्थः । जघन्यतः पुनः सप्ततिरात्रिन्दिवानि, भाद्रपदशुक्लपञ्चम्याः[5] कार्तिकपूर्णिमां यावदित्यर्थः । एवंविधे पर्युषणाकल्पे पूर्व-पश्चिमसाधवः स्थिताः । मध्यमसाधवः पुनरस्थिताः । ते हि यदि वर्षारात्रो भवति मेघवृष्टिरित्यर्थः, तत एकत्र क्षेत्रे तिष्ठन्ति अन्यथा तु विहरन्ति । पूर्व- 25 पश्चिमा अपि 'अन्यतरस्मिन्' अशिवादौ कारणे समुत्पन्ने 'एकतरस्मिन्' मासकल्पे पर्युषणाकल्पे वा 'व्यत्यासितं' विपर्यस्तमपि कुर्युः । किमुक्तं भवति ?—अशिवादिभिः कारणैर्ऋतुबद्धे मासमूनमधिकं वा तिष्ठेयुः, वर्षास्वपि तैरेव कारणैश्चतुर्मासमपूरयित्वाऽपि निर्गच्छन्ति परतो वा तत्रैव क्षेत्रे तिष्ठन्ति ॥ ६४३३ ॥ इदमेवाह—[6]

थेराण सत्तरी खलु, वासासु ठितो उडुम्मि मासो उ ।
30 **वच्चासितो तु कज्जे, जिणाण नियमऽट्ठ चउरो य ॥ ६४३४ ॥**

---

१ °नां महाविदेहसाधूनां च मास° कां० ॥ २ °णां स्थविरकल्पिकानां स्थि° कां० ॥ ३ °मपि जिनकल्पिकानां स्थि° कां० ॥ ४ °मात आरभ्य कार्त्ति° कां० ॥ ५ °म्याः प्रारभ्य कार्त्ति° कां० ॥ ६ ग्रन्थाग्रं १०००० कां० ॥

'स्थविराणां' स्थविरकल्पिकानां प्रथम-पश्चिमतीर्थंकरसत्कानां सप्ततिर्दिनानि, खलुशब्दो जघन्यत इत्यस्य विशेषस्य द्योतनार्थः, वर्षासु पर्युषणाकल्पो भवति । तेषामेव ऋतुबद्धे मासमेकमेकत्रावस्थानरूपो मासकल्पः स्थितो भवति । 'कार्ये पुनः' अशिवादौ 'व्यत्यासितः' विपर्यस्तोऽपि भवति, हीनाधिकप्रमाण इत्यर्थः । 'जिनानां तु' प्रथम-चरमतीर्थंकरसत्कजिनकल्पिकानामृतुबद्धे नियमादष्टौ मासकल्पा वर्षासु चत्वारो मासा अन्यूनाधिकाः स्थितकल्पतया 5 मन्तव्याः, निरपवादानुष्ठानपरत्वादेषामिति भावः ॥ ६४३४ ॥

दोसाऽसति मज्झिमगा, अच्छंती जाव पुव्वकोडी वि ।
विचरंति अ वासासु वि, अकद्दमे पाणरहिए य ॥ ६४३५ ॥
भिण्णं पि मासकप्पं, करेंति तणुगं पि कारणं पप्प ।
जिणकप्पिया वि एवं, एमेव महाविदेहेसु ॥ ६४३६ ॥ 10

ये तु 'मध्यमाः' अस्थितकल्पिकाः साधवस्ते दोषाणाम्—अप्रीतिक-प्रतिबन्धादीनां असति—अभावे पूर्वकोटीमप्येकत्र क्षेत्रे आसते । तथा वर्षास्वपि 'अकर्दमे' प्रम्लानचिक्खल्ले प्राणरहिते च भूतले जाते सति 'विचरन्ति' विहरन्ति; ऋतुबद्धेऽपि यदि अप्रीतिकावग्रहो वसतेर्व्याघातो वा भवेत् ॥ ६४३५ ॥

तत एवमादिकं 'तनुकमपि' सूक्ष्ममपि कारणं प्राप्य मासकल्पं भिन्नमपि कुर्वन्ति, अपूर- 15 यित्वा निर्गच्छन्तीत्यर्थः । जिनकल्पिका अपि मध्यमतीर्थंकरसत्का एवमेव मासकल्पे पर्युषणाकल्पे च अस्थिताः प्रतिपत्तव्याः । एवमेव च महाविदेहेषु ये स्थविरकल्पिका जिनकल्पिकाश्च तेऽप्यस्थितकल्पिकाः प्रतिपत्तव्याः ॥ ६४३६ ॥ गतं पर्युषणाकल्पद्वारम् । अथैतस्मिन् दशविधे कल्पे यः प्रमाद्यति तस्य दोषमभिधित्सुराह—

एवं ठियम्मि मेरं, अट्ठियकप्पे य जो पमादेति । 20
सो वट्टति पासत्थे, ठाणम्मि तगं विवज्जेज्जा ॥ ६४३७ ॥

'एवम्' अनन्तरोक्तनीत्या या स्थितकल्पेऽस्थितकल्पे च 'मर्यादा' सामाचारी भणिता तां मर्यादां यः 'प्रमादयति' प्रमादेन परिहापयति सः 'पार्श्वस्थे' पार्श्वस्थसत्के स्थाने वर्तते; ततस्तकं विवर्जयेत्, तेन सह दान-ग्रहणादिकं सम्भोगं न कुर्यादिति भावः ॥ ६४३७ ॥

कुतः? इत्यत आह— 25

पासत्थ संकिलिट्ठं, ठाणं जिण वुत्तं थेरेहि य ।
तारिसं तु गवेसंतो, सो विहारे ण सुज्झति ॥ ६४३८ ॥

'पार्श्वस्थं' पार्श्वस्थसत्कं 'स्थानम्' अपराधपदं 'संक्लिष्टम्' अशुद्धं 'जिनैः' तीर्थकरैः 'स्थविरैश्च' गौतमादिभिः प्रोक्तम्, ततस्तादृशं स्थानं गवेषयन् 'सः' यथोक्तसामाचारीपरिहापयिता विहारे न शुध्यति, नासौ संविग्नविहारीति भावः ॥ ६४३८ ॥ 30

पासत्थ संकिलिट्ठं, ठाणं जिण वुत्तं थेरेहि य ।
तारिसं तु विवज्जेंतो, सो विहारे विसुज्झति ॥ ६४३९ ॥

पार्श्वस्थं स्थानं संक्लिष्टं जिनैः स्थविरैश्च प्रोक्तम्, ततस्तादृशं स्थानं विवर्जयन् 'सः' यथो-

त्कसामाचारीकर्ता विहारे 'विशुध्यति' विशुद्धो भवति ॥ ६४३९ ॥ यतश्चैवमतः—

जो कप्पठितिं एयं, सद्दहमाणो करेति सट्ठाणे ।
तारिसं तु गवेसेज्जा, जतो गुणाणं ण परिहाणी ॥ ६४४० ॥

यः 'एनाम्' अनन्तरोक्तां कल्पस्थितिं श्रद्दधानः स्वस्थाने करोति । स्वस्थानं नाम—स्थित-5कल्पेऽनुवर्तमाने स्थितकल्पसामाचारीम् अस्थितकल्पे पुनरस्थितकल्पसामाचारीं करोति । 'तादृशं' संविग्नविहारिणं साधुं 'गवेषयेत्' तेन सहैकत्र सम्भोगं कुर्यात्, 'यतः' यस्माद् 'गुणानां' मूलगुणोत्तरगुणानां परिहाणिर्न भवति ॥ ६४४० ॥ इदमेव व्यक्तीकर्तुमाह—

ठियकप्पम्मि दसविधे, ठवणाकप्पे य दुविहमण्णयरे ।
उत्तरगुणकप्पम्मि य, जो सरिकप्पो स संभोगो ॥ ६४४१ ॥

10 'स्थितकल्पे' आचेलक्यादौ दशविधे 'स्थापनाकल्पे च' वक्ष्यमाणे द्विविधान्यतरस्मिन् उत्तर-गुणकल्पे च यः 'सदृक्कल्पः' तुल्यसामाचारीकः सः 'सम्भोग्यः' सम्भोक्तुमुचितः ॥ ६४४१ ॥

अत्र दशविधः स्थितकल्पोऽनन्तरमेवोक्तः[2] । स्थापनाकल्पादिपदानि तु व्याख्यातुकाम आह—

ठवणाकप्पो दुविहो, अकप्पठवणा य सेहठवणा य ।
पढमो अकप्पिएणं, आहारादी ण गिण्हावे ॥ ६४४२ ॥

15 स्थापनाकल्पो द्विविधः—अकल्पस्थापनाकल्पः शैक्षस्थापनाकल्पश्च । तत्र 'अकल्पिकेन' अनधीतपिण्डैषणादिसूत्रार्थेन आहारादिकं 'न ग्राहयेत्' नाऽऽनाययेत्, तेनानीतं न कल्पत इत्यर्थः । एष प्रथमोऽकल्पस्थापनाकल्प उच्यते ॥ ६४४२ ॥

अट्ठारसेव पुरिसे, वीसं इत्थीओ दस णपुंसा य ।
दिक्खेति जो ण एते, सेहट्ठवणाएँ सो कप्पो ॥ ६४४३ ॥

20 अष्टादश भेदाः 'पुरुषे' पुरुषविषयाः, विंशतिः स्त्रियः, दश नपुंसकाः, एतानष्टचत्वारिं-शतमनलान् शैक्षान् यो न दीक्षते स[3] एष कल्प-कल्पवतोरभेदात् शैक्षस्थापनाकल्प उच्यते ॥ ६४४३ ॥

आहार-उवहि-सेज्जा, उग्गम-उप्पादणेसणासुद्धा ।
जो परिगिण्हति णिययं, उत्तरगुणकप्पिओ स खलु ॥ ६४४४ ॥

25 य आहारोपधि-शय्या उद्गमोत्पादनैषणाशुद्धाः 'नियतं' निश्चितं परिगृह्णाति स खलूत्तर-गुणकल्पिको[4] मन्तव्यः ॥ ६४४४ ॥ एतेषु सदृशकल्पेन सह किं कर्तव्यम्? इत्याह—

---

१ 'दशविधे' दशप्रकारे 'स्थापनाकल्पे च' वक्ष्यमाणलक्षणे 'द्विविधान्यतरस्मिन्' द्वयोः प्रकारयोरेकतरस्मिन् तथा 'उत्तरगुणकल्पे च' पिण्डविशुद्ध्यादौ यः 'सदृक्कल्पः' कां० ॥ २ °क्तः । अतः स्थापनाकल्पादिपदानि शेषाणि यथाक्रमं व्याख्या° कां० ॥ ३ स एषः 'शैक्षस्थापनायां' योग्या-ऽयोग्यशैक्षदीक्षणा-ऽदीक्षणव्यवहाररूपायां 'कल्प्यः' कल्पिक उच्यते, अर्थात् तद्विषयो य आचारः स शैक्षस्थापनाकल्पः ॥ ६४४३ ॥ उक्तो द्विविधोऽपि स्थापनाकल्पः । सम्प्रत्युत्तरगुणकल्पमाह—आहार कां० ॥ ४ °ल्पिको अर्थात् तद्विषया या व्यवस्था स उत्तरगुणकल्पो मन्त° कां० ॥

सरिकप्पे सरिछंदे, तुल्लचरित्ते विसिट्ठतरए वा ।
साहूहिं संथवं कुज्जा, णाणीहिँ चरित्तगुत्तेहिं ॥ ६४४५ ॥

'सदृक्कल्पः' स्थितकल्प-स्थापनाकल्पादिभिरेककल्पवर्ती 'सदृक्छन्दः' समानसामाचारीकः 'तुल्यचारित्रः' समानसामायिकादिसंयमः 'विशिष्टतरो वा' तीव्रतरशुभाध्यवसायविशेषेणोत्कृष्टतरेषु संयमस्थानकण्डकेषु वर्तमानः, ईदृशा ये ज्ञानिनश्चारित्रगुप्ताश्च तैः सह 'संस्तवं' 5 परिचयमेकत्र संवासादिकं कुर्यात् ॥ ६४४५ ॥

सरिकप्पे सरिछंदे, तुल्लचरित्ते विसिट्ठतरए वा ।
आदिज्ज भत्त-पाणं, सतेण लाभेण वा तुस्से ॥ ६४४६ ॥

यः सदृक्कल्पः सदृक्छन्दस्तुल्यचारित्रो विशिष्टतरो वा 'तेन' एवंविधेन साधुनाऽऽनीतं भक्त-पानमाददीत, 'स्वकीयेन वा' आत्मीयेन लाभेन तुष्येत्, हीनतरसत्कं न गृह्णीयात् 10 ॥ ६४४६ ॥ तदेवमुक्ता छेदोपस्थापनीयकल्पस्थितिः । अथ निर्विशमान[1]-निर्विष्टकायिककल्पस्थितिद्वयं विवरीषुराह—

परिहारकप्पं पवक्खामि, परिहरंति जहा विऊ ।
आदी मज्झऽवसाणे य, आणुपुव्विं जहक्कमं ॥ ६४४७ ॥

परिहारकल्पं प्रवक्ष्यामि, कथम्? इत्याह—यथा 'विद्वांसः' विदितपूर्वगतश्रुतरहस्यास्तं 15 कल्पं 'परिहरन्ति' धातूनामनेकार्थत्वाद् आसेवन्ते । कथं पुनः वक्ष्यसि? इति अत आह—'आदौ' तत्प्रथमतया प्रतिपद्यमानानां 'मध्ये' प्रतिपन्नानाम् 'अवसाने' प्रस्तुतकल्पसमाप्तौ या 'आनुपूर्वी' सामाचार्याः परिपाटिः तां यथाक्रमं प्रवक्ष्यामीति सण्टङ्कः ॥ ६४४७ ॥

तत्र कतरस्मिन् तीर्थे एष कल्पो भवति? इति जिज्ञासायामिदमाह—

भरहेरवएसु वासेसु, जता तित्थगरा भवे । 20
पुरिमा पच्छिमा चेव, कप्पं देसेंति ते इमं ॥ ६४४८ ॥

भरतैरावतेषु वर्षेषु दशस्वपि यदा तृतीय-चतुर्थारकयोः पश्चिमे भागे पूर्वाः पश्चिमाश्च तीर्थकरा भवेयुः तदा ते भगवन्तः 'इमं' प्रस्तुतं कल्पं 'दिशन्ति' प्ररूपयन्ति, अर्थादापन्नम्—मध्यमतीर्थकृतां महाविदेहेषु च नास्ति परिहारकल्पस्थितिरिति ॥ ६४४८ ॥

आह यदि एवं ततः— 25

केवइयं कालसंजोगं, गच्छो उ अणुसज्जती ।
तित्थयरेसु पुरिमेसु, तहा पच्छिमएसु य ॥ ६४४९ ॥

कियन्तं कालसंयोगं परिहारकल्पिकानां गच्छः पूर्वेषु पश्चिमेषु च तीर्थकरेषु 'अनुसजति' परम्परयाऽनुवर्तते? ॥ ६४४९ ॥ एवं शिष्येण पृष्टे सति सूरिराह—

पुव्वसयसहस्साइं, पुरिमस्स अणुसज्जती । 30
वीसग्गसो य वासाइं, पच्छिमस्साणुसज्जती ॥ ६४५० ॥

---

१ °नकल्पस्थिति-निर्विष्टकायिककल्पस्थितिद्वयं युगपदेव विव° कां० ॥

पूर्वशतसहस्राणि 'पूर्वस्य' ऋषभस्वामिनस्तीर्थे परिहारकल्पोऽनुसजति । 'पश्चिमस्य तु' श्रीवर्द्धमानस्वामिनस्तीर्थे 'विंशत्यग्रशः' कतिपयविंशतिसङ्ख्यापरिच्छिन्नानि वर्षाणि परिहारकल्पोऽनुसजति । तत्र ऋषभस्वामिनस्तीर्थे यानि पूर्वशतसहस्राण्युक्तानि तानि देशोने द्वे पूर्वकोटी मन्तव्ये । कथम्? इति चेद् उच्यते—इहं पूर्वकोट्यायुषो मनुष्या जन्मत आरभ्य 5 सञ्जाताष्टवर्षाः प्रव्रजिताः, तेषां च नवमे वर्षे उपस्थापना सञ्जाता, एकोनविंशतिवर्षपर्यायाणां च दृष्टिवाद उद्दिष्टः, तस्य वर्षेण योगः समाप्तिं नीतः, एवं नव विंशतिश्च मिलिता एकोनत्रिंशद् वर्षाणि भवन्ति, एतावत्सु वर्षेषु गतेषु ऋषभस्वामिनः पार्श्वे परिहारकल्पं प्रतिपन्नाः, तत एकोनत्रिंशद्वर्षन्यूनां पूर्वकोटीं परिहारकल्पे तैरनुपालिते सति येऽन्ये तेषां मूले परिहारकल्पं प्रतिपद्यन्ते तेऽप्येवमेवैकोनत्रिंशद्वर्षन्यूनां पूर्वकोटीमनुपालयन्ति, एवं देशोने द्वे पूर्वकोटी 10 भवतः । पश्चिमस्य तु यानि विंशत्यग्रशो वर्षाण्युक्तानि तानि देशोने द्वे वर्षशते भवतः ॥ ६४५० ॥ तथा चाह—

पव्वज अट्ठवासस्स, दिट्ठिवातो उ वीसहिं ।
इति एकूणतीसाए, सयमूणं तु पच्छिमे ॥ ६४५१ ॥
पालइत्ता सयं ऊणं, वासाणं ते अपच्छिमे ।
15 **काले देसिंति अण्णेसिं, इति ऊणा तु बे सता ॥ ६४५२ ॥**

श्रीवर्द्धमानस्वामिकाले वर्षशतायुषो मनुष्याः, तत्र 'अष्टवर्षस्य' जन्मनः प्रभृति सञ्जातवर्षाष्टकस्य कस्यापि प्रव्रज्या सञ्जाता, पूर्वोक्तरीत्या च विंशत्या वर्षैर्दृष्टिवादो योगतः समर्थितः, ततः श्रीमन्महावीरसकाशे परिहारकल्पं नव जनाः प्रतिपद्य देशोनवर्षशतमनुपालयन्ति इत्येवमेकोनत्रिंशता वर्षैरूनं शतं 'पश्चिमे' पश्चिमतीर्थकरकाले भवति ॥ ६४५१ ॥
20 ततस्ते वर्षाणां शतमूनं तं कल्पं पालयित्वा 'अपश्चिमे काले' निजायुषः पर्यन्तेऽन्येषां तं कल्पं 'दिशन्ति' प्ररूपयन्ति, प्रवर्तयन्तीति भावः । तेऽप्येवमेवैकोनत्रिंशद्वर्षन्यूनं शतं पालयन्ति । 'इति' एवं द्वे शते ऊने वर्षाणां भवत इति ॥ ६४५२ ॥

किमर्थं तृतीया पूर्वकोटी तृतीयं वा वर्षशतं न भवति? इत्याह—

पडिवन्ना जिणिंदस्स, पादमूलम्मि जे विऊ ।
25 **ठावयंति उ ते अण्णे, णो उ ठावितठावगा ॥ ६४५३ ॥**

जिनेन्द्रस्य पादमूले ये विद्वांसः प्रस्तुतं कल्पं प्रतिपन्नास्त एवान्यांस्तत्र कल्पे स्थापयन्ति, न तु 'स्थापितस्थापकाः' जिनेन स्थापिता स्थापका येषां ते स्थापितस्थापकास्तेऽमुं कल्पमन्येषां न स्थापयन्ति । इदमत्र हृदयम्—इयमेवास्य कल्पस्य स्थितिर्यत् तीर्थकरसमीपे वाऽमुं प्रतिपद्यन्ते, तीर्थकरसमीपप्रतिपन्नसाधुसकाशे वा, नाऽन्येषाम् । अतस्तृतीये पूर्वकोटि-वर्षशते न 30 भवत इति ॥ ६४५३ ॥ अथ कीदृग्गुणोपेता अमी भवन्ति? इत्याह—

सव्वे चरित्तमंतो य, दंसणे परिनिट्ठिया ।
णवपुव्विया जहन्नेणं, उक्कोस दसपुव्विया ॥ ६४५४ ॥

---

१ °ह ऋषभनाथकाले पूर्व° कां० ॥ २ °नं परिहारकल्पं शतं कां० ॥

पंचविहे ववहारे, कप्पे त दुविहम्मि य ।
दसविहे य पच्छित्ते, सव्वे ते परिणिट्ठिया ॥ ६४५५ ॥

सर्वेऽपि ते[1] भगवन्तश्चारित्रवन्तः 'दर्शने च' सम्यक्त्वे 'परिनिष्ठिताः' परमकोटिमुपगताः । ज्ञानमङ्गीकृत्य तु नवपूर्विणो जघन्येन, उत्कर्षतः 'दशपूर्विणः' किञ्चिद् न्यूनदशपूर्वधरा मन्तव्याः ॥ ६४५४ ॥ तथा—　5

'पञ्चविधे व्यवहारे' आगम-श्रुता-ऽऽज्ञा-धारणा-जीतलक्षणे 'द्विविधे च कल्पे' अकल्पस्थापना-शैक्षस्थापनाकल्परूपे जिनकल्प-स्थविरकल्परूपे वा 'दशविधे च प्रायश्चित्ते' आलोचनादौ पाराञ्चिकान्ते सर्वेऽपि ते 'परिनिष्ठिताः' परिज्ञायां परां निष्ठां प्राप्ताः ॥ ६४५५ ॥[2]

अप्पणो आउगं सेसं, जाणित्ता ते महामुणी ।
परक्कमं च बल विरियं, पच्चवाते तहेव य ॥ ६४५६ ॥　10

आत्मन आयुःशेषं सातिशयश्रुतोपयोगेन ज्ञात्वा ते महामुनयः, 'बलं' शारीरं सामर्थ्यम्, 'वीर्यं' जीवशक्तिः, तदुभयमपि दर्शितस्वफलं पराक्रमः, एतान्यात्मनो विज्ञायामुं कल्पं प्रतिपद्यन्ते । 'प्रत्यपायाः' जीवितोपद्रवकारिणो रोगादयस्तानपि 'तथैव' प्रथममेवाभोगयन्ति, किं प्रतिपन्नानां भविष्यन्ति ? न वा ? इति । यदि न भवन्ति ततः प्रतिपद्यन्ते, अन्यथा तु नेति ॥ ६४५६ ॥　15

आपुच्छिऊण अरहंते, मग्गं देसेंति ते इमं ।
पमाणाणि य सव्वाइं, अभिग्गहे य बहुविहे ॥ ६४५७ ॥

'अर्हतः' तीर्थकृत आपृच्छ्य ते तेषामनुज्ञयाऽमुं कल्पं प्रतिपद्यन्ते । 'ते च' तीर्थकृतस्तेषां प्रस्तुतकल्पस्य 'इमम्' अनन्तरमेव वक्ष्यमाणं 'मार्गं' सामाचारीं देशयन्ति । तद्यथा— प्रमाणानि च सर्वाणि, अभिग्रहांश्च बहुविधान् ॥ ६४५७ ॥ एतान्येव व्याचष्टे—　20

गणोवहिपमाणाइं, पुरिसाणं च जाणि तु ।
दव्वं खेत्तं च कालं च, भावमण्णे य पज्जवे ॥ ६४५८ ॥

गणप्रमाणान्युपधिप्रमाणानि पुरुषाणां च प्रमाणानि यानि प्रस्तुते कल्पे जघन्यादिभेदादनेकधा भवन्ति, यच्च तेषां[3] 'द्रव्यम्' अशनादिकं कल्पनीयम्, यच्च 'क्षेत्रं' मासकल्पप्रायोग्यं वर्षावासप्रायोग्यं वा, यश्चैतयोरेव मासकल्प-वर्षावासयोः प्रतिनियतः कालः, यश्च 'भावः' 25 क्रोधनिग्रहादिरूपः, ये च 'अन्येऽपि' निष्प्रतिकर्मतादयो लेश्या-ध्यानादयो वा पर्यायास्तेषां सम्भवन्ति तान् सर्वानपि[4] भगवन्तस्तेषामुपदिशन्ति ॥ ६४५८ ॥

पंचहिं अग्गहो भत्ते, तत्थेगीए अभिग्गहो ।
उवहिणो अग्गहो दोसुं, इयरो एक्कतरीय उ ॥ ६४५९ ॥

---

१ ते परिहारकल्पिका भगवन्तः 'चारित्रवन्तः' निरतिचारचारित्राः 'दर्शने च' कां० ॥ २ कथं पुनरमुं कल्पं प्रतिपद्यन्ते ? इति अत आह इत्यवतरणं कां० ॥ ३ °षां परिहारकल्पिकानां 'द्रव्य° कां० ॥ ४ °नपि मासकल्पप्रकृतोक्तनीत्या तीर्थकृतो भगवन्तस्तेषा° कां० ॥

भक्ते उपलक्षणत्वात् पानके च संसृष्टा-ऽसंसृष्टाख्यमाद्यमेषणाद्वयं वर्जयित्वा पञ्चभिः उपरितनीभिरेषणाभिः 'आग्रहः' स्वीकारः । तत्रापि 'एकस्याम्' एकतरस्यामभिग्रहः, एकया कयाचिद् भक्तमपरया पानकमन्वेषयन्तीत्यर्थः । आह च बृहद्भाष्यकृत्—

संसट्ठमाइयाणं, सत्तण्हं एसणाण उ ।
5 आइल्लाहि उ दोहिं तु, अग्गहो गह पंचहिं ॥
तत्थ वि अन्नयरीए, एगीए अभिग्गहं तु काऊणं । ति ।

उपधिः—वस्त्रादिरूपस्तस्य उद्दिष्ट-प्रेक्षा-अन्तरा-उज्झितधर्मिकाख्याः **पीठिकायां** व्याख्याता याश्चतस्र एषणास्तत्र 'द्वयोः' उपरितनयोः 'आग्रहः' स्वीकारः । 'इतरः' अभिग्रहः स एकतरस्यामुपरितन्यां भवति, यदा चतुर्थ्यां न तदा तृतीयायाम् यदा तृतीयायां न तदा चतुर्थ्यां 10 गृह्णन्तीति भावः ॥ ६४५९ ॥ कदा पुनस्तेऽमुं कल्पं प्रतिपद्यन्ते ? इत्याह—

अइरोग्गयम्मि सूरे, कप्पं देसिंति ते इमं ।
आलोइय-पडिक्कंता, ठावयंति तओ गणे ॥ ६४६० ॥

अचिरोद्गते सूर्ये 'ते' भगवन्तः कल्पमिमं 'देशयन्ति' स्वयं प्रतिपत्त्याऽन्येषां दर्शयन्ति । ततः 'आलोचित-प्रतिक्रान्ताः' आलोचनाप्रदानपूर्वं प्रदत्तमिथ्यादुष्कृतास्त्रीन्[1] गणान्[2] स्थापयन्ति 15 ॥ ६४६० ॥ तेषु च त्रिषु गणेषु कियन्तः पुरुषा भवन्ति ? इत्याह—

सत्तावीस जहण्णेणं, उक्कोसेण सहस्ससो ।
निग्गंथसूरा भगवंतो, सव्वग्गेणं वियाहिया ॥ ६४६१ ॥

सप्तविंशतिपुरुषा जघन्येन[3] भवन्ति, एकैकस्मिन् गणे नव जना भवन्ति इति भावः । उत्कर्षतः 'सहस्रशः' सहस्रसङ्ख्याः पुरुषा भवन्ति, शताग्रशो गणानामुत्कर्षतः[4] वक्ष्यमाणत्वात् । 20 एवं ते भगवन्तो निर्ग्रन्थसूराः 'सर्वाग्रेण' सर्वसङ्ख्यया व्याख्याताः ॥ ६४६१ ॥

गणमङ्गीकृत्य प्रमाणमाह—

सयग्गसो य उक्कोसा, जहण्णेण तओ गणा ।
गणो य णवतो वुत्तो, एमेता पडिवत्तितो ॥ ६४६२ ॥

'शताग्रशः' शतसङ्ख्या गणा उत्कर्षतोऽमीषां भवन्ति, जघन्येन त्रयो गणाः । गणश्च 'नवकः' 25 नवपुरुषमान उक्तः । एवमेताः 'प्रतिपत्तयः' प्रमाणादिविषयाः प्रकारा मन्तव्याः ॥ ६४६२ ॥[5]

एगं कप्पट्ठियं कुज्जा, चत्तारि परिहारिए ।
अणुपरिहारिगा चेव, चउरो तेसिं ठावए ॥ ६४६३ ॥

नवानां जनानां मध्यादेकं कल्पस्थितं गुरुकल्पं कुर्यात् । चतुरः परिहारिकान्[6] कुर्यात् । तेषां शेषांश्चतुरोऽनुपहारिकान्[7] स्थापयेत् ॥ ६४६३ ॥

---

१ °न् जघन्यतोऽपि स्था° कां० ॥ २ °न त्रिषु गणेषु समुदितेषु भव° कां० ॥ ३ °तः प्रथमतः प्रतिपद्यमानकानां वक्ष्य° कां० ॥ ४ °पां प्रथमतः प्रतिपत्तारो भव° कां० ॥ ५ एवं प्रतिपन्ने सति कल्पे यो विधिर्विधेयस्तं दर्शयन्नाह इत्यवतरणं कां० ॥ ६ °न् तपः-प्रपन्नान् कु° कां० ॥ ७ °न् तदीयवैयावृत्त्यकरकल्पान् स्था° कां० ॥

ण तेसिं जायती विग्घं, जा मासा दस अट्ठ य ।
ण वेयणा ण वाऽऽतंको, णेव अण्णे उवद्दवा ॥ ६४६४ ॥
अट्ठारससु पुण्णेसु, होज्ज एते उवद्दवा ।
ऊणिए ऊणिए यावि, गणे मेरा इमा भवे ॥ ६४६५ ॥

'तेषाम्' एवं कल्पं प्रतिपन्नानां न जायते 'विघ्नः' अन्यत्र संहरणादिः, यावद् मासा ५ दशाष्टौ च, अष्टादश इत्यर्थः । [1]न वेदना न वा आतङ्कः नैवान्ये केचनोपद्रवाः प्राणव्यप-रोपण[2]कारिण उपसर्गाः । अष्टादशसु मासेषु पूर्णेषु भवेयुरपि एते उपद्रवाः । उपद्रवैश्च यदि तेषामेको द्वौ त्रयो वा म्रियन्ते, अथवा तेषां कोऽपि स्थविरकल्पं जिनकल्पं वा गतो भवति, शेषास्तु तमेव कल्पमनुपालयितुकामास्तत एवमूनिते ऊनिते गणे जाते इयं 'मर्यादा' सामाचारी भवति । इहोनिते ऊनिते इति द्विरुच्चारणं भूयोऽप्यष्टादशसु मासेषु पूर्णेषु एष एव 10 विधिरिति ज्ञापनार्थम् ॥ ६४६४ ॥ ६४६५ ॥

एवं तु ठाविए कप्पे, उवसंपज्जति जो तहिं ।
एगो दुवे अणेगा वा, अविरुद्धा भवंति ते ॥ ६४६६ ॥

'एवम्' अनन्तरोक्तनीत्या कल्पे स्थापिते सति यदि एकादयो म्रियेरन्, अन्यत्र [3]वा गच्छेयुः, ततो यस्तत्र उपसम्पद्यते स एको वा द्वौ वाऽनेके वा भवेयुः । तत्र यावद्भिः पारि-15 हारिकगण ऊनस्तावतामुपसम्पदर्थमागतानां मध्याद् गृहीत्वा गणः पूर्यते । ये शेषास्ते पारिहारिकतपस्तुलनां कुर्वन्तस्तिष्ठन्ति । ते च पारिहारिकैः सार्द्धं तिष्ठन्तोऽविरुद्धा भवन्ति, पारिहारिकाणामकल्पनीया न भवन्तीत्युक्तं भवति । ते च तावत् तिष्ठन्ति यावदन्ये उपसम्पदर्थमुपतिष्ठन्ते । तैः पूरयित्वा पृथग् गणः क्रियते ॥ ६४६६ ॥ इदमेव व्याख्याति—

तत्तो य ऊणए कप्पे, उवसंपज्जति जो तहिं ।　　20
जेत्तिएहिं गणो ऊणो, तत्तिते तत्थ पक्खिवे ॥ ६४६७ ॥

'ततश्च' पूर्वोक्तकारणाद् 'ऊनके' एक-द्व्यादिभिः साधुभिरपूर्णे कल्पे यस्तत्रोपसम्पद्यते तत्रायं विधिः—'यावद्भिः' एकादिसङ्ख्याकैः स गण ऊनः 'तावतः' तावत्सङ्ख्याकानेव साधून् 'तत्र' गणे 'प्रक्षिपेत्' प्रवेशयेत् ॥ ६४६७ ॥

तत्तो अणूणए कप्पे, उवसंपज्जति जो तहिं ।　　25
उवसंपज्जमाणं तु, तप्पमाणं गणं करे ॥ ६४६८ ॥

अथ कोऽप्युपद्रवैर्न कालगतस्तत एवमन्यूनके कल्पे ये तत्रोपसम्पद्यन्ते ते यदि नव जनाः पूर्णास्ततः पृथग् गणो भवति । अथापूर्णास्ततः प्रतीक्षाप्यन्ते यावदन्ये उपसम्पदर्थमागच्छन्ति । ततस्तमुपसम्पद्यमानं साधुजनं मीलयित्वा 'तत्प्रमाणं' नवपुरुषमानं गणं 'कुर्यात्' स्थापयेत् ॥ ६४६८ ॥　　30

---

१ न 'वेदना' चिरघातिरोगरूपा न वा 'आतङ्कः' सद्योघातिशूलादिलक्षणः नैवा° कां० ॥ २ °कारिणो देवादिकृता उप° कां० ॥ ३ वा जिनकल्पादौ गच्छे° कां० ॥ ४ जत्तिएण गणो कां० विना ॥

पमाणं कप्पट्ठितो तत्थ, ववहारं ववहरित्तए ।
अणुपरिहारियाणं पि, पमाणं होति से विऊ ॥ ६४६९ ॥

तेषां पारिहारिकाणां 'तत्र' कल्पे क्वचित् स्खलितादावापन्ने 'व्यवहारं' प्रायश्चित्तं 'व्यवहर्तुं' दातुं कल्पस्थितः प्रमाणम्, यदसौ प्रायश्चित्तं ददाति तत् तैर्वोढव्यमिति भावः । एवमनुपारि-
5 हारिकाणामप्यपराधपदमापन्नानां स एव 'विद्वान्' गीतार्थः प्रायश्चित्तदाने प्रमाणम् ॥ ६४६९ ॥

आलोयण कप्पठिते, तवमुज्जाणोवमं परिवहंते ।
अणुपरिहारिएँ गोवालए, व णिच्च उज्जुत्तमाउत्ते ॥ ६४७० ॥

ते परिहारिका-ऽनुपरिहारिका आलोचनम् उपलक्षणत्वात् वन्दनकं प्रत्याख्यानं च कल्प-स्थितस्य पुरतः कुर्वन्ति । "तवमुज्जाणोवमं परिवहंते" त्ति यथा किल कश्चिदुद्यानिकां गत
10 एकान्तरतिप्रसक्तः स्वच्छन्दसुखं विहरमाण आस्ते एवं तेऽपि पारिहारिका एकान्तसमाधि-सिन्धुनिमग्नमनसस्तत् तपः 'उद्यानोपमम्' उद्यानिकासदृशं परिवहन्ति, कुर्वन्तीत्यर्थः । अनु-पारिहारिकाश्च चत्वारोऽपि चतुर्णां परिहारिकाणां भिक्षादौ पर्यटतां पृष्ठतः स्थिता नित्यम् 'उद्युक्ताः' प्रयत्नवन्तः 'आयुक्ताश्च' उपयुक्ता हिण्डन्ते, यथा गोपालको गवां पृष्ठतः स्थित उद्युक्त आयुक्तश्च हिण्डते ॥ ६४७० ॥

15 पडिपुच्छं वायणं चेव, मोत्तूणं णत्थि संकहा ।
आलावो अत्तणिद्देसो, परिहारिस्स कारणे ॥ ६४७१ ॥

तेषां च पारिहारिकादीनां नवानामपि जनानां सूत्रार्थयोः प्रतिपृच्छां वाचनां च मुक्त्वा नास्त्यन्या परस्परं सङ्कथा । पारिहारिकस्य च 'कारणे' उत्थान-निषदनाद्यशक्तिरूपे आलाप आत्मनिर्देशरूपो भवति, यथा—उत्थास्यामि, उपवेक्ष्यामि, भिक्षां हिण्डिष्ये, मात्रकं प्रेक्षिष्ये
20 इत्यादि ॥ ६४७१ ॥

बारस दसऽट्ठ दस अट्ठ छ च अट्ठेव छ च चउरो य ।
उक्कोस-मज्झिम-जहण्णगा उ वासा सिसिर गिम्हे ॥ ६४७२ ॥

परिहारिकाणां वर्षा-शिशिर-ग्रीष्मरूपे त्रिविधे काले उत्कृष्ट-मध्यम-जघन्यानि तपांसि भवन्ति । तत्र वर्षारात्रे उत्कृष्टं तपो द्वादशम्, शिशिरे दशममुत्कृष्टम्, ग्रीष्मे उत्कृष्टमष्टमम्;
25 वर्षारात्रे मध्यमं दशमम्, शिशिरेऽष्टमम्, ग्रीष्मे षष्ठम्; वर्षारात्रे जघन्यमष्टमम्, शिशिरे षष्ठम्, ग्रीष्मे चत्वारि भक्तानि, चतुर्थमित्यर्थः ॥ ६४७२ ॥

आयंबिल बारसमं, पत्तेयं परिहारिगा परिहरंति ।
अभिगहितएसणाए, पंचण्ह वि एगसंभोगो ॥ ६४७३ ॥

परिहारिका उत्कर्षतो द्वादशं तपः कृत्वा आचाम्लेन पारयन्ति । ते च परिहारिकाश्चत्वा-

---

१ कप्पितो तत्थ ताभा० ॥ २ °तां गोपाला इव गवां पृष्ठतः स्थिता नित्यम् 'उद्युक्ताः' प्रयत्नवन्तः 'आयुक्ताश्च' उपयुक्ता हिण्डन्ते ॥ ६४७० ॥ पडिपुच्छ कां० ॥ ३ °त्रकं प्रेक्ष्ये इ° कां० विना ॥ ४ गिम्मे ताभा० ॥ ५ एवमनन्तरोक्तनीत्या पारि° कां० ॥ ६ °त्वा पारणकदिने आचा° कां० ॥

रोऽपि 'प्रत्येकं' पृथक् पृथक् परिहरन्ति, न परस्परं समुद्देशनादिसम्भोगं कुर्वन्तीत्यर्थः । ते च परिहारिका अभिगृहीतया पञ्चानामुपरितनीनामन्यतरैषणया भक्त-पानं गृह्णन्ति । ये तु चत्वारोऽनुपारिहारिका एकश्च कल्पस्थितस्तेषां पञ्चानामप्येक एव सम्भोगः, ते च प्रतिदिवसमाचाम्लं कुर्वन्ति । यस्तु कल्पस्थितः स स्वयं न हिण्डते, तस्य योग्यं भक्त-पानमनुपारिहारिका आनयन्ति ॥ ६४७३ ॥ 5

परिहारिओ वि छम्मासे अणुपरिहारिओ वि छम्मासा ।
कप्पट्ठितो वि छम्मासे एते अट्ठारस उ मासा ॥ ६४७४ ॥

परिहारिकाः प्रथमतः षण्मासान् प्रस्तुतं तपो वहन्ति, ततोऽनुपरिहारिका अपि षण्मासान् वहन्ति, इतरे तु तेषामनुपारिहारिकत्वं प्रतिपद्यन्ते । तैरपि व्यूढे सति कल्पस्थितः षण्मासान् वहति, ततः शेषाणामेकः कल्पस्थितो भवति एकः पुनरनुपरिहारिकत्वं प्रतिपद्यते । एवमेते- 10 ऽष्टादश मासा भवन्ति ॥ ६४७४ ॥

अणुपरिहारिगा चेव, जे य ते परिहारिगा ।
अण्णमण्णेसु ठाणेसु, अविरुद्धा भवंति ते ॥ ६४७५ ॥

अनुपरिहारिकाश्चैव ये च ते परिहारिकास्तेऽन्यान्येषु स्थानेषु कालभेदेन परस्परमेकैकस्य वैयावृत्यं कुर्वन्तोऽविरुद्धा एव भवन्ति ॥ ६४७५ ॥ ततश्च— 15

गएहिं छहिँ मासेहिं, निव्विट्ठा भवंति ते ।
ततो पच्छा ववहारं, पट्ठवंति अणुपरिहारिया ॥ ६४७६ ॥
गएहिं छहिँ मासेहिं, निव्विट्ठा भवंति ते ।
वहइ कप्पट्ठितो पच्छा, परिहारं तहाविहं ॥ ६४७७ ॥

ते परिहारिकाः षड्भिर्मासैर्गतैस्तपसि व्यूढे सति 'निर्विष्टाः' निर्विष्टकायिका भवन्ति । ततः 20 पश्चादनुपरिहारिकाः 'व्यवहारं' परिहारतपसः समाचारं 'प्रस्थापयन्ति' कर्तुं प्रारभन्ते ॥ ६४७६॥

तेऽपि षड्भिर्मासैर्गतैर्निर्विष्टा भवन्ति । पश्चात् कल्पस्थितोऽपि तथाविधं परिहारं तावत एव मासान् वहति ॥ ६४७७ ॥ एवं च—

अट्ठारसहिं मासेहिं, कप्पो होति समाणितो ।
मूलट्ठवणाएँ समं, छम्मासा तु अणूणगा ॥ ६४७८ ॥ 25

---

१ 'परिहरन्ति' यथोक्तां सामाचारीमासेवन्ते' न पर° कां० ॥ २ °न् तदेव तपो वह° कां० ॥ ३ °वति, शेषाः पुनरनुपरिहारिकत्वं परिहारिकत्वं वा यथायोग्यं प्रतिपद्यन्ते । एवमेतेऽष्टादश मासा भवन्ति ॥ ६४७४ ॥ आह—य एव परिहारिकास्त एवानुपरिहारिकाः य एवानुपरिहारिकास्त एव परिहारिका इति कथं न विरोधः? इति अत्रोच्यते—अणु° कां० ॥ ४ °त्यं तपश्च कु° कां० ॥ ५ °वन्ति । यदि हि तेषामित्थमन्योन्यविधिं विदधानानां कालभेदो न स्यात् तदा स्याद् विरोधः । तच्च नास्तीति ॥ ६४७५ ॥ कां० ॥ ६ ततो पच्छा ववहारं, पट्ठवेति कप्पट्ठितो ताभा० ॥

अष्टादशभिर्मासैरयं कल्पः समापितो भवति । कथम्? इत्याह—"मूलट्ठवणा" इत्यादि मूलस्थापना नाम—यत् परिहारिकाः प्रथमत इदं तपः प्रतिपद्यन्ते, तस्यां षण्मासा अन्यूनास्तपं भवति, एवमनुपारिहारिकाणां कल्पस्थितस्य च मूलस्थापनया 'समं' तुल्यं तपः प्रत्येकं ज्ञेयम् षण्मासान् यावदित्यर्थः । एवं त्रिभिः षट्कैरष्टादश मासा भवन्ति ॥ ६४७८ ॥

5 ते च द्विधा—जिनकल्पिकाः स्थविरकल्पिकाश्च । उभयेषामपि व्याख्यानमाह—

एवं समाणिए कप्पे, जे तेसिं जिणकप्पिया ।
तमेव कप्पं ऊणा वि, पालए जावजीवियं ॥ ६४७९ ॥

'एवम्' अनन्तरोक्तविधिनाऽष्टादशभिर्मासैः कल्पे समापिते सति ये तेषां मध्याद् जिनकल्पिकास्ते तमेव कल्पमूना अप्यष्टादिसङ्ख्याका अपि यावज्जीवं पालयन्ति ॥ ६४७९ ॥

10 **अट्ठारसेहिं पुण्णेहिं, मासेहिं थेरकप्पिया ।**
पुणो गच्छं नियच्छंति, एसा तेसिं अहाठिती ॥ ६४८० ॥

ये स्थविरकल्पिकास्तेऽष्टादशभिर्मासैः पूर्णैः 'पुनर्' भूयोऽपि गच्छं नियच्छन्ति, आगच्छन्तीत्यर्थः । एषा तेषां 'यथास्थितिः' यथाकल्पः ॥ ६४८० ॥

अथ षड्विधायां कल्पस्थितौ का कुत्रावतरति? इत्याह—

15 **तइय-चउत्था कप्पा, समोयरंति[1] तु बियम्मि कप्पम्मि ।**
पंचम-छट्ठठितीसुं, हेट्ठिल्लाणं समोयारो ॥ ६४८१ ॥

'तृतीय-चतुर्थौ' निर्विशमानक-निर्विष्टकायिकाख्यौ कल्पौ 'द्वितीये' छेदोपस्थापनीयनाम्नि कल्पे समवतरतः । तथा सामायिक-च्छेदोपस्थापनीय-निर्विशमानक-निर्विष्टकायिकाख्या आद्याश्चतस्रः स्थितयोऽधस्तन्य उच्यन्ते, तासां प्रत्येकं 'पञ्चम-षष्ठस्थित्योः' जिनकल्प-स्थविर-20 कल्पस्थितिरूपयोः समवतारो भवति ॥ ६४८१ ॥

गतं निर्विशमानक-निर्विष्टकायिककल्पस्थितिद्वयम् । अथ जिनकल्पस्थितिमाह—

णिज्जुत्ति-मासकप्पेसु वण्णितो जो[2] कमो उ जिणकप्पे ।
सुय-संघयणादीओ, सो चेव गमो निरवसेसो ॥ ६४८२ ॥

निर्युक्तिः[3]—पञ्चकल्पस्तस्यां मासकल्पप्रकृते च यः क्रमः 'जिनकल्पे' 'जिनकल्पविषयः 25 श्रुतसंहननादिको वर्णितः स एव गमो निरवशेषोऽत्र मन्तव्यः ॥ ६४८२ ॥

स्थानाशून्यार्थं पुनरिदमुच्यते—

गच्छम्मि य णिम्माया, धीरा जाहे य मुणियपरमत्था ।
अग्गह जोग अभिग्गहे, उ बिंति जिणकप्पियचरित्तं ॥ ६४८३ ॥

यदा गच्छे प्रव्रज्या-शिक्षापदादिक्रमेण 'निर्माताः' निष्पन्नाः, 'धीराः' औत्पत्तिक्यादि-30 बुद्धिमन्तः परीषहोपसर्गैरक्षोभ्या वा, 'मुणितपरमार्थाः' 'अभ्युद्यतविहारेण विहर्तुमवसरः साम्प्रतमस्माकम्' इत्येवमवगतार्थाः, तथा ययोः पिण्डैषणयोः असंसृष्टा-संसृष्टाख्ययोरग्रहस्ते

---

१ °यरंते तु बितियकप्प° ताभा० ॥ २ जो गमो ताभा० ॥ ३ "णिज्जुत्ती पंचकप्पे" इति चूर्णौ विशेषचूर्णौ च ॥

परिहर्तव्ये, यास्तु उपरितन्यः पञ्चैषणास्तासाम् 'अभिग्रहः' 'एता एव ग्रहीतव्याः' इत्येवंरूपः, तत्राप्येकदैकतरस्यां 'योगः' व्यापारः परिभोग इत्यर्थः । एवं भावितमतयो यदा भवन्ति तदा जिनकल्पिकचारित्रम् 'उपयान्ति' प्रतिपद्यन्ते ॥ ६४८३ ॥

धितिबलिया तवसूरा, णिंति य गच्छातो ते पुरिससीहा ।
बल-वीरियसंघयणा, उवसग्गसहा अभीरू य ॥ ६४८४ ॥ 5

धृतिः—वज्रकुड्यवदभेद्यं चित्तप्रणिधानं तया बलिकाः—बलवन्तः, तथा तपः—चतुर्थादिकं षण्मासिकान्तं तत्र शूराः—समर्थाः, एवंविधाः पुरुषसिंहास्ते गच्छाद् निर्गच्छन्ति । बलं—शारीरं वीर्यं—जीवप्रभवं तद्धेतुः संहननम्—अस्थिनिचयात्मकं येषां ते तथा । बल-वीर्यग्रहणं च चतुर्भङ्गीज्ञापनार्थम्, सा चेयम्—धृतिमान् नामैको न संहननवान्, संहननवान् नामैको न धृतिमान्, एको धृतिमानपि संहननवानपि, एको न धृतिमान् न संहननवान् । अत्र तृतीय-10 भङ्गेनाधिकारः । उपसर्गाः—दिव्यादयस्तेषां सहाः—सम्यगध्यासितारः, तथा 'अभीरवः' परीषहेभ्यो न बिभ्यति ॥ ६४८४ ॥ गता जिनकल्पस्थितिः, सम्प्रति स्थविरकल्पस्थितिमाह—

संजमकरणुज्जोवा, णिप्फातग णाण-दंसण-चरित्ते ।
दीहाउ वुड्ढवासो, वसहीदोसेहि य विमुक्का ॥ ६४८५ ॥

संयमः—पञ्चाश्रवविरमणादिरूपः पृथिव्यादिरक्षारूपो वा सप्तदशविधः, तं कुर्वन्ति—यथावत् 15 पालयन्तीति संयमकरणाः, नन्द्यादिदर्शनात् कर्तरि अनप्रत्ययः, उद्योतकाः—तपसा प्रवचनस्योज्ज्वालकाः, ततः संयमकरणाश्च ते उद्योतकाश्चेति विशेषणसमासः । यद्वा सूत्रा-ऽर्थपौरुषीकरणेन संयमकरणमुद्योतयन्तीति संयमकरणोद्योतकाः । तथा ज्ञान-दर्शन-चारित्रेषु शिष्याणां निष्पादकास्तेषां वा ज्ञानादीनामव्यवच्छित्तिकारकाः, एवंविधाः स्थविरकल्पिका भवन्तीति शेषः । यदा च ते दीर्घायुषो जङ्घाबलपरिक्षीणाश्च भवन्ति तदा वृद्धावासमध्यासते । तत्रैक-20 क्षेत्रे वसन्तोऽपि 'वसतिदोषैः' कालातिक्रान्तादिभिः चशब्दाद् आहारोपधिदोषैश्च 'विमुक्ताः' वर्जिता भवन्ति, न तैर्लिप्यन्त इत्यर्थः ॥ ६४८५ ॥

मोत्तुं जिणकप्पठिइं, जा मेरा एम वण्णिया हेट्ठा ।
एसा तु दुपदजुत्ता, होति ठिती थेरकप्पस्स ॥ ६४८६ ॥

जिनकल्पस्थितिग्रहणेन उपलक्षणत्वात् सर्वेषामपि गच्छनिर्गतानां स्थितिः परिगृह्यते, 25 ततस्तां मुक्त्वा या 'अधस्ताद्' अस्मिन्नेवाध्ययने 'मर्यादा' स्थितिः 'एषा' अनन्तरमेव वर्णिता; यद्वा सामायिकाध्ययनमादौ कृत्वा यावदस्मिन्नेवाध्ययने इदं **षड्विधकल्पस्थितिसूत्रम्**, अत्रान्तरे गच्छनिर्गतसामाचारीमुक्त्वा या शेषा सामाचारी वर्णिता सा 'द्विपदयुक्ता' उत्सर्गा-ऽपवादपदद्वययुक्ता स्थविरकल्पस्य स्थितिर्भवति ॥ ६४८६ ॥ गता स्थविरकल्पस्थितिः । सम्प्रति प्रस्तुतशास्त्रोक्तविधिवैपरीत्यकारिणामपायान् दर्शयन्नाह— 30

पलंबादी जाव ठिती, उस्सग्ग-ऽववातियं करेमाणो ।
अववाते उस्सग्गं, आसायण दीहसंसारी ॥ ६४८७ ॥

---

१ °सते, तदानीं चैकत्र क्षेत्रे कां० ॥ २ °व षड्भिरुद्देशकैर्वर्णि° कां० ॥

प्रलम्बसूत्रादारभ्य यावदिदं **षड्विधकल्पस्थितिसूत्रं** तावद् य उत्सर्गा-ऽपवादविधिः सूत्रतोऽर्थतश्चोक्तस्तत्रोत्सर्गे प्राप्ते आपवादिकीं क्रियां कुर्वाणोऽपवादे च प्राप्ते उत्सर्गक्रियां कुर्वाणोऽर्हतामाशातनायां वर्तते, अर्हत्प्रज्ञप्तस्य धर्मस्याशातनायां वर्तते, आशातनायां च वर्त-मानो दीर्घसंसारी भवति, तस्मात् **प्रलम्बसूत्रादारभ्य षड्विधकल्पस्थितिसूत्रं** यावद् उत्सर्गे 5 प्राप्ते उत्सर्गः कर्तव्योऽपवादे प्राप्तेऽपवादविधिर्यतनया कर्तव्यः ॥ ६४८७ ॥

एवंकुर्वतां गुणमाह—

छव्विहकप्पस्स ठितिं, नाउं जो सद्दहे करणजुत्तो ।
पवयणणिही सुरक्खितो, इह-परभववित्थरप्फलदो ॥ ६४८८ ॥

'षड्विधकल्पस्य' सामायिकादिरूपस्य[1] प्रस्तुतशास्त्रार्थसर्वस्वभूतस्य 'स्थितिं' कल्पनीयाचरणा-10 ऽकल्पनीयविवर्जनरूपां 'ज्ञात्वा' गुरूपदेशेन सम्यगवगम्य यः 'श्रद्दधीत' प्रतीतिपथमारोपयेत्, न केवलं श्रद्दधीत किन्तु 'करणयुक्तः' यथोक्तानुष्ठानसम्पन्नो भवेत्, तस्याऽऽत्मा एवं सम्यग्ज्ञान-श्रद्धान-चारित्रसमन्वितः साक्षात् प्रवचननिधिर्भवति, यथा समुद्रो रत्ननिधिः एवमसावपि ज्ञानादिरत्नमयस्य प्रवचनस्य निधिरित्यर्थः । स च प्रवचननिधिः सुष्ठु-प्रयत्नेनाऽऽत्म-संयमविरा-धनाभ्यो रक्षितः सन् इह-परभवविस्तरफलदो भवति । इहभवे विस्तरेण चारण-वैक्रिया-15 ऽऽमर्षौषधिप्रभृतिविविधलब्धिरूपं फलं ददाति, परभवेऽप्यनुत्तरविमानाद्युपपात-सुकुलप्रत्या-यातिप्रभृतिकं विस्तरेण फलं प्रयच्छति ॥ ६४८८ ॥ अथेदं कल्पाध्ययनं कस्य[2] न दातव्यम्? को वाऽपात्राय ददतो दोषो भवति? इत्यत आह—

भिण्णरहस्से व णरे, णिस्साकरए व मुक्कजोगी य ।
छव्विहगतिगुविलम्मि, सो संसारे भमति दीहे ॥ ६४८९ ॥

20 इहापवादपदानि रहस्यमुच्यते, भिन्नं—प्रकाशितमयोग्यानां रहस्यं येन स भिन्नरहस्यः, अगीतार्थानामपवादपदानि कथयतीत्यर्थः, तत्रैवंविधे नरे[3] । तथा निश्राकरो नाम—यः किञ्चि-दपवादपदं लब्ध्वा तदेव निश्रां कृत्वा भणति—यथा एतदेवं करणीयं तथाऽन्यदप्येवं कर्तव्यम्, तत्र । तथा मुक्ताः—परित्यक्ता योगाः—ज्ञान-दर्शन-चारित्र-तपोविषया व्यापारा येन स मुक्तयोगी । ईदृशेऽपात्रे न दातव्यम् । यस्तु ददाति सः 'षड्विधगतिगुपिले' पृथिवी-25 कायादित्रसकायान्तषट्कायपरिभ्रमणगहने 'दीर्घे' अपारे संसारे भ्राम्यति ॥ ६४८९ ॥

अथ कीदृशस्य दातव्यम्? को वा पात्रे ददतो गुणो भवति? इति अत आह—

अरहस्सधारए पारए य असढकरणे तुलासमे समिते ।
कप्पाणुपालणा दीवणा य, आराहण छिन्नसंसारी ॥ ६४९० ॥

नास्त्यपरं रहस्यान्तरं यस्मात् तद् अरहस्यम्, अतीवरहस्यं[4] छेदशास्त्रार्थतत्त्वमित्यर्थः, तद् 30 यो धारयति—अपात्रेभ्यो न प्रयच्छति सोऽरहस्यधारकः । 'पारगः' सर्वस्यापि प्रारब्धश्रुतस्य

१ °कसंयम-च्छेदोपस्थापनीयसंयमादिरूप° कां० ॥ २ कस्मै न कां० ॥ ३ 'नरे' न-रव्य-ञ्जनमात्रधारके । तथा कां० ॥ ४ °स्यभूतं छेद° कां० ॥

पारगामी, न पल्लवग्राही । 'अशठकरणो नाम' माया-मदविप्रमुक्तो भूत्वा यथोक्तं विहितानुष्ठानं करोति । 'तुलासमो नाम' यथा तुला समस्थिता न मार्गतो न वा पुरतो नमति एवं यो राग-द्वेषविमुक्तो माना-ऽपमान-सुख-दुःखादिषु समः स तुलासम उच्यते । 'समितः' पञ्चभिः समितिभिः समायुक्तः । एवंविधगुणोपेतस्येदमध्ययनं दातव्यम् । एवं ददता कल्पस्य—भगव-दुक्तस्य श्रुतदानविधेरनुपालना कृता भवति; अथवा कल्पे—कल्पाध्ययने यद् भणितं तस्यानु-5 पालनां यः करोति तस्य दातव्यम् । एवंकुर्वता दीपना—अन्येषामपि मार्गस्य प्रकाशना कृता भवति, यथाऽन्यैरपि एवंगुणवते शिष्याय श्रुतप्रदानं कर्तव्यम्; अथवा "दीवण" त्ति यो योग्यविनेयानां 'दीपनाम्' अनालस्येन व्याख्यानं करोति तस्येदं दातव्यम्; यदि वा दीपना नाम—उत्सर्गयोग्यानामुत्सर्गं दीपयति, अपवादयोग्यानामपवादं दीपयति, उभययोग्यानामुभावपि दीपयति, प्रमादिनां वा दोषान् दीपयति, अप्रमादिनां गुणान् दीपयति । य एतस्यां कल्पानु-10 पालनायां दीपनायां च वर्तते तस्य ज्ञान-दर्शन-चारित्रमयी जघन्या मध्यमा उत्कृष्टा चाऽऽ-राधना भवति । ततश्चाराधनायाः 'छिन्नसंसारी' भवति संसारसन्ततेर्व्यवच्छेदं करोति । तस्यां च व्यवच्छिन्नायां यत् तद् अक्षयमव्याबाधमपुनरावृत्तिकं उपादेयस्थानं तत् प्राप्नोतीति ॥६४९०॥

॥ कल्पस्थितिप्रकृतं समाप्तम् ॥

उक्तोऽनुगमः । सम्प्रति नयाः—ते च यद्यपि शतसङ्ख्यास्तथापि ज्ञाननय-क्रियानयद्वयेऽन्त-15 र्भाव्यन्ते । तत्र ज्ञाननयस्यायमभिप्रायः—ज्ञानमेव प्रधानमैहिका-ऽऽमुष्मिकफलप्राप्तिकारणम् । तथा च तदभिप्रायसमर्थिकेयं शास्त्रान्तरोक्ता गाथा—

नायम्मि गिण्हियव्वे, अगिण्हियव्वम्मि चेव अत्थम्मि ।
जइयव्वमेव इइ जो, उवएसो सो नओ नाम ॥

अस्या व्याख्या—'ज्ञाते' सम्यक् परिच्छिन्ने 'ग्रहीतव्ये' उपादेये 'अग्रहीतव्ये' हेये 20 चशब्दाद् उपेक्षणीये च । एवकारस्त्ववधारणार्थः, तस्य चैवं व्यवहितः प्रयोगः—ज्ञात एव ग्रहीतव्येऽग्रहीतव्ये उपेक्षणीये च, नाज्ञातेऽर्थे ऐहिकामुष्मिकरूपे । तत्रैहिको ग्रहीतव्यः स्रक्-चन्दनादिः, अग्रहीतव्यो विष-शस्त्र-कण्टकादिः, उपेक्षणीयः तृणादिः । आमुष्मिको ग्रहीतव्यः सम्यग्दर्शनादिः, अग्रहीतव्यो मिथ्यादर्शनादिः, उपेक्षणीयो विवक्षयाऽभ्युदयादिः । तस्मिन्नर्थे यतितव्यमेवेति । अनुस्वारलोपाद् 'एवम्' अमुना क्रमेण ज्ञानपूर्वकमैहिका-ऽऽमुष्मिकफल-25 प्राप्त्यर्थिना सत्त्वेन 'यतितव्यं' प्रवृत्त्यादिलक्षणः प्रयत्नः कार्यः । इत्थं चैतदङ्गीकर्तव्यम्, सम्यग्ज्ञानमन्तरेण प्रवर्तमानस्य फलविसंवाददर्शनात् । तथा चोक्तमन्यैरपि—

विज्ञप्तिः फलदा पुंसां, न क्रिया फलदा मता ।
मिथ्याज्ञानात् प्रवृत्तस्य, फलासंवाददर्शनात् ॥

तथाऽऽमुष्मिकफलार्थिनाऽपि ज्ञान एव यतितव्यम्, आगमेऽपि तथाप्रतिपादनात् । उक्तं च—

5 पढमं नाणं ततो दया, एवं चिट्ठइ सव्वसंजए ।
अन्नाणी किं काही ?, किं वा नाही य छेय-पावगं ? ॥

इतश्चैतदेवमङ्गीकर्तव्यम्, यस्मात् तीर्थकर-गणधरैरगीतार्थानां केवलानां विहारक्रियाऽपि निषिद्धा । तथा चागमः—

गीयत्थो य विहारो, बीतो गीयत्थमीसतो भणितो ।
10 एत्तो तइय विहारो, नाणुन्नाओ जिणवरेहिं ॥

न खलु अन्धेनान्धः समाकृष्यमाणः सम्यक्पन्थानं प्रतिपद्यते इत्यभिप्रायः ।

एवं तावत् क्षायोपशमिकं ज्ञानमधिकृत्योक्तम्, क्षायिकमप्यङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव प्रतिपत्तव्यम्, यस्मादर्हतोऽपि भवाम्भोधितटस्थस्य दीक्षाप्रतिपन्नस्योत्कृष्टचरणवतोऽपि न तावद् अपवर्गप्राप्तिरुपजायते यावद् जीवा-ऽजीवाद्यखिलवस्तुपरिच्छेदरूपं केवलज्ञानं नोत्पन्न-
15 मिति । तस्माद् ज्ञानमेव प्रधानमैहिका-ऽऽमुष्मिकफलप्राप्तिकारणमिति स्थितम् । "इति जो उवएसो सो नओ नाम" 'इति' एवम्–उक्तेन प्रकारेण य उपदेशो ज्ञानप्राधान्यख्यापनपरः स नयो नाम, ज्ञाननय इत्यर्थः ॥

उक्तो ज्ञाननयः । सम्प्रति क्रियानयावसरः, तद्दर्शनं चेदम्—क्रियैव ऐहिका-ऽऽमुष्मिक-फलप्राप्तिकारणं प्रधानम्, युक्तियुक्तत्वात् । तथा चायमप्युक्तस्वरूपामेव स्वपक्षसिद्धये गाथा-
20 माह—"**नायम्मि गिण्हियव्वे०**" इत्यादि ।

अस्याः क्रियानयदर्शनानुसारेण व्याख्या—ज्ञाते ग्रहीतव्येऽग्रहीतव्ये चार्थे ऐहिका-ऽऽमुष्मिकफलप्राप्त्यर्थिना यतितव्यमेव । यस्मात् प्रवृत्त्यादिलक्षणप्रयत्नव्यतिरेकेण ज्ञानवतोऽपि नाभिलषितार्थावाप्तिरुपजायते । तथा चोक्तमन्यैरपि—

क्रियैव फलदा पुंसां, न ज्ञानं फलदं मतम् ।
25 यतः स्त्री-भक्ष्यभोगज्ञो, न ज्ञानात् सुखितो भवेत् ॥

आमुष्मिकफलार्थिनाऽपि क्रियैव कर्तव्या, तथा च भगवद्वचनमप्येवमेव व्यवस्थितम् । यत उक्तम्—

चेइय कुल गण संघे, आयरियाणं च पवयण सुए य ।
सव्वेसु वि तेण कयं, तव-संजममुज्जमंतेणं ॥

30 इतश्चैवमङ्गीकर्तव्यम्, यस्मात् तीर्थकर-गणधरैः क्रियाविकलानां ज्ञानमपि विफलमेवोक्तम् । तथा चागमः—

सुबहुं पि सुयमहीयं, किं काही चरणविप्पहीणस्स ? ।
अंधस्स जह पलित्ता, दीवसयसहस्सकोडी वि ॥

दृशिक्रियाविकलत्वात् तस्येत्यभिप्रायः ।

एवं तावत् क्षायोपशमिकं चारित्रमङ्गीकृत्योक्तम्, चारित्रं क्रियेत्यनर्थान्तरत्वात् क्षायिकमङ्गीकृत्य विशिष्टफलसाधकत्वं तस्यैव ज्ञेयम्, यस्मादर्हतो भगवतः समुत्पन्नकेवलज्ञानस्यापि न तावद् मुक्त्यवाप्तिः सम्भवति यावदखिलकर्मेन्धनानलभूता ह्रस्वपञ्चाक्षरोच्चारणकालमात्रा सर्वसंवररूपा चारित्रक्रिया नावाप्यते, ततः क्रियैव प्रधानमैहिका-ऽऽमुष्मिकफलप्राप्तिकारण- 5 मिति । "इति जो उवदेसो सो नओ नाम" 'इति' एवम्—उक्तेन प्रकारेण य उपदेशः क्रियाप्राधान्यख्यापनपरः स नयो नाम, क्रियानय इत्यर्थः । उक्तः क्रियानयः ॥

इत्थं ज्ञान-क्रियानयस्वरूपं श्रुत्वा विदिततदभिप्रायो विनेयः संशयापन्नः सन् आह—किमत्र तत्त्वम्? पक्षद्वयेऽपि युक्तिसम्भवात् । आचार्य आह—

सव्वेसिं पि नयाणं, बहुविहवत्तव्वयं निसामित्ता । 10
तं सव्वनयविसुद्धं, जं चरण-गुणट्ठितो साहू ॥

सर्वेषामपि मूलनयानाम् अपिशब्दात् तद्भेदानामपि नयानां द्रव्यास्तिकादीनाम् 'बहुविधवक्तव्यतां' 'सामान्यमेव, विशेषा एव, उभयमेव वा परस्परनिरपेक्षम्' इत्यादिरूपाम्, अथवा 'नामादिनयानां मध्ये को नयः कं साधुमिच्छति?' इत्यादिरूपां 'निशम्य' श्रुत्वा तत् 'सर्वनयविशुद्धं' सर्वनयसम्मतं वचनम्—यत् 'चरण-गुणस्थितः' चारित्र-ज्ञानस्थितः साधुः, यस्मात् 15 सर्वेऽपि नया भावनिक्षेपमिच्छन्तीति । गतं नयद्वारम् ॥

॥ इति श्रीकल्पटीकायां[2] षष्ठ उद्देशकः समाप्तः ॥

नन्दीसन्दर्भमूले सुदृढतरमहापीठिकास्कन्धबन्धे,
तुङ्गोद्देशाख्यशाखे दल-कुसुमसमैः सूत्र-निर्युक्तिवाक्यैः ।
सान्द्रे भाष्यार्थसार्थामृतफलकलिते कल्पकल्पद्रुमेऽस्मि- 20
न्नाकृष्टं षष्ठशाखाफलनिवहमसावङ्कुटीवाऽस्तु टीका ॥

॥ समाप्ता चेयं सुखावबोधा नाम कल्पाध्ययनटीका ॥

---

१ अस्या अपि शास्त्रान्तरोक्ताया गाथाया व्याख्या—सर्वेषां कां० ॥ २ °कल्पाध्ययनटी° कां० ॥

॥ अथ प्रशस्तिः ॥

सौवर्णा विविधार्थरत्नकलिता एते षडुद्देशकाः,
श्रीकल्पेऽर्थनिधौ मताः सुकलशा दौर्गत्यदुःखापहे ।
दृष्ट्वा चूर्णिसुबीजकाक्षरततिं कुश्याऽथ गुर्वाज्ञया,
5 खानं खानममी मया स्व-परयोरर्थे स्फुटार्थीकृताः ॥ १ ॥
श्रीकल्पसूत्रममृतं विबुधोपयोग-
योग्यं जरा-मरणदारुणदुःखहारि ।
येनोद्धृतं मतिमथा मथिताच्छ्रुताब्धेः,
श्रीभद्रबाहुगुरवे प्रणतोऽस्मि तस्मै ॥ २ ॥
10 येनेदं कल्पसूत्रं कमलमुकुलवत् कोमलं मञ्जुलाभि-
र्गोभिर्दोषापहाभिः स्फुटविषयविभागस्य सन्दर्शिकाभिः ।
उत्फुल्लोद्देशपत्रं सुरसपरिमलोद्गारसारं वितेने,
तं निःसम्बन्धबन्धुं नुत मुनिमधुपाः ! भास्करं भाष्यकारम् ॥ ३ ॥
श्रीकल्पाध्ययनेऽस्मिन्नतिगम्भीरार्थभाष्यपरिकलिते ।
15 विषमपदविवरणकृते, श्रीचूर्णिकृते नमः कृतिने ॥ ४ ॥
श्रुतदेवताप्रसादादिदमध्ययनं विवृण्वता कुशलम् ।
यदवापि मया तेन, प्राप्नुयां बोधिमहममलाम् ॥ ५ ॥
गम-नयगभीरनीरश्चित्रोत्सर्गा-ऽपवादवादोर्मिः ।
युक्तिशतरत्नरम्यो, जैनागमजलनिधिर्जयति ॥ ६ ॥
20 श्रीजैनशासननभस्तलतिग्मरश्मिः,
श्रीसद्मचान्द्रकुलपद्मविकाशकारी ।
स्वज्योतिरावृतदिगम्बरडम्बरोऽभूत्,
श्रीमान् धनेश्वरगुरुः प्रथितः पृथिव्याम् ॥ ७ ॥
श्रीमच्चैत्रपुरैकमण्डनमहावीरप्रतिष्ठाकृत-
25 स्तस्माच्चैत्रपुरप्रबोधतरणेः श्रीचैत्रगच्छोऽजनि ।
तत्र श्रीभुवनेन्द्रसूरिसुगुरुर्भूभूषणं भासुर-
ज्योतिःसद्गुणरत्नरोहणगिरिः कालक्रमेणाभवत् ॥ ८ ॥
तत्पादाम्बुजमण्डनं समभवत् पक्षद्वयीशुद्धिमान्,
नीर-क्षीरसदृक्षदूषण-गुणत्याग-ग्रहैकव्रतः ।
30 कालुष्यं च जडोद्भवं परिहरन् दूरेण सन्मानस-
स्थायी राजमरालवद् गणिवरः श्रीदेवभद्रप्रभुः ॥ ९ ॥

शस्याः शिष्यास्त्रयस्तत्पदसरसिरुहोत्सङ्गशृङ्गारभृङ्गा,
विध्वस्तानङ्गसङ्गाः सुविहितविहितोत्तुङ्गरङ्गा बभूवुः ।
तत्राद्यः सच्चरित्रानुमतिकृतमतिः श्रीजगच्चन्द्रसूरिः,
श्रीमद्देवेन्द्रसूरिः सरलतरलसच्चित्तवृत्तिर्द्वितीयः ॥ १० ॥
तृतीयशिष्याः श्रुतवारिवार्धयः,
परीषहाक्षोभ्यमनःसमाधयः ।
जयन्ति पूज्या विजयेन्दुसूरयः,
परोपकारादिगुणौघभूरयः ॥ ११ ॥
प्रौढं मन्मथपार्थिवं त्रिजगतीजैत्रं विजित्यैयुषां,
येषां जैनपुरे परेण महसा प्रक्रान्तकान्तोत्सवे ।
स्थैर्यं मेरुरगाधतां च जलधिः सर्वंसहत्वं मही,
सोमः सौम्यमहर्पतिः किल महत्तेजोऽकृत प्राभृतम् ॥ १२ ॥
वापं वापं प्रवचनवचोबीजराजीं विनेय-
क्षेत्रव्राते सुपरिमलिते शब्दशास्त्रादिसारैः ।
यैः क्षेत्रज्ञैः शुचिगुरुजनाम्नायवाक्सारणीभिः,
सिक्त्वा तेने सुजनहृदयानन्दि सज्ज्ञानसस्यम् ॥ १३ ॥
यैरप्रमत्तैः शुभमन्त्रजापै-
र्वेतालमाधाय कलिं स्ववश्यम् ।
अतुल्यकल्याणमयोत्तमार्थ-
सत्पूरुषः सत्त्वधनैरसाधि ॥ १४ ॥

किं बहुना ?—
ज्योत्स्नामञ्जुलया यया धवलितं विश्वम्भरामण्डलं,
या निःशेषविशेषविज्ञजनताचेतश्चमत्कारिणी ।
तस्यां श्रीविजयेन्दुसूरिसुगुरोर्निष्कृत्रिमाया गुण-
श्रेणेः स्याद् यदि वास्तवस्तवकृतौ विज्ञः स वाचांपतिः ॥ १५ ॥
तत्पाणिपङ्कजरजःपरिपूतशीर्षाः,
शिष्यास्त्रयो दधति सम्प्रति गच्छभारम् ।

१ °तधीपयोधयः, भा० ॥ २ °त्येयु° भा० ॥ ३ °ल लसत्तेजो° भा० ॥
४ यैश्चान्द्रैरिव धामभिर्धवलितं विश्वम्भरामण्डलं,
ये निःशेषविशेषविज्ञजनताचेतश्चमत्कारिणः ।
तेषां श्रीविजयेन्दुसूरिसुगुरोर्निष्कृत्रिमाणां गुण-
ग्रामाणां यदि वास्तवस्तवकृतौ विज्ञो भवेद् गीष्पतिः ॥ १५ ॥ भा० ॥
५ तत्पादपङ्कजरजःपरिपिञ्जराङ्गाः, शिष्या° भा० ॥

श्रीवज्रसेन इति सद्गुरुरादिमोऽत्र,
श्रीपद्मचन्द्रसुगुरुस्तु ततो द्वितीयः ॥ १६ ॥

तार्तीयीकस्तेषां, विनेयपरमाणुरनणुशास्त्रेऽस्मिन् ।
श्रीक्षेमकीर्तिसूरिर्विनिर्ममे विवृतिमल्पमतिः ॥ १७ ॥

5 श्रीविक्रमतः क्रामति, नयनाग्निगुणेन्दुपरिमिते १३३२ वर्षे ।
[1]ज्येष्ठश्वेतदशम्यां, समर्थितैषा च हस्तार्के ॥ १८ ॥

प्रथमादर्शे लिखिता, **नयप्रभ**प्रभृतिभिर्यतिभिरेषा ।
गुरुतरगुरुभक्तिभरोद्वहनादिव नम्रितशिरोभिः ॥ १९ ॥

इह च—

10 सूत्रादर्शेषु यतो, भूयस्यो वाचना विलोक्यन्ते ।
विषमाश्च **भाष्यगाथाः**, प्रायः स्वल्पाश्च **चूर्णिगिरः** ॥ २० ॥

ततः—

सूत्रे वा भाष्ये वा, यन्मतिमोहान्मयाऽन्यथा किमपि ।
लिखितं वा विवृतं वा, तन्मिथ्या दुष्कृतं भूयात् ॥ २१ ॥

15 ## ॥ समाप्तोऽयं ग्रन्थः ॥

॥ ग्रन्थाग्रम्—४२६०० ॥

---

१ ज्येष्ठे श्वेतनवम्यां, भा० ॥

परिशिष्टानि

१

प्रथमं परिशिष्टम्

मुद्रितस्य

निर्युक्ति-भाष्य-वृत्त्युपेतस्य बृहत्कल्पसूत्रस्य

विभागाः

२

द्वितीयं परिशिष्टम्

बृहत्कल्पसूत्रस्य

निर्युक्ति-भाष्य-चूर्णि-विशेषचूर्णि-वृत्तिकृद्भिर्निर्दिष्टानां प्रकृतनाम्नां सूत्रनाम्नां चानुक्रमणिका ।

सूत्रनाम	सूत्रस्थलम्	विभागः	पत्रादि
अक्षिसूत्र	उ० ६ सू० ६	६	१६३३
अग्निसूत्र	उ० २ सू० ६–७	४	९५९
अट्ठजाय (सुत्त)	उ० ६ सू० १८	६	१६५९ (गा० ६२८५)
अधिकरणसूत्र	उ० १ सू० ३४	३	९०६;
		५	१५१५ (टि० १)
,,	उ० ४ सू० ३०	५	१४७३
अध्वसूत्र	उ० १ सू० ४६	२	३२१,३३१
		३	९०६
		४	१२८८
		५	१४८७
अपावृतद्वारोपाश्रयसूत्र	उ० १ सू० १४–१५	३	६७२
अभ्यङ्गनसूत्र	उ० ५ सू० ४०	५	१५८६
अर्थजातसूत्र	उ० ६ सू० १८	६	१६५९
अविणीयसुत्त	उ० ४ सू० १०	५	१३८१ चू० विचू० (टि० २)
असंस्तृतनिर्विचिकित्ससूत्र	उ० ५ सू० ८	५	१५३४,१५३७
असंस्तृतविचिकित्ससूत्र	उ० ५ सू० ९	५	१५३७
अहिकरणसुत्त	उ० १ सू० ३४	३	९०६ विचू० (टि० २)
अहिगरणसुत्त	उ० १ सू० ३४	३	९०६ चू० (टि० २)
आदिसुत्त	उ० १ सू० १–५	३	९०६ (गा० ३२४१)
आलेपनसूत्र	उ० ५ सू० ३९	५	१५८८
आहारसूत्र	उ० ५ सू० ११	५	१५५५
आहृतसूत्र	उ० २ सू० १७	४	१००५
आहृतिकासूत्र	उ० २ सू० १८	४	१००८
इंदिय (सुत्त)	उ० ५ सू० १३	५	१५६१ (गा० ५९१९)
इन्द्रियसूत्र	उ० ५ सू० १३	५	१५६१,१५६२
उडु (सुत्त)	उ० ४ सू० ३४–३५	५	१४९९ (गा० ५६६५)
उदकसूत्र	उ० २ सू० ५	४	९५२,९५६,९५९
उन्मादप्राप्तासूत्र	उ० ६ सू० १३	६	१६५२

सूत्रनाम	सूत्रस्थलम्	विभागः	पत्रादि
अनुबद्धसूत्रद्वय	उ० ४ सू० ३४-३५	५	१४९९,१५०१
एकपार्श्वशायिसूत्र	उ० ५ सू० ३०	५	१५६३
एकाकिसूत्र	उ० ५ सू० १५	५	१५६३
एगपाससायि (सुत्त)	उ० ५ सू० ३०	५	१५६३ (गा० ५९२९)
कल्पस्थितिसूत्र	उ० ६ सू० २०	६	१६७६
कालातिक्रान्तसूत्र	उ० ४ सू० १६	५	१४०५
कृतिकर्मसूत्र	उ० ३ सू० १८	४	११९२,१२३०
क्षिप्तचित्तानिर्ग्रन्थीसूत्र	उ० ६ सू० १०	६	१६४७
क्षिप्तचित्तासूत्र	उ० ६ सू० १०	६	१६३६,१६४४
क्षिप्त-दीप्तचित्तासूत्र	उ० ६ सू० १०-११	६	१६५१
क्षेत्रातिक्रान्तसूत्र	उ० ४ सू० १७	५	१४००,१४०५
गिलाणसुत्त	उ० ४ सू० १४-१५	५	१३९२ (गा० ५२३६)
ग्लानसूत्र	उ० ४ सू० १४-१५	५	१३९३
		६	१६४४
घटीमात्रसूत्र	उ० १ सू० १६-१७	३	६६९,९०६
घडीमत्त (सुत्त)	उ० १ सू० १६-१७	३	६६९ (गा० २३६२), ९०६ (गा० ३२४१)
चरमग (सुत्त)	उ० १ सू० ५०	३	९०६ (गा० ३२४२)
चिलिमिणी (सुत्त)	उ० १ सू० १८	३	९०६ (गा० ३२४१)
चिलिमिलिकासूत्र	उ० १ सू० १८	३	९०६
छव्विहकप्पसुत्त	उ० ४ सू० ४-९	५	१३८१ (गा० ५१९६)
ज्योतिःसूत्र	उ० २ सू० ६	४	९५१ (टि० २-३-४), ९५२,९६६
ठिति (सुत्त)	उ० ६ सू० २०	६	१७०५ (गा० ६४८७)
दकतीरसूत्र	उ० १ सू० १९	३	९०६
दगतीरग (सुत्त)	उ० १ सू० १९	३	९०६ (गा० ३२४२)
दुग्गसुत्त	उ० ६ सू० ७	६	१६३३ (गा० ६१८२)
दुर्गसूत्र	,,	६	१६३३
दुस्सन्नप्प (सुत्त)	उ० ४ सू० १२	५	१३८४(गा० ५२११)
दुःसंज्ञाप्यसूत्र	उ० ४ सू० १२	५	१३८५
देवसूत्र	उ० ५ सू० १	५	१५१२
देवीसूत्र	उ० ५ सू० ३	५	१५१२
धान्यसूत्र	उ० २ सू० १-३	४	९५२
निर्लोमसूत्र	(?)	४	९३२

१ यद्यपि वृत्तिकृता श्रीमता क्षेमकीर्त्तिप्रभुणा द्वितीयोद्देशके "णेगेसु एगगहणं०" इति ३३१७ गाथा-व्याख्यायाम् (९३२ पत्रे)—

"कानिचित्तु सूत्राणि साधूनां साध्वीनां च प्रत्येकविषयाणि । यथैहैव कल्पाध्ययने सलोमसूत्रं निर्लोमसूत्रं वा। तद्यथा—नो कप्पइ निग्गंथाणं अलोमाइं चम्माइं धारित्तए (   )।

सूत्रनाम	सूत्रस्थलम्	विभागः	पत्रादि
निर्हतसूत्र	उ० २ सू० १८	४	१००४,१००५
नीहडसुत्त	,,	४	१००४ (गा० ४६१६)
नौसूत्र	उ० ६ सू० ९	६	१६३३,१६३५
पङ्कसूत्र	उ० ६ सू० ८	६	१६३३
परिमन्थसूत्र	उ० ६ सू० १९	६	१६७६
परिहारिकसूत्र	उ० ४ सू० ३१	५	१४८१
परिहारियसुत्त	उ० ४ सू० ३१	५	१४८१ (गा० ५५९४)
पलंब (सुत्त)	उ० १ सू० १	२	२७४
		६	१७०५ (गा० ६४८७)
पाराञ्चिकसूत्र	उ० ४ सू० २	५	१३३५ (टि० ३), १३८५
पाहुड (सुत्त)	उ० १ सू० ३४	३	९०६ (गा० ३२४२)
पिंड (सुत्त)	उ० २ सू० ८–१०	४	९६९ (गा० ३४७४)
पिण्डसूत्र	,,	४	९५१,९५२,९६९
पुरुषसूत्र	उ० ५ सू० ४	५	१५१२
प्रतिबद्धशय्यासूत्र	उ० १ सू० ३०–३१	३	७३९
प्रतिबद्धसूत्र	उ० १ सू० ३१	४	९७६
प्रदीपसूत्र	उ० १ सू० ७	४	९५१ (टि० २–३–४),९५२, ९५९
प्रलम्बप्रकृत	उ० १ सू० १–५	२	३२१,३३१
		३	९०६
प्रलम्बसूत्र	उ० १ सू० १	४	९२४
		६	१७०६
प्राभृतसूत्र	उ० १ सू० ३४	३	९०६
प्रायश्चित्तसूत्र	उ० ६ सू० १६	६	१६५७
मरणसूत्र	उ० ४ सू० २९	५	१४८४
मासकप्प (सुत्त)	उ० १ सू० ६–९	६	१७०४ (गा० ६४८२)
मासकल्पप्रकृत	उ० १ सू० ६–९	२	३२२,५९४
		३	६१२,७७५,७७६,९०६
		४	९२५,९७४,११६२,१२९४
		६	१६९९ (टि० ४), १७०४

कप्पइ निग्गंथाणं सलोमाइं चम्माइं धारित्तए (उ० ३ सू० ४)। नो कप्पइ निग्गंथीणं सलोमाइं चम्माइं धारित्तए (उ० ३ सू० ३)। **कप्पइ निग्गंथीणं अलोमाइं चम्माइं धारित्तए** (   )।"

इत्येवंरूपेण **निर्लोमसूत्रयुगल**मुल्लिखितं वरीवृत्यते । किन्न नैतत्सूत्रयुग्मं कस्मिंश्चिदपि सूत्रादर्शे निरीक्ष्यते, नापि भाष्यकृता चूर्णिकृता बृहद्भाष्यकृता चाप्यङ्गीकृतं व्याख्यातं वा विभाव्यते । अपि च द्वितीयोद्देशके भगवता वृत्तिकृता सङ्कलिष्टङ्कितमपि **निर्लोमसूत्रयुगं** नैव तृतीयोद्देशके **चर्मप्रकृत**व्याख्यानावसरे स्थानापन्नमपि स्वीकृतं व्याख्यातं संसूचितं वेति किमत्रार्थे प्रमादः सूरेः उतान्यत् किमपि कारणान्तरमिति न सम्यगाकलयामः । अत एव च नैतत्सूत्रस्थलं निर्दिष्टमत्रास्माभिरिति ॥

सूत्रनाम	सूत्रस्थलम्	विभागः	पत्रादि
मोकसूत्र	उ० ५ सू० ३७	५	१५७८
मोय (सुत्त)	उ० ५ सू० ३७	५	१५७८ (गा० ५९७६)
म्रक्षणसूत्र	उ० ५ सू० ४०	५	१५८७,१५८८,१५९० (टि० २)
यक्षाविष्टासूत्र	उ० ६ सू० १२	६	१६५१,१६५२
रच्छा (सुत्त)	उ० १ सू० १२-१३	३	९०६ (गा० ३२४२)
रथ्यामुखापणगृहादिसूत्र	उ० १ सू० १२-१३	३	९०६
रात्रिभक्तसूत्र	उ० १ सू० ४२-४३	३	८४०,८६२,८७५ (टि० २-४);
		५	१३२७
रोधकसूत्र	उ० ३ सू० ३०	५	१३०८
वगडा (सुत्त)	उ० १ सू० १०-११	३	७४८ (गा० २६६७), ९०६ (गा० ३२४२)
वगडासूत्र	,,	३	६४९,७४८,९०६
वत्थादिचत्तारि (सुत्ताणि)	उ० १ सू० ३८-४१	३	९०६ (गा० ३२४१)
वर्षावाससूत्रद्वय	उ० ४ सू० ३६-३७	५	१४९९,१५०१
वस्त्रपरिभाजनसूत्र	उ० ३ सू० १६	४	१२३०
वस्त्रादिसूत्र	उ० १ सू० ३८-४१	३	९०६
विकटसूत्र	उ० २ सू० ४	४	९५२,९५६
विष्वग्भवनसूत्र	उ० ४ सू० २९	५	१४५८,१४८१
विसुंभणसुत्त	उ० ४ सू० २९	५	१४५८ (गा० ५४९७), १४८१ (गा० ५५९५)
विस्संभणसुत्त	,,	५	१४५८ (गा० ५४९७ टि० ३)
वेरज्जविरुद्धसुत्त	उ० १ सू० ३७	३	७७८ (गा० २७५९)
वैराज्यविरुद्धराज्यसूत्र	उ० १ सू० ३७	३	७७८
श्रोतःसूत्र	उ० ५ सू० १४	५	१५६१,१५६२
षड्विधकल्पसूत्राणि	उ० ४ सू० ४-९	५	१३८१
षड्विधकल्पस्थितिसूत्र	उ० १ सू० २०	६	१७०५,१७०६
षड्विधसचित्तद्रव्यकल्पसूत्राणि	उ० ४ सू० ४-९	५	१३८०
समवसरणसूत्र	उ० ३ सू० १५	४	११४९,११६४
समोसरणसुत्त	,,	४	११४९ (गा० ४२३५)
सलोमसूत्र	उ० ३ सू० ३-४	४	९३२
संस्तृतनिर्विचिकित्ससूत्र	उ० ५ सू० ६	५	१५३३
संस्तृतविचिकित्ससूत्र	उ० ५ सू० ७	५	१५३३,१५३४
सागारिकसूत्र	उ० १ सू० २५-२९	३	६९६,९०६
		५	१३२२

सूत्रनाम	सूत्रस्थलम्	विभागः	पत्रादि
सागारियसुत्त	,,	३	९०६ विचू० (टि० २)
साधिकरणसूत्र	उ० ६ सू० १५	६	१६५७
सारिय (सुत्त)	उ० १ सू० २५–२९	३	९०६ (गा० ३२४२)
सेणासुत्त	उ० ३ सू० ३०	४	१२८८ (गा० ४७९५)
सेनासूत्र	,,	४	१२८८
सोय (सुत्त)	उ० ५ सू० १४	५	१५६१ (गा० ५९१९)
स्त्रीसूत्र	उ० ५ सू० ३	५	१५१२
हरियाहडिया (सुत्त)	उ० १ सू० ४५	४	१०९४ (गा० ३९९३)
हृताहृतिकासूत्र	उ० १ सू० ४५	३	८५६ (टि० २)
		४	१०९४

३

तृतीयं परिशिष्टम्

समग्रस्य बृहत्कल्पसूत्रस्य प्रकृतनाम्नां सूत्रनाम्नां तद्विषयस्य चानुक्रमणिका ।

प्रथम उद्देशकः

---

१ यद्यपि **भाष्यकृता वृत्तिकृता** चापि ३२८१–४२ **भाष्यगाथायां** तद्व्याख्यायां च एतत्प्रकृतसूत्रं '**रथ्यामुखापणगृहादिसूत्र**'त्वेनोल्लिखितं (दृश्यतां पत्रं ९०६) तथाप्यस्माभिरिदं प्रकृतं प्रथमोद्देशकसत्क १२–१३ सूत्र–२२९७–९८ **भाष्यगाथा**–तद्व्याख्यादिप्रामाण्यमधिकृत्य '**आपणगृहरथ्यामुखादि-प्रकृत**'तया निर्दिष्टमिति ॥

२ एतत्प्रकृताभिधानस्थलेऽस्माभिर्विस्मृत्या **अपावृतद्वारोपाश्रयप्रकृतम्** इति मुद्रितं वर्तते तत्र स्थाने **आपणगृहरथ्यामुखादिप्रकृतम्** इति वाचनीयम् ॥

३ एतत्प्रकृतस्यारम्भः २३२५ भाष्यगाथावृत्तेरनन्तरं **सूत्रम्** इत्यस्य प्राग् विज्ञेयः । अत्रान्तरे— ॥ **आपणगृहरथ्यामुखादिप्रकृतं समाप्तम्** ॥ **अपावृतद्वारोपाश्रयप्रकृतम्** इति ज्ञेयम् ॥

---

१ एतत्प्रकृतं **निश्राप्रकृतम्** इति नाम्नाऽपि उच्येत ॥

२ एतत्प्रकृतसत्कसूत्राणि सूत्र-भाष्य-विशेषचूर्णि-वृत्तिकृद्भिः **'सागारिकसूत्र'** नाम्ना निर्दिष्टानि वरीवृत्यन्ते । दृश्यतां पत्रम् ६९६, ९०६ (गाथा ३२४२), ९०६ (टि० २), १३२२ प्रभृति ॥

३ यद्यप्यत्र स्थाने मूले **गाथापति०** इति मुद्रितं वर्तते तथापि तत्र **गृहपति०** इत्येव ज्ञेयम् ॥

---

१ एतत्प्रकृतसूत्रं **भाष्यकृता 'प्राभृतसूत्र'** नाम्नाऽज्ञापि (दृश्यतां गाथा ३२४२), **चूर्णि-विशेषचूर्णिकृद्भ्यां** पुनः **'प्राभृतसूत्र'** समानार्थकेन **'अधिकरणसूत्रम्'**-इति नाम्ना उदलेखि, अस्माभिस्तु सूत्राशयौचित्यमनुसृत्य **व्यवशमनप्रकृतम्** इति नाम्ना निरटङ्कि इति ॥

२ यद्यप्यत्र **वस्त्रप्रकृतम्** इति मुद्रितं वर्तते तथाप्यत्र **रात्रिवस्त्रादिग्रहणप्रकृतम्** इति बोद्धव्यम् ॥

३ **हरियाहडियाप्रकृतम्** इत्यस्मिन् प्राकृतनामनि **हृताहृतिकाप्रकृतम् हरिताहृतिकाप्रकृतम्** चेत्युभे अपि शास्त्रकृदभिमते नाम्नी अन्तर्भवतः ॥

---

१ प्रकृतमिदं **सोपघातोपाश्रयप्रकृतम्** इत्यभिधयाऽपि निर्दिश्येत ॥

२ सूत्राण्येतानि **वृत्तिकृता 'धान्यसूत्र'** नाम्नोक्तानीति (दृश्यतां पत्रं ९५२) ॥

३-४ **ज्योतिःसूत्रम् प्रदीपसूत्रम्** चेति सूत्रयुगलं **वृत्तिकृता 'अग्निसूत्र'**त्वेनापि ज्ञापितं वर्त्तते (दृश्यतां पत्रं ९५९) ॥

५-६ एतत्सूत्रयुगलं **वृत्तिकृता** क्रमशः **आहृतसूत्रम् निर्हृतसूत्रम्** इति संज्ञाभ्यामप्युल्लिखितं दृश्यते ॥

---

१ अत्र स्थले **निर्ग्रन्थ्युपाश्रयप्रवेशप्रकृतम्** इति मुद्रितं वर्तते तत्स्थाने **उपाश्रयप्रवेशप्रकृतम्** इत्येतावदेव ज्ञातव्यम् ॥

२ अत्र स्थाने **कृत्स्नाकृत्स्नप्रकृतम्** इति मुद्रितमस्ति तत्स्थाने **कृत्स्नाकृत्स्नवस्त्रप्रकृतम्** इत्यवगन्तव्यम् ॥

३ १०७५ पृष्ठशिरोदेशे **सूत्रम्** इत्यस्योपरिष्टात् **भिन्नाभिन्नप्रकृतम्** इत्युल्लेखितव्यम् ॥

४ अत्र मूले **त्रिकृत्स्नप्रकृतम्** इति मुद्रितं वरीवृत्यते तत्स्थाने **त्रिचतुःकृत्स्नप्रकृतम्** इति बोध्यम् ॥

चतुर्थ उद्देशकः

---

१ यद्यप्यत्र **यथारत्नाधिकवस्त्रग्रहणप्रकृतम्** इति मुद्रितं विद्यते तथापि तत्स्थले पत्र १२३० मध्ये वृत्तिकृन्निर्दिष्टं **वस्त्रपरिभाजनप्रकृतम्** इत्यभिधानं समीचीनतममिति तदेवात्र ज्ञेयम् ॥

२ अत्र स्थाने **यथारत्नाधिकशय्यासंस्तारकग्रहणप्रकृतम्** इति मुद्रितं वर्तते तथापि **शय्या-संस्तारकपरिभाजनप्रकृतम्** इत्येवात्रावबोद्धव्यम् ॥

३ वृत्तिकृता **'रोधकसूत्र'**त्वेनापि निर्दिष्टत्वाद् **रोधकप्रकृतम्** इति नाम्नाऽपीदं प्रकृतमुच्येत ॥

४ अत्र **अवग्रहक्षेत्रप्रमाणप्रकृतम्** इति मुद्रितं वर्तते तत्स्थाने **क्षेत्रावग्रहप्रमाणप्रकृतम्** इत्यवगन्तव्यम् ॥

---

१ अत्र मूले प्रव्राजनादिप्रकृतम् इति मुद्रितमस्ति तत्स्थले षड्विधसचित्तद्रव्यकल्पप्रकृतम् इति समवगन्तव्यम् ॥

२ प्रकृतमिदम् उपसम्पत्प्रकृतम् इत्यनेनापि नाम्नोच्येत ॥

पञ्चम उद्देशकः

१ अत्र मूले उपाश्रयप्रकृतम् इति मुद्रितं तथापि तत्र उपाश्रयविधिप्रकृतम् इति ज्ञेयम् ॥

षष्ठ उद्देशकः

---

१ षड्विधकल्पस्थितिसूत्रनाम्नाऽप्येतत्सूत्रं वृत्तिकृता निर्दिष्टमस्ति (दृश्यतां पत्रं १७०५) ॥

४

चतुर्थं परिशिष्टम्

बृहत्कल्पसूत्रचूर्णि-विशेषचूर्णि-वृत्तिकृद्भिर्विभागशो निर्दिष्टानां निर्युक्तिगाथा-सङ्ग्रहगाथा-पुरातनगाथादीना-मनुक्रमणिका

[प्रस्तुतस्यास्य बृहत्कल्पसूत्राख्यस्य महाशास्त्रस्य निर्युक्तिर्भाष्यं चैकग्रन्थत्वेन परिणते स्त इति श्रीमद्भिर्मलयगिरिपादैरस्य बृहत्कल्पसूत्रस्य वृत्तेरुपोद्घाते आवेदितं वरीवृत्यते (दृश्यतां पत्रं २ पङ्क्तिः १२), अत एव ४६०० श्लोकपरिमितोपलभ्यमानतद्वृत्त्यंशमध्ये न क्वापि निर्युक्तिगाथादिको विभागो निर्दिष्टो विभाव्यते । किञ्च आचार्यश्रीक्षेमकीर्तिपाद-विहितवृत्त्यंशमध्ये निर्युक्तिगाथा-पुरातनगाथा-सङ्ग्रहगाथा-द्वारगाथादिको विभागोऽस्माभिः संशोधनार्थं सञ्चितासु ताटी० मो० ले० त० डे० भा० कां० संज्ञकासु सवृत्तिकस्यास्य बृहत्कल्पसूत्रस्य हस्तलिखितासु सप्तसु प्रतिषु वैषम्येण निरीक्ष्यते, चूर्णौ विशेषचूर्णौ चाप्ये-तन्निर्देशो वैषम्येणाकल्यत इति । एतत् सर्वमस्माभिः तत्र तत्र स्थले टिप्पणीरूपेणोल्लिखितमपि विद्वद्वर्गसुखावगमार्थं पुनरत्र सङ्गृह्यत इति]

पत्रम्	गाथा	गाथाङ्कः	मूले मुद्रितो निर्युक्तिगाथा-दिको निर्देशः	प्रत्यन्तरादिगतो निर्युक्तिगाथा-दिको निर्देशः
१८०	उद्दिसिय पेह अंतर	६०५	निर्युक्तिगाथा सर्वासु प्रतिषु	
१८६	समणे समणी सावग	६२६	सङ्ग्रहगाथा त० डे० भा० कां०	निर्युक्तिगाथा मो० ले० (टि० ६)
१८८	दमए दूभगे भट्टे	६३२	० त० डे० भा० कां०	निर्युक्तिगाथा मो० ले० (टि० २)
१८९	इत्थी पुरिस नपुंसग	६३७	० त० डे० भा० कां०	निर्युक्तिगाथा मो० ले० (टि० ५)
१९९	देविंदरायगहवइ-	६६९	सङ्ग्रहगाथा सर्वासु प्रतिषु	
२०६	गीयत्थो य विहारो	६८८	निर्युक्तिगाथा सर्वासु प्रतिषु	
२०८	एगविहारी अ अजाय-	६९४	निर्युक्तिगाथा सर्वासु प्रतिषु	सङ्ग्रहगाथा पत्र २१० भा० (टि० २)
२१२	अबहुस्सुए अगीयत्थे	७०३	निर्युक्तिगाथा त० डे०	० मो० ले० भा० कां० (टि० ९)
२१३	सत्तरत्तं तवो होइ	७०५	निर्युक्तिगाथा सर्वासु प्रतिषु	
२२७	अभिगए पडिबद्धे	७३३	निर्युक्तिश्लोक मो० ले० त० डे० कां०	सङ्ग्रहगाथा भा० (टि० २)
२३२	आहारे उवकरणे	७४७	सङ्ग्रहगाथा सर्वासु प्रतिषु	
२४९	परिणाम अपरिणामे	७९२	निर्युक्तिगाथा मो० ले० त० डे० कां०	द्वारगाथा भा० (टि० २)

पत्रम्	गाथा	गाथाङ्कः मूले मुद्रितो निर्युक्तिगाथादिको निर्देशः	प्रत्यन्तरादिगतो निर्युक्तिगाथादिको निर्देशः
२६०	**पडिसेहम्मि उ छक्कं**	८१४ **निर्युक्तिगाथा** सर्वासु प्रतिषु	
२८५	**पडिसेहणा खरंटण**	८९६ **सङ्ग्रहगाथा** सर्वासु प्रतिषु	
२९१	**सोऊण य घोसणयं**	९२५ **भद्रबाहुस्वामिविरचिता गाथा** सर्वासु प्रतिषु	
२९४	**तं काय परिच्चयई**	९३० **निर्युक्तिगाथा** सर्वासु प्रतिषु	
२९६	**देसो व सोवसग्गो**	९३७ **सङ्ग्रहगाथा** सर्वासु प्रतिषु	
३००	**आयं कारण गाढं**	९५१ **निर्युक्तिगाथा** मो० ले० त० डे० कां०	० भा० (टि० १)
३०२	**खेत्तोयं कालोयं**	९५८ **निर्युक्तिगाथा** मो० ले० त० डे० कां०	० भा० (टि० ३)
३१८	**मरुएहि य दिट्ठंतो**	१०१२ **निर्युक्तिगाथा** सर्वासु प्रतिषु	
३२२	**विज्जे पुच्छण जयणा**	१०२७ **निर्युक्तिगाथा** सर्वासु प्रतिषु	
३२३	**पउमुप्पल माउलिंगे**	१०२९ **निर्युक्तिगाथा** सर्वासु प्रतिषु (पत्रं ३२५ गाथा १०३३ टीकान्तः)	**पुरातना गाथा** चूर्णौ पत्रं ३२५ (टि० १)
३४४	**गावो तणाति सीमा**	१०९६ **निर्युक्तिगाथा** मो० ले० त० डे० कां०	**सङ्ग्रहगाथा** भा० (टि० २)
३४७	**पढमेत्थ पडहछेदं**	११०९ **निर्युक्तिगाथा** मो० ले० त० डे० कां०	० भा० (टि० १)
३६८	**तित्थाइसेससंजय**	११८५ **सङ्ग्रहगाथा** सर्वासु प्रतिषु	
३९१	**उवएसो सारणा चेव**	१२६६ **निर्युक्तिश्लोक** सर्वासु प्रतिषु	
३९९	**कंदप्पे कुक्कुइए**	१२९५ **सङ्ग्रहगाथा** त० डे० भा० कां०	**निर्युक्तिगाथा** मो० ले० (टि० ६)
४०१	**नाणस्स केवलीणं**	१३०२ **निर्युक्तिगाथा** सर्वासु प्रतिषु	
४०४	**अणुबद्धविग्गहो चिय**	१३१५ **निर्युक्तिगाथा** सर्वासु प्रतिषु	
४०५	**उम्मग्गदेसणा मग्ग-**	१३२१ **निर्युक्तिगाथा** मो० ले० त० डे०	० भा० कां० (टि० १)
४०७	**तवेण सत्तेण सुत्तेण**	१३२८ **निर्युक्तिगाथा** मो० ले० त० डे०	० भा० कां० (टि० १)
४३६	**वेयावच्चगरं बाल**	१४६४ **सङ्ग्रहगाथा** सर्वासु प्रतिषु	
४४१	**देउलिय अणुण्णवणा**	१४९६ **सङ्ग्रहगाथा** सर्वासु प्रतिषु	
४६४	**किं कारणं चमढणा**	१५८४ **निर्युक्तिगाथा** सर्वासु प्रतिषु	
४७३	**दव्वप्पमाण गणणा**	१६११ **सङ्ग्रहगाथा** सर्वासु प्रतिषु	
४७४	**एगो व होज्ज गच्छो**	१६१५ **द्वारगाथा** सर्वासु प्रतिषु	**पुरातनगाथा** चू० विचू० (टि० २)
४९२	**निरवेक्खो तइयाए**	१६७० **निर्युक्तिगाथा** मो० ले० त० डे० कां०	० भा० (टि० १)
४९९	**दोन्नि अणुन्नायाओ**	१६९७ **निर्युक्तिगाथा** मो० ले० त० डे० कां०	**पुरातना गाथा** भा० चू० विचू० (टि० १)
५०४	**विगई विगइभवयवा**	१७०८ **निर्युक्तिगाथा** मो० ले० त० डे० कां०	० भा० चू० विचू० (टि० ३)
५०८	**लेवकडे कायव्वं**	१७१९ **निर्युक्तिगाथा** मो० ले० त० डे० कां०	० भा० (टि० १)

पत्रम्	गाथा	गाथाङ्कः	मूले मुद्रितो निर्युक्तिगाथादिको निर्देशः	प्रत्यन्तरादिगतो निर्युक्तिगाथादिको निर्देशः
५१०	संघाडएण एगो	१७२६	पुरातनगाथा सर्वासु प्रतिषु	० चू० विचू० (टि० १)
५११	विहूयपय मोच गुरुगा	१७३१	निर्युक्तिगाथा मो० ले० त० डे० कां०	द्वारगाथा भा० (टि० ६) पुरातना गाथा विचू० (टि० ५)
५१९	संजयकडे य देसे	१७६१	निर्युक्तिगाथा मो० ले० त० डे०	पुरातना गाथा भा० कां० विचू० (टि० २)
५२४	साहम्मियाण अट्ठा	१७७४	निर्युक्तिगाथा मो० ले० त० डे०	पुरातना गाथा भा० कां० (टि० २)
५३१	एएहिं कारणेहिं	१८०१	निर्युक्तिगाथा सर्वासु प्रतिषु	
५३७	दाऊण अन्नदव्वं	१८२६	निर्युक्तिगाथा मो० ले० त० डे० कां०	० भा० (टि० २)
५४२	गंतूण पडिनियत्तो	१८५०	निर्युक्तिगाथा मो० ले० त० डे०	पुरातना गाथा भा० कां० विचू० (टि० २)
५४३	दव्वेण य भावेण य	१८५४	निर्युक्तिगाथाद्वय मो० ले० त० डे० कां०	० भा० (टि० ४)
५४३	सुन्नो चउत्थ भंगो	१८५५		
५४५	किं उवघातो धोए	१८६५	निर्युक्तिगाथा मो० ले०	० त० डे० भा० कां० (टि० ३)
५६५	कोई मज्जणगविहिं	१९३८	निर्युक्तिगाथा मो० ले०	पुरातना गाथा त० डे० भा० कां० विचू० (टि० ४)
५६८	उसिणे संसट्ठे वा	१९५१	निर्युक्तिगाथा मो० ले०	सङ्ग्रहगाथा त० डे० भा० कां० (टि० २)
५६९	तिगसंवच्छर तिग दुग	१९५४	निर्युक्तिगाथा सर्वासु प्रतिषु	
५७५	विज्जस्स व दव्वस्स व	१९७३	निर्युक्तिगाथा मो० ले० त० डे०	० भा० कां० (टि० १)
५८५	मासस्सुवरिं वसती	२०२३	निर्युक्तिगाथा मो० ले०	० त० डे० भा० कां० (टि० २)
५९७	जत्तो दुस्सीला खलु	२०६५	निर्युक्तिगाथा मो० ले० त० डे० कां०	० भा० (टि० १)
५९८	जहियं च अगारिजणो	२०७२	निर्युक्तिगाथा मो० ले०	० त० डे० भा० कां० (टि० २)
६०१	तरुणीण अभिद्दवणे	२०८३	निर्युक्तिगाथा मो० ले० त० डे०	० भा० कां० (टि० १)
६०७	गच्छे जिणकप्पम्मि य	२१०९	निर्युक्तिगाथा मो० ले०	० त० डे० भा० कां० (टि० १)
६०७	दिट्ठंतो गुहासीहे	२११३	निर्युक्तिगाथा मो० ले० त० डे०	० भा० कां० (टि० २)
६१४	सोऊण य समुदाणं	२१३४	निर्युक्तिगाथा तादी० मो० ले० त० डे० कां०	० भा० (टि० १)
६१६	दुविहो य होइ अग्गी	२१४५	निर्युक्तिगाथा तादी० मो० ले० त० डे० कां०	० भा० (टि० २)
६१७	भावम्मि होइ वेदो	२१४९	० तादी० मो० ले० भा०	निर्युक्तिगाथा त० डे० कां० (टि० १)
६१८	कोई तत्थ भणिज्जा	२१५७	निर्युक्तिगाथा तादी० मो० ले० त० डे० कां०	० भा० (टि० ३)

पत्रम्	गाथा	गाथाङ्कः	मूले मुद्रितो निर्युक्तिगाथादिको निर्देशः	प्रत्यन्तरादिगतो निर्युक्तिगाथादिको निर्देशः
६२१	हत्थीणं परिवाडी	२१६७	**निर्युक्तिगाथा** मो० ले० त० डे० कां०	० भा० (टि० २)
६२८	वीयाराभिमुहीओ	२१९५	**निर्युक्तिगाथा** मो० ले० कां०	० त० डे० भा० (टि० १)
६३०	अद्धाणनिग्गयाई	२२०७	**निर्युक्तिगाथा** मो० ले० त० डे० कां०	० भा० (टि० ४)
६३१	सामायारिकडा खलु	२२१०	**निर्युक्तिगाथा** सर्वासु प्रतिषु	
६३६	एगा व होज्ज साही	२२३४	**निर्युक्तिगाथा** मो० ले०	**द्वारगाथा** त० डे० भा० कां० (टि० २)
६४०	दोहि वि रहिय सकासं	२२४९	**निर्युक्तिगाथा** मो० ले०	**पुरातनगाथा** त० डे० भा० कां० चू० विचू० (टि० ७)
चैत्यानि 'पूर्वाणि वा' चिरन्तनानि **जीवन्तस्वामिप्रतिमा**दीनि 'अभिनवानि वा' तत्कालकृतानि, 'एतानि ममादृष्टपूर्वाणि' इति बुद्ध्या तेषां वन्दनाय गच्छति ॥ २७५३ ॥ **विभागः ३ पत्रम् ७७६**

जीवन्तस्वामिप्रतिमावन्दनार्थ**मुज्जयिन्यामार्यसुहस्तिन** आगमनम् । तत्र च **रथयात्रायां** राजाङ्गणप्रदेशे रथपुरतः स्थिता**नार्यसुहस्ति**गुरून् दृष्ट्वा नृपतेर्जातिस्मरणम् । **विभागः ३ पत्रम् ९१८**

कोशलायां जीवन्तस्वामिप्रतिमा **विभागः ५ पत्रम् १५३६**

[५ जैनस्थविराचार्या राजानश्च]

(१) श्रेणिकराजः

दिक्खा य सालिभद्दे, उवकरणं सयसहस्सेहिं ॥ ४२१९ ॥

तथा **राजगृहे श्रेणिके** राज्यमनुशासति **शालिभद्रस्य** सुप्रसिद्धचरितस्य दीक्षायां शतसहस्राभ्याम् 'उपकरणं' रजोहरण-प्रतिग्रहलक्षणमानीतम् । अतो ज्ञायते यथा **राजगृहे कुत्रिकापण** आसीदिति **पुरातनगाथा**समासार्थः ॥ ४२१९ ॥ **विभागः ४ पत्रम् ११४५**

(२) चण्डप्रद्योतराजः

पज्जोए णरसीहे, णव उज्जेणीए कुत्तिया आसी ॥ ४२२० ॥

× × × **चण्डप्रद्योत**नाम्नि नरसिंहे **अवन्तिजनपदा**धिपत्यमनुभवति नव **कुत्रिकापणाः उज्जयिन्या**मासीरन् । **विभागः ४ पत्रम् ११४५**

(३) मौर्यपदव्युत्पत्तिश्चन्द्रगुप्तश्चाणक्यश्च

मुरियादी आणाए, अणवत्थ परंपराए थिरिकरणं ।
मिच्छत्ते संकादी, पसज्जणा जाव चरिमपदं ॥ २४८७ ॥

अपराधपदे वर्त्तमानस्तीर्थकृतामाज्ञाभङ्गं करोति तत्र चतुर्गुरु । अत्र च **मौर्यैः-मयूरपोषकवंशोद्भवैः** आदिशब्दादपरैश्चाज्ञासारैः राजभिर्दृष्टान्तः । × × × × तथा चात्र पूर्वोद्दिष्टं **मौर्यदृष्टान्त**माह—

भत्तमदाणमडंते, आणट्ठवणंब छेत्तु वंसवती ।
गविसण पत्त दरिसए, पुरिसवइ सबालडहणं च ॥ २४८९ ॥

पाडलिपुत्ते नयरे **चंदगुत्तो** राया । सो य **मोरपोसगपुत्तो** त्ति जे खत्तिया अभिजाणंति ते तस्स आणं परिभवंति । **चाणक्कस्स** चिंता जाया—आणाहीणो केरिसो राया ? तम्हा जहा एयस्स आणा तिक्खा भवइ तहा करेमि त्ति । तस्स य **चाणक्कस्स** कप्पडियत्ते भिक्खं अडंतस्स एगम्मि गामे भत्तं न लद्धं । तत्थ य गामे बहू अंबा वंसा य अत्थि । तओ तस्स गामस्स पडिनिविट्ठेणं आणाठवणानिमित्तं इमेरिसो लेहो पेसिओ—आम्रान् छित्त्वा वंशानां वृतिः शीघ्रं कार्येति । तेहि अ गामेअगेहिं 'दुल्लिहियं' ति काउं वंसे छेत्तुं अंबाण वई कया । गवेसावियं **चाणक्केण**—किं कयं ? ति । तओ तत्थागंतूण उवालद्धा ते गामेयगा—एते वंसगा रोहगादिसु उवउवज्जंति, कीस मे छिन्ना ? त्ति । दंसियं लेहचीरियं—अन्नं संदिट्ठं अन्नं चेव करेह त्ति । तओ पुरिसेहिं अधोसिरेहिं वइं काउं सो गामो सव्वो दड्ढो ॥

अथ गाथाक्षरगमनिका—**चाणक्यस्य** भिक्षामटतः क्वापि ग्रामे भक्तस्य 'अदानं' भिक्षा न लब्धेत्यर्थः । तत आज्ञास्थापनानिमित्तमयं लेखः प्रेषितः—"अंब छेत्तु वंसवइ" त्ति आम्रान् छित्त्वा वंशानां वृतिः

कर्तव्या । ततो गवेषणे कृते ग्रामेण च पत्रे दर्शिते 'अन्यदादिष्टं मया अन्यदेव च भवद्भिः कृतम्' इत्युपालभ्य ते पुरुषैर्वृतिं कारयित्वा सबाल-वृद्धस्य ग्रामस्य दहनं कृतम् ॥ २४८९ ॥ **विभागः ३ पत्रम् ७०४–५**

(४) मौर्यचन्द्रगुप्त-बिन्दुसारा-ऽशोक-कुणाल-सम्प्रतयः

पाडलऽसोग कुणाले, उज्जेणी लेहलिहण सयमेव ।
अहिय सवत्ती मत्ताहिएण सयमेव वायणया ॥ २९२ ॥
मुरियाण अप्पडिहया, आणा सयमंजणं निवे णाणं ।
गायग सुयस्स जम्मं, गंधव्वाऽऽउट्टणा कोइ ॥ २९३ ॥
चंदगुत्तपपुत्तो य, बिंदुसारस्स नत्तुओ ।
असोगसिरिणो पुत्तो, अंधो जायइ कागिणिं ॥ २९४ ॥

पाडलिपुत्ते नयरे **चंदगुत्त**पुत्तस्स **बिंदुसारस्स** पुत्तो **असोगो** नाम राया । तस्स **असोगस्स** पुत्तो **कुणालो उज्जेणीए** । सा से कुमारभुत्तीए दिन्ना । सो खुड्डलओ । अन्नया तस्स रन्नो निवेइयं, जहा—कुमारो सायरेगट्ठवासो जाओ । तओ रन्ना सयमेव लेहो लिहिओ, जहा—अधीयतां कुमारः । कुमारस्स मायसवत्तीए रन्नो पासे ठियाए भणियं—आणेह, पासामि लेहं । रन्ना पणामिओ । ताहे तीए रन्नो अन्नचित्तत्तणओ सलागाप्रान्तेन निष्ठ्यूतेन तीमित्वा अकारस्योपरि अनुस्वारः कृतः । 'अन्धीयताम्' इति जायं । पडिअप्पिओ रन्नो लेहो । रन्ना वि पमत्तेण न चेव पुणो अणुवाइओ । मुद्दित्ता **उज्जेणिं** पेसिओ । वाइओ । वाइगा पुच्छिया—किं लिहियं? ति । पुच्छिया न कहिंति । ताहे कुमारेण सयमेव वाइओ । चिंतियं च णेणं—**अम्हं मोरियवंसाणं अप्पडिहया आणा,** तो कहं अप्पणो पिउणो आणं अइक्कमेमि? । तत्तसिलागाए अच्छीणि अंजियाणि । ताहे रन्ना नायं । परितप्पित्ता **उज्जेणी** अन्नकुमारस्स दिन्ना । तस्स वि कुमारस्स अन्नो गामो दिन्नो । अन्नया तस्स **कुणालस्स** अंधयस्स पुत्तो जाओ । सो य **अंधकुणालो** गंधव्वे अईवकुसलो । अन्नया अन्नायचज्जाए गायंतो हिंडइ । तत्थ रन्नो निवेइयं, जहा—एरिसो नारिगो गंधव्विओ अंधलओ । रन्ना भणियं—आणेह । आणिओ । जवणिअंतरिओ गायइ । ताहे अईव राया **असोगो** अक्खित्तो । ताहे भणइ—किं देमि? । इत्थ **कुणालेण** गीयं—"चंदगुत्तपपुत्तो य" इत्यादिगाथा । ताहे रन्ना पुच्छियं—को एस तुमं? । तेण कहियं—तुब्भं पुत्तो । जवणियं अवसारेउं कंठे घेत्तुं अंसुपाओ कओ । भणियं च णेण—किं कागिणीए वि नारिहसि जं कागिणिं जायसि? । अमच्चेहिं भणियं—**रायपुत्ताणं रज्जं कागिणी** । रन्ना भणियं—किं काहिसि अंधगो रज्जेणं? । **कुणालो** भणइ—मम पुत्तो अत्थि । कया जाओ? । संपइ भूओ ; आणीओ । **संपइ** त्ति से नामं कयं । रज्जं दिन्नं ॥ **विभागः १ पत्रम् ८८–८९**

(५) सम्प्रतिराज आर्यमहागिरि-आर्यसुहस्तिनौ च

अनुयानं गच्छता चैत्यपूजा स्थिरीकृता भवति । राजा वा कश्चि**दनुयानमहोत्सवकारकः सम्प्रति-नरेन्द्रा**दिवत् तस्य निमन्त्रणं भवति ॥ **विभागः २ पत्रम् ५२८**

अथ "यत्र ज्ञान-दर्शन-चारित्राण्युत्सर्पन्ति तत्र विहर्तव्यम्" (गा० ३२७१) इति यदुक्तं तद्विषयम-भिधित्सुः **सम्प्रतिनृपतिदृष्टान्त**माह—

कोसंबाऽऽहारकते, अज्जसुहत्थीण दमग पव्वज्जा ।
अव्वत्तेणं सामाइएण रण्णो घरे जातो ॥ ३२७५ ॥

कौशाम्ब्यामाहारकृते **आर्यसुहस्तिना**मन्तिके द्रमकेण प्रव्रज्या गृहीता । स तेनाव्यक्तेन सामायिकेन मृत्वा राज्ञो गृहे जात इत्यक्षरार्थः । भावार्थस्तु कथानकगम्यः । तच्चेदम्—

कोसंबीए नयरीए **अज्जसुहत्थी** समोसढा । तया य अंचितकालो । साधुजणो य हिंडमाणो पव्वति । तत्थ एगेण दमएण ते दिट्ठा । ताहे सो भत्तं जायति । तेहिं भणियं—अम्हं आयरिया जाणंति । ताहे सो गतो

आयरियसगासं। आयरिया उवउत्ता। तेहिं णायं—एस पवयणउवग्गहे वट्टिहिति। ताहे भणिओ—जति पव्वयसि तो दिज्जए भत्तं। सो भणइ—पव्वयामि त्ति। ताहे पव्वाइतो, सामाइयं कारिओ। तेण अतिसमुद्दिट्ठं तओ कालगतो। तस्स अव्वत्तसामाइयस्स पभावेण **कुणाल**कुमारस्स अंधस्स रण्णो पुत्तो जातो॥ ३२७५॥

को **कुणालो**? कहिं वा अंधो? त्ति—**पाडलिपुत्ते असोगसिरी** राया। तस्स पुत्तो **कुणालो**। तस्स कुमारभुत्तीए **उज्जेणी** दिण्णा। सो य अट्ठवरिसो। रण्णा लेहो विसज्जितो—शीघ्रमधीयतां कुमारः। असंवत्तिए लेहे रण्णो उट्ठितस्स माइसवत्तीए कतं 'अन्धीयतां कुमारः'। सयमेव तत्तसलागाए अच्छीणि अंजियाणि। सुतं रण्णा। गामो से दिण्णो। गंधव्वकलासिक्खणं। पुत्तस्स रज्जत्थी आगतो **पाडलिपुत्तं**। **असोगसिरि**णो जवणियंतरिओ गंधव्वं करेइ। आउट्टो राया भणइ—मग्गसु जं ते अभिरुइयं ति। तेण भणियं—

चंदगुत्तपपुत्तो य, बिंदुसारस्स नत्तुओ।
असोगसिरिणो पुत्तो, अंधो जायति काकणिं॥ ३२७६॥

चन्द्रगुप्तस्य राज्ञः प्रपौत्रो **बिन्दुसार**स्य नृपतेः 'नप्ता' पौत्रोऽ**शोकश्रियो** नृपस्य पुत्रः **कुणाल**नामा अन्धः 'काकणीं' राज्यं याचते॥ ३२७६॥

तओ राइणा भणितो—किं ते अंधस्स रज्जेणं?। तेण भणियं—पुत्तस्स मे कज्जं ति। राइणा भणियं—कहिं ते पुत्तो? त्ति। तेण आणित्ता दाइओ—इमो मे संपइ जाओ पुत्तो त्ति। तं चेव नामं कयं। तओ संवड्ढिओ। दिन्नं रज्जं। तेण **संपइ**राइणा **उज्जेणिं** आइं काउं **दक्खिणावहो** सव्वो तत्थट्ठिएणं ओअविओ। सव्वे पच्चंतरायाणो वसीकया। तओ सो विउलं रज्जसिरिं भुंजइ। किञ्च—

अज्जसुहत्थाऽऽगमणं, दट्ठुं सरणं च पुच्छणा कहणा।
पावयणम्मि य भत्ती, तो जाता संपतीरण्णो॥ ३२७७॥

जीवन्तस्वामिप्रतिमावन्दनार्थ**मुज्जयिन्यामार्यसुहस्तिन** आगमनम्। तत्र च रथयात्रायां राजाङ्गणप्रदेशे रथपुरतः स्थिता**नार्यसुहस्ति**गुरून् दृष्ट्वा नृपतेर्जातिस्मरणम्। ततस्तत्र गत्वा गुरुपदकमलमभिवन्द्य पृच्छा कृता—भगवन्! अव्यक्तस्य सामायिकस्य किं फलम्?। सूरिराह—राज्यादिकम्। ततोऽसौ सम्भ्रान्तः प्रगृहीताञ्जलिरानन्दोदकपूरपूरितनयनयुगः प्राह—भगवन्! एवमेवेदम्, परमहं भवद्भिः कुत्रापि दृष्टपूर्वो न वा? इति। ततः सूरय उपयुज्य कथयन्ति—महाराज! दृष्टपूर्वः, त्वं पूर्वभवे मदीयः शिष्य आसीरित्यादि। ततोऽसौ परमं संवेगमापन्नस्तदन्तिके सम्यग्दर्शनमूलं पञ्चाणुव्रतमयं श्रावकधर्मं प्रपन्नवान्। ततश्चैवं प्रवचने **सम्प्रति**राजस्य भक्तिः संजाता॥ ३२७७॥ किञ्च—

जवमज्झ मुरियवंसे, दाणे वणि-विवणि दारसंलोए।
तसजीवपडिक्कमओ, पभावओ समणसंघस्स॥ ३२७८॥

यथा यवो मध्यभागे पृथुल आदावन्ते च हीनः एवं **मौर्यवंशो**ऽपि। तथाहि—**चन्द्रगुप्त**स्तावद् बलवाहनादिविभूत्या हीन आसीत्, ततो **बिन्दुसारो** बृहत्तरः, ततोऽप्य**शोकश्री**र्बृहत्तमः, ततः **सम्प्रतिः** सर्वोत्कृष्टः, ततो भूयोऽपि तथैव हानिरवसातव्या, एवं यवमध्यकल्पः **सम्प्रतिनृपति**रासीत्। तेन च राज्ञा 'द्वारसंलोके' चतुर्ष्वपि नगरद्वारेषु दानं प्रवर्त्तितम्। 'वणि-विवणि' त्ति इह ये बृहत्तरा आपणास्ते पणय इत्युच्यन्ते, ये तु दरिद्रापणास्ते विपणयः; यद्वा ये आपणस्थिता व्यवहरन्ति ते वणिजः, ये पुनरापणेन विनाऽप्यूर्द्ध्वस्थिता वाणिज्यं कुर्वन्ति ते विवणिजः। एतेषु तेन राज्ञा साधूनां वस्त्रादिकं दापितम्। स च राजा वक्ष्यमाणनीत्या त्रसजीवप्रतिक्रामकः प्रभावकश्च श्रमणसंघस्याऽऽसीत्॥ ३२७८॥

अथ "दाणे वणि-विवणि दारसंलोए" इति भावयति—

ओदरियमओ दारेसु, चउसुं पि महाणसे स कारेति।
णिंताऽऽणिंते भोयण, पुच्छा सेसे अभुत्ते य॥ ३२७९॥

औदरिकः-द्रमकः पूर्वभवेऽहं भूत्वा मृतः सन् इहाऽऽयात इत्यात्मीयं वृत्तान्तमनुस्मरन् नगरस्य चतुर्ष्वपि

द्वारेषु स राजा सत्राकार-महानसानि कारयति । ततो दीना-ऽनाथादिपथिकलोको यस्तत्र निर्गच्छन् वा प्रविशन् वा भोक्तुमिच्छति स सर्वोऽपि भोजनं कार्यते । यत् तच्छेषमुद्धरति तद् महानसिकानामभवति । ततो राज्ञा ते महानसिकाः पृष्टाः—यद् युष्माकं दीनादिभ्यो ददतामवशिष्यते तेन यूयं किं कुरुथ ? । ते ब्रुवते—अस्माकं गृहे उपयुज्यते । नृपतिराह—यद् दीनादिभिरभुक्तं तद् भवद्भिः साधूनां दातव्यम् ॥ ३२७९ ॥ एतदेवाह—

साहूण देह एयं, अहं भे दाहामि तत्तियं मोल्लं ।
णेच्छंति घरे घेत्तुं, समणा मम रायपिंडो त्ति ॥ ३२८० ॥

साधूनामेतद् भक्त-पानं प्रयच्छत, अहं 'भे' भवतां तावन्मात्रं मूल्यं दास्यामि, यतो मम गृहे श्रमणा राजपिण्ड इति कृत्वा ग्रहीतुं नेच्छन्ति ॥ ३२८० ॥

एमेव तेल्लि-गोलिय-पूविय-मोरंड-दुस्सिए चेव ।
जं देह तस्स मोल्लं, दलामि पुच्छा य महगिरिणो ॥ ३२८१ ॥

एवमेव तैलिकास्तैलम्, गोलिकाः-मथितविक्रायिकास्तक्रादिकम्, पौपिका अपूपादिकम्, मोरण्डकाः-तिलादिमोदकाः तद्विक्रायिकास्तिलादिमोदकान्, दौष्यिका वस्त्राणि च दापिताः । कथम् ? इत्याह—यत् तैल-तक्रादि यूयं साधूनां दत्थ तस्य मूल्यमहं भवतां प्रयच्छामीति । ततश्चाऽऽहार-वस्त्रादौ किमीप्सिते लभ्यमाने श्री**महागिरिरार्यसुहस्तिनं** पृच्छति—आर्य ! प्रचुरमाहार-वस्त्रादिकं प्राप्यते ततो जानीष्व 'मा राज्ञा लोकः प्रवर्तितो भवेत्' ॥ ३२८१ ॥

अज्जसुहत्थि ममत्ते, अणुरायाधम्मतो जणो देती ।
संभोग वीसुकरणं, तक्खण आउट्टणे नियत्ती ॥ ३२८२ ॥

आर्यसुहस्ती जानानोऽप्यनेषणामात्मीयशिष्यममत्वेन भणति—क्षमाश्रमणाः ! 'अनुराजधर्मतः' राजधर्ममनुवर्तमान एष जन एवं यथेप्सितमाहारादिकं प्रयच्छति । तत **आर्यमहागिरिणा** भणितम्—आर्य ! त्वमपीदृशो बहुश्रुतो भूत्वा यद्येवमात्मीयशिष्यममत्वेनेत्थं ब्रवीषि, ततो मम तव चाद्य प्रभृति विष्वक् सम्भोगः-नैकत्र मण्डल्यां समुद्देशनादिव्यवहार इतिः एवं सम्भोगस्य विष्वक्करणमभवत् । तत **आर्यसुहस्ती** चिन्तयति—'मया तावदेकमनेषणीयमाहारं जानताऽपि साधवो ग्राहिताः, स्वयमपि चानेषणीयं भुक्तम्, अपरं चेदानीमहमित्थमपलपामि, तदेतद् मम द्वितीयं बालस्य मन्दत्वमित्यापन्नम्; अथवा नाद्यापि किमपि विनष्टम्, भूयोऽप्यहमेतस्मादर्थात् प्रतिक्रमामि' इति विचिन्त्य तत्क्षणादेवाऽऽवर्त्तनमभवत् । ततो यथावदालोचनां दत्त्वा स्वापराधं सम्यक् क्षामयित्वा तस्या अकल्पप्रतिसेवनायास्तस्य निवृत्तिरभूत् । ततो भूयोऽपि तयोः साम्भोगिकत्वमभवत् ॥ ३२८२ ॥

अथ "त्रसजीवप्रतिक्रामकः" (गा० ३२७८) इत्यस्य भावार्थमाह—

सो रायाऽवंतिवती, समणाणं सावतो सुविहिताणं ।
पच्चंतियरायाणो, सव्वे सद्दाविया तेणं ॥ ३२८३ ॥

'सः' **सम्प्रति**नामा राजा **अवन्तीपतिः** श्रमणानां 'श्रावकः' उपासकः पञ्चाणुव्रतधारी अभवदिति शेषः । ते च शाक्यादयोऽपि भवन्तीत्यत आह—'सुविहितानां' शोभनानुष्ठानानाम् । ततस्तेन राज्ञा ये केचित् प्रात्यन्तिकाः-प्रत्यन्तदेशाधिपतयो राजानस्ते सर्वेऽपि 'शब्दापिताः' आकारिताः ॥ ३२८३ ॥

ततः किं कृतम् ? इत्याह—

कहिओ य तेसि धम्मो, वित्थरतो गाहिता य सम्मत्तं ।
अप्पाहिता य बहुसो, समणाणं भद्दगा होह ॥ ३२८४ ॥

कथितश्च 'तेषां' प्रात्यन्तिकराजानां तेन विस्तरतो धर्मः । ग्राहिताश्च ते सम्यक्त्वम् । ततः स्वदेशं गता अपि ते बहुशस्तेन राज्ञा सन्दिष्टाः, यथा—श्रमणानां 'भद्रकाः' भक्तिमन्तो भवत ॥ ३२८४ ॥

अथ कथमसौ श्रमणसङ्घप्रभावको जातः ? इत्याह—

अणुजाणे अणुजाती, पुप्फारुहणाइ उक्किरणगाइं।
पूयं च चेइयाणं, ते वि सरज्जेसु कारिंति ॥ ३२८५ ॥

अनुयानं-रथयात्रा तत्रासौ नृपतिः 'अनुयाति' दण्ड-भट-भोजिकादिसहितो रथेन सह हिण्डते । तत्र च पुष्पारोपणम् आदिशब्दाद् माल्य-गन्ध-चूर्णा-ऽऽभरणारोपणं च करोति । 'उक्किरणगाइं' ति रथपुरतो विविधफलानि खाद्यकानि कपर्दक-वस्त्रप्रभृतीनि चोत्किरणानि करोति । आह च **निशीथचूर्णिकृत्**—रहग्गतो य विविहफले खज्जगे य कवड्डग-वत्थमादी य ओकिरणे करेइ त्ति ॥ अन्येषां च चैत्यगृहस्थितानां 'चैत्यानां' भगवद्बिम्बानां पूजां महता विच्छर्देन करोति । तेऽपि च राजान एवमेव स्वराज्येषु रथयात्रामहोत्सवादिकं कारयन्ति ॥ ३२८५ ॥ इदं च ते राजानः **सम्प्रति**नृपतिना भणिताः—

जति मं जाणह सामिं, समणाणं पणमहा सुविहियाणं।
दव्वेण मे न कज्जं, एयं खु पियं कुणह मज्झं ॥ ३२८६ ॥

यदि मां स्वामिनं यूयं 'जानीथ' मन्यध्वे ततः श्रमणेभ्यः सुविहितेभ्यः 'प्रणमत' प्रणता भवत । 'द्रव्येण' दण्डदातव्येनार्थेन मे न कार्यम्, किन्त्वेतदेव श्रमणप्रणमनादिकं मम प्रियम्, तदेतद् यूयं कुरुत ॥ ३२८६ ॥

वीसज्जिया य तेणं, गमणं घोसावणं सरज्जेसु।
साहूण सुहविहारा, जाता पच्चंतिया देसा ॥ ३२८७ ॥

एवं 'तेन' राज्ञा शिक्षां दत्त्वा विसर्जिताः । ततस्तेषां स्वराज्येषु गमनम् । तत्र च तैः स्वदेशेषु सर्वत्राप्यमाघातघोषणं कारितम्, चैत्यगृहाणि च कारितानि । तथा प्रात्यन्तिका देशाः साधूनां सुखविहाराः सञ्जाताः । कथम् ? इति चेदुच्यते— तेन **सम्प्रति**ना साधवो भणिताः—भगवन्तः ! एतान् प्रत्यन्तदेशान् गत्वा धर्मकथया प्रतिबोध्य पर्यटत । साधुभिरुक्तम्—राजन् ! एते साधूनामाहार-वस्त्र-पात्रादेः कल्प्या-ऽकल्प्यविभागं न जानन्ति ततः कथं वयमेतेषु विहरामः ? । ततः **सम्प्रति**ना साधुवेषेण स्वभटाः शिक्षां दत्त्वा तेषु प्रत्यन्तदेशेषु विसर्जिताः ॥ ३२८७ ॥ ततः किमभूत् ? इत्याह—

समणभडभाविएसुं, तेसू रज्जेसु एसणादीसु।
साहू सुहं विहरिया, तेणं चिय भद्दगा ते उ ॥ ३२८८ ॥

श्रमणवेषधारिभिर्भटैरेषणादिभिः शुद्धमाहारादिग्रहणं कुर्वाणैः साधुविधिना भावितेषु तेषु राज्येषु साधवः सुखं विहृताः । तत एव च **सम्प्रति**नृपतिकालात् 'ते' प्रत्यन्तदेशा भद्रकाः सञ्जाताः ॥ ३२८८ ॥

इदमेव स्पष्टयति—

उदिण्णजोहाउलसिद्धसेणो, स पत्थिवो णिज्जियसत्तुसेणो।
समंततो साहुसुहप्पयारे, अकासि अंधे दमिले य घोरे ॥ ३२८९ ॥

उदीर्णाः-प्रबला ये योधास्तैराकुला-सङ्कीर्णा सिद्धा प्रतिष्ठिता सर्वत्राप्यप्रतिहता सेना यस्य स तथा, अत एव च 'निर्जितशत्रुसेनः' स्ववशीकृतविपक्षनृपतिसैन्यः, एवंविधः स **सम्प्रति**नामा पार्थिवः **अन्ध्रान्** **द्रविडान्** चशब्दाद् **महाराष्ट्र-कुडुक्का**दीन् प्रत्यन्तदेशान् 'घोरान्' प्रत्यपायबहुलान् समन्ततः 'साधुसुखप्रचारान्' साधूनां सुखविहरणान् 'अकार्षीत्' कृतवान् ॥ ३२८९ ॥ **विभागः ३ पत्रम् ९१७-२१**

(६) आर्यसुहस्ती आर्यसमुद्रः आर्यमङ्गुश्च

गणहर-थेरकयं वा, आदेसा मुक्कवागरणतो वा।
धुव-चलविसेसतो वा, अंगा-ऽणंगेसु णाणत्तं ॥ ३४४ ॥

यद् गणधरैः कृतं तदङ्गप्रविष्टम् । यत्पुनर्गणधरकृतादेव स्थविरैर्निर्यूढम्; ये चादेशाः, यथा—**आर्यमङ्गु-**

राचार्यस्त्रिविधं शङ्खमिच्छति—एकभविकं बद्धायुष्कमभिमुखनामगोत्रं च, **आर्यसमुद्रो द्विविधम्**—बद्धायुष्कमभिमुखनामगोत्रं च, **आर्यसुहस्ती एकम्**—अभिमुखनामगोत्रमिति; यानि च मुक्तकानि व्याकरणानि, यथा—"वर्ष देव ! **कुणालायाम्**" इत्यादि, तथा "**मरुदेवा** भगवती अनादिवनस्पतिकायिका तद्भवेन सिद्धा" इत्यादि; एतत्स्थविरकृतम् । आदेशा मुक्तकव्याकरणतश्च अनङ्गप्रविष्टम् । अथवा ध्रुव-चलविशेषतोऽङ्ग-ऽनङ्गेषु नानात्वम् । तद्यथा—ध्रुवं अङ्गप्रविष्टम्, तच्च द्वादशाङ्गम्, तस्य नियमतो निर्यूहणात्; चलानि प्रकीर्णकानि, तानि हि कदाचिन्निर्यूह्यन्ते कदाचिन्न, तान्यनङ्गप्रविष्टमिति ॥ ३४४ ॥

विभागः १ पत्रम् ४४-४५

(७) आर्यवज्रस्वामी

अत्रौपम्यमार्य**वज्रैः**, स बालभावे कर्णाभ्याहृतं सूत्रं कृतवान् । पश्चात् तस्योद्दिष्टं समुद्दिष्टमनुज्ञातम् अर्थश्च तदैव द्वितीयपौरुष्यां कथितः । **विभागः १ पत्रम् ११९**

(८) कालिकाचार्याः तत्प्रशिष्यः सागरश्च

सागारियमप्पाहण, सुवन्न सुयसिस्स खंतलक्खेण ।
कहणा सिस्सागमणं, धूलीपुंजोवमाणं च ॥ २३९ ॥

उज्जेणीए नयरीए **अज्जकालगा** नामं आयरिया सुत्त-ऽत्थोववेया बहुपरिवारा विहरंति । तेसिं **अज्जकालगाणं** सीसस्स सीसो सुत्त-ऽत्थोववेओ **सागरो** नामं **सुवन्नभूमीए** विहरइ । ताहे **अज्जकालया** चिंतेंति—एए मम सीसा अणुओगं न सुणंति तओ किमेएसिं मज्झे चिट्ठामि ?, तत्थ जामि जत्थ अणुयोगं पवत्तेमि, अवि य एए वि सिस्सा पच्छा लज्जिया सोच्छिहिंति । एवं चिंतिऊण सेज्जायरमापुच्छंति—कहं अन्नत्थ जामि ? तओ मे सिस्सा सुणेहिंति, तुमं पुण मा तेसिं कहेज्जा, जइ पुण गाढतरं निब्बंधं करिज्जा तो खरंटेउं साहेज्जा, जहा—**सुवन्नभूमीए सागराणं** सगासं गया । एवं अप्पाहित्ता रत्तिं चेव पसुत्ताणं गया **सुवण्णभूमिं** । तत्थ गंतुं खंतलक्खेण पविट्ठा **सागराणं** गच्छं। तओ **सागरायरिया** 'खंत' त्ति काउं नं नाढाइया अब्भुट्ठाणाइणि । तओ अत्थपोरिसीवेलाए **सागरायरिए**णं भणिया—खंता ! तुब्भं एयं गमइ ? । आयरिया भणंति—आमं । 'तो खाइं सुणेह' त्ति पकहिया । गव्वायंता य कहिंति । इयरे वि सीसा पभाए संते संभंते आयरियं अपासंता सव्वत्थ मग्गिउं सिज्जायरं पुच्छंति । न कहेइ, भणइ य—तुब्भं अप्पणो आयरिओ न कहेइ, मम कहं कहेइ ? । ततो आउरीभूएहिं गाढनिब्बंधे कए कहियं, जहा—तुब्भच्चएण निव्वेएण **सुवन्नभूमीए सागराणं** सगासं गया । एवं कहित्ता ते खरंटिया । तओ ते तह च्चेव उच्चलिया **सुवन्नभूमिं** गंतुं । पंथे लोगो पुच्छइ—एस कयरो आयरिओ जाइ ? । ते कहिंति—**अज्जकालगा** । तओ **सुवन्नभूमीए सागराणं** लोगेण कहियं, जहा—**अज्जकालगा** नाम आयरिया बहुस्सुया बहुपरिवारा इहाऽऽगंतुकामा पंथे वट्टंति । ताहे **सागरा** सिस्साणं पुरओ भणंति—मम अज्जया इंति, तेसिं सगासे पयत्थे पुच्छीहामि त्ति । अचिरेणं ते सीसा आगया । तत्थ अग्गिल्लेहिं पुच्छिज्जंति—किं इत्थ आयरिया आगया चिट्ठंति ? । नत्थि, नवरं अन्ने खंता आगया । केरिसा ? । वंदिए नायं 'एए आयरिया' । ताहे सो **सागरो** लज्जिओ—बहुं मए इत्थ पलवियं, खमासमणा य वंदाविया । ताहे अवरण्हवेलाए मिच्छा दुक्कडं करेइ 'आसाइय' त्ति । भणियं च णेण—केरिसं खमासमणो ! अहं वागरेमि ? । आयरिया भणंति—सुदरं, मा पुण गव्वं करिज्जासि । ताहे धूलीपुंजदिट्ठंतं करेंति—धूली हत्थेण घेत्तुं तिसु ठ्ठाणेसु ओयारेंति—जहा एस धूली ठविज्जमाणी उक्खिप्पमाणी य सव्वत्थ परिसडइ, एवं अत्थो वि तित्थगरेहिंतो गणहराणं गणहरेहिंतो जाव अम्हं आयरिउवज्झायाणं परंपरएणं आगयं, को जाणइ कस्स केइ पज्जाया गलिया ? ता मा गव्वं काहिसि । ताहे मिच्छा दुक्कडं करित्ता आढत्ता **अज्जकालिया** सीसपसीसाण अणुयोगं कहेउं ॥ **विभागः १ पत्रम् ७३-७४**

(९) कालकाचार्यो गर्दभिल्लश्च

विज्जा-ओरस्सबली, तेयसलद्धी सहायलद्धी वा ।
उप्पादेउं सासति, अतिपंतं कालकज्जो वा ॥ ५५९३ ॥

यो विद्याबलेन युक्तो यथा **आर्यखपुटः**, औरसेन वा बलेन युक्तो यथा **बाहुबली**, तेजोलब्ध्या वा सलब्धिको यथा **ब्रह्मदत्तः सम्भूत**भवे, सहायलब्धियुक्तो वा यथा **हरिकेशबलः** । ईदृशोऽधिकरण-मुत्पाद्य 'अतिप्रान्तम्' अतीवप्रवचनप्रत्यनीकं शास्ति, '**कालिकाचार्य** इव' यथा **कालकाचार्यो गर्दभिल्ल-राजानं** शासितवान् । कथानकं सुप्रतीतत्वान्न लिख्यते ॥ ५५९३ ॥ **विभागः ५ पत्रम् १४८०**

(१०) शालवाहननृपः

पइट्ठाणं नयरं । **सालवाहणो** राया । सो वरिसे वरिसे **भरुयच्छे नहवाहणं** (**नरवाहणं** प्रत्यन्तरे) रोहेइ । जाहे य वरिसारत्तो भवति ताहे सयं नयरं पडियाइ । एवं कालो वच्चइ ।

विभागः १ पत्रम् ५२

महुराऽऽणत्ती दंडे, सहसा णिग्गम अपुच्छिउं कयरं ।
तस्स य तिक्खा आणा, दुहा गता दो वि पाडेउं ॥ ६२४४ ॥
सुतजम्म-महुरपाडण-निहिलंभनिवेदणा जुगव दित्तो ।
सयणिज्ज खंभ कुड्डे, कुट्टेइ इमाइँ पलवंतो ॥ ६२४५ ॥

गोयावरीए णदीए तडे **पतिट्ठाणं** नगरं । तत्थ **सालवाहणो** राया । तस्स **खरओ** अमच्चो । अन्नया सो **सालवाहणो** राया दंडनायगमाणवेइ—**महुरं** घेत्तूणं सिग्घमागच्छ । सो य सहसा अपुच्छिऊण दंडेहिं सह निग्गओ । तओ चिंता जाया—का **महुरा** घेत्तव्वा ? **दक्खिणमहुरा उत्तरमहुरा** वा ? । तस्स आणा तिक्खा, पुणो पुच्छिउं न तीरति । तओ दंडा दुहा काऊण दोसु वि पेसिया । गहियाओ दो वि **महुरा**ओ । तओ वद्धावगो पेसिओ । तेण गंतूण राया वद्धाविओ—देव ! दो वि **महुरा**ओ गहियाओ । इयरो आगओ—देव ! अग्गमहिसीए पुत्तो जाओ । अण्णो आगतो—देव ! अमुगत्थ पदेसे विपुलो निही पायडो जातो । तओ उवरुवरिं कल्लाणनिवेयणेण हरिसवसविसप्पमाणहियओ परव्वसो जाओ । तओ हरिसं धारेउमचायंतो सयणिज्जं कुट्टेइ, खंभे आहणइ, कुड्डं विद्दवइ, बहूणि य असमंजसाणि पलवति । तओ **खरगे**णामच्चेणं तमुवाएहिं पडिबोहिउकामेण खंभा कुड्डा बहू विद्दविया । रन्ना पुच्छियं—केणेयं विद्दवियं ? । सो भणइ—तुब्भेहिं । ततो 'मम सम्मुहमलीयमेयं भणति' रुट्ठेणं रन्ना सो **खरगो** पाएण ताडितो । तओ संकेइयपुरिसेहिं उप्पाडिओ अण्णत्थ संगोविओ य । तओ कम्हिइ पओयणे समावडिए रण्णा पुच्छिओ—कत्थ अमच्चो चिट्ठति ? । संकेइयपुरिसेहि य 'देव ! तुम्हं अविणयकारि' त्ति सो मारिओ । राया विसूरिउं पयत्तो—दुट्ठु कयं, मए तया न किंपि चेइयं ति । तओ समावत्थो जाओ ताहे संकेइयपुरिसेहिं विन्नत्तो—देव ! गवेसामि, जइ वि कयाइ चंडालेहिं रक्खिओ होज्जा । तओ गवेसिऊण आणिओ । राया संतुट्ठो । अमच्चेण सब्भावो कहिओ । तुट्ठेण विउला भोगा दिन्ना ॥

साम्प्रतमक्षरार्थो विव्रियते—**सातवाहनेन** राज्ञा **मथुरा**ग्रहणे "दंडि"त्ति दण्डनायकस्याज्ञप्तिः कृता । ततो दण्डाः सहसा 'कां **मथुरां** गृह्णीमः ?' इत्यपृष्ट्वा निर्गताः । तस्य च राज्ञ आज्ञा तीक्ष्णा, ततो न भूयः प्रष्टुं शक्नुवन्ति । ततस्ते दण्डा द्विधा गताः, द्विधा विभज्य एको **दक्षिणमथुरा**यामपर **उत्तरमथुरा**यां गता इत्यर्थः । द्वे अपि च **मथुरे** पातयित्वा ते समागताः ॥ ६२४४ ॥

सुतजन्म-**मथुरा**पातन-निधिलाभानां युगपद् निवेदनायां हर्षवशात् **सातवाहनो** राजा 'दीप्तः' दीप्तचित्तोऽभवत् । दीप्तचित्ततया च 'इमानि' वक्ष्यमाणानि प्रलपन् शयनीय-स्तम्भ-कुड्यानि कुट्टयति ॥ ६२४५ ॥

तत्र यानि प्रलपति तान्याह—

सच्चं भण गोदावरि !, पुव्वसमुद्देण साविया संती।
सातावाहणकुलसरिसं, जति ते कूले कुलं अत्थि ॥ ६२४६ ॥
उत्तरतो हिमवंतो, दाहिणतो सालिवाहणो राया।
समभारभरक्कंता, तेण न पल्हत्थए पुहवी ॥ ६२४७ ॥

हे गोदावरि ! पूर्वसमुद्रेण 'शपिता' दत्तशपथा सती सत्यं 'भण' ब्रूहि—यदि तव कूले **सातवाहन-कुलसदृशं कुलम**स्ति ॥ ६२४६ ॥

'उत्तरतः' उत्तरस्यां दिशि **हिमवान्** गिरिः, दक्षिणतस्तु **सालवाहनो** राजा, तेन समभारभराक्रान्ता सती पृथिवी न पर्यस्यति, अन्यथा यदि अहं दक्षिणतो न स्यां ततो **हिमव**द्गिरिभाराक्रान्ता नियमतः पर्यस्येत् ॥ ६२४७ ॥

एयाणि य अन्नाणि य, पलवियवं सो अणिच्छियव्वाइं।
कुसलेण अमच्चेणं, खरगेणं सो उवाएणं ॥ ६२४८ ॥

'एतानि' अनन्तरोदितानि अन्यानि च सोऽनीप्सितव्यानि बहूनि प्रलपितवान्। ततः कुशलेन **खरकना**म्नाऽ-**मात्येनोपायेन** प्रतिबोधयितुकामेनेदं विहितम् ॥ ६२४८ ॥ किम् ? इत्याह—

विद्दवितं केणं ति व, तुब्मेहिं पायतालणा खरए।
कत्थ त्ति मारिओ सो, दुट्ठु त्ति य दरिसिते भोगा ॥ ६२४९ ॥

'विद्रावितं' विनाशितं समस्तं स्तम्भ-कुड्यादि। राज्ञा पृष्टम्—केनेदं विनाशितम् ?। अमात्यः सम्मुखीभूय सरोषं निष्ठुरं वक्ति—युष्माभिः। ततो राज्ञा कुपितेन तस्य पादेन ताडना कृता। तदनन्तरं सङ्केतितपुरुषैः स उत्पाटितः सङ्गोपितश्च। ततः समागते कस्मिंश्चित् प्रयोजने राज्ञा पृष्टम्—कुत्रामात्यो वर्तते ?। सङ्केतितपुरुषै-रुक्तम्—देव ! युष्मत्पादानामविनयकारी इति मारितः। ततः 'दुष्टं कृतं मया' इति प्रभूतं विसूरितवान्। स्वस्थीभूते च तस्मिन् सङ्केतितपुरुषैरमात्यस्य दर्शनं कारितम्। ततः सद्भावकथनानन्तरं राज्ञा तस्मै विपुला भोगाः प्रदत्ता इति ॥ ६२४९ ॥ **विभागः ६ पत्रम् १६४७-४९**

(११) पादलिप्ताचार्याः

कट्ठे पुत्थे चित्ते, दंतोवल मट्टियं व तत्थगतं।
एमेव य आगंतु, पालित्तय वेट्टिया जवणे ॥ ४९१५ ॥

याः काष्ठकर्मणि पुस्तकर्मणि वा चित्रकर्मणि वा निर्वर्तिता स्त्रीप्रतिमा यद्वा दन्तमयमुपलमयं मृत्तिकामयं वा स्त्रीरूपं यस्यां वसतौ वसति तत्र तस्यां तत्रगतं मन्तव्यम्। तद्विषयो दोषोऽप्युपचारात् तत्रगत उच्यते। एवमेव चागन्तुकमपि मन्तव्यम्। आगन्तुकं नाम यद् अन्यत आगतम्। ततो यथा तत्रगताः स्त्रीप्रतिमा भवन्ति तथाऽऽगन्तुका अपि भवेयुः। तथा चात्र **पादलिप्ताचार्य**कृता 'वेट्टिक' त्ति **राजकन्यका** दृष्टान्तः। स चायम्—

पालित्तायरिएहिं रन्नो भगिणीसरिसिया **जंतपडिमा** कया। चंकमणुम्मेसनिमेसमयी तालविंटहत्था आयरियाणं पुरतो चिट्ठइ। राया वि अईव **पालित्तग**स्स सिणेहं करेइ। धिज्जाइएहिं पउट्ठेहिं रन्नो कहियं—*भगिणी ते समणएणं अभिओगिया। राया न पत्तियति, भणिओ अ—पेच्छ, दंसेमु ते। राया आगतो। पासित्ता* **पालित्तायरियाणं** रुट्ठो पच्चोसरिओ य। तओ *सा आयरिएहिं चड त्ति विगरणी कया।* राया सुट्ठुतरं आउट्टो ॥ एवमागन्तुका अपि स्त्रीप्रतिमा भवन्ति। 'जवणे' त्ति **यवनविषये** ईदृशानि स्त्रीरूपाणि प्राचुर्येण क्रियन्ते ॥ ४९१५ ॥ **विभागः ५ पत्रम् १३१५-१६**

(१२) मुरुण्डराजः

दिट्ठंतो पुरिसपुरे, मुरुंडदूतेण होइ कायव्वो ।
जह तस्स ते असउणा, तह तस्सितरा मुणेयव्वा ॥ २२९१ ॥

दृष्टान्तोऽत्र **पुरुषपुरे रक्तपटदर्शना**कीर्णे **मुरुण्ड**दूतेन भवति कर्तव्यः । यथा 'तस्य' **मुरुण्ड**दूतस्य 'ते' रक्तपटा अशकुना न भवन्ति, तथा 'तस्य' साधोः 'इतराः' पार्श्वस्थादयो मुणितव्याः, ता दोषकारिण्यो न भवन्तीत्यर्थः ॥ २२९१ ॥ इदमेव भावयति—

पाडलि मुरुंडदूते, पुरिसपुरे सचिवमेलणाऽऽवासो ।
भिक्खू असउण तइए, दिणम्मि रन्नो सचिवपुच्छा ॥ २२९२ ॥

पाटलिपुत्रे नगरे **मुरुण्डो** नाम राजा । तदीयदूतस्य **पुरुषपुरे** नगरे गमनम् । तत्र सचिवेन सह मीलनम् । तेन च तस्य आवासो दापितः । ततो राजानं द्रष्टुमागच्छतः 'भिक्षवः' रक्तपटा अशकुना भवन्ति इति कृत्वा स दूतो न राजभवनं प्रविशति । ततस्तृतीये दिने राज्ञः सचिवपार्श्वे पृच्छा—किमिति दूतो नाद्यापि प्रविशति ? ॥ २२९२ ॥ ततश्च—

निग्गमणं च अमच्चे, सब्भावाऽऽइक्खिए भणइ दूयं ।
अंतो बहिं च रच्छा, नऽरहिंति इहं पवेसणया ॥ २२९३ ॥

अमात्यस्य राजभवनान्निर्गमनम् । ततो दूतस्यावासे गत्वा सचिवो मिलितः । पृष्टश्च तेन दूतः—किं न प्रविशसि राजभवनम् ? । स प्राह—अहं प्रथमे दिवसे प्रस्थितः परं तच्चनिकान् दृष्ट्वा प्रतिनिवृत्तः 'अपशकुना एते' इति कृत्वा, ततो द्वितीये तृतीयेऽपि दिवसे प्रस्थितः तत्रापि तथैव प्रतिनिवृत्तः । एवं सद्भावे 'आख्याते' कथिते सति दूतममात्यो भणति—एते इह रथ्यायां अन्तर्बहिर्वा नापशकुनत्वमर्हन्ति । ततः प्रवेशना दूतस्य राजभवने कृता । एवमस्माकमपि पार्श्वस्थादयस्तदीयसंयत्यश्च रथ्यादौ दृश्यमाना न दोषकारिण्यो भवन्ति ॥ २२९३ ॥

विभागः ३ पत्रम् ६५०

विहवससा उ मुरुंडं, आपुच्छति पव्वयामऽहं कत्थ ।
पासंडे य परिक्खति, वेसग्गहणेण सो राया ॥ ४१२३ ॥
डोंबेहिं च धरिसणा, माउग्गामस्स होइ कुसुमपुरे ।
उब्भावणा पवयणे, णिवारणा पावकम्माणं ॥ ४१२४ ॥
उज्झसु चीरे सा यावि णिवपहे मुयति जे जहा बाहिं ।
उच्छूरिया णडी विव, दीसति कुप्पासगादीहिं ॥ ४१२५ ॥
धिद्धिक्कतो य हाहक्कतो य लोएण तज्जितो मेंठो ।
ओलोयणट्ठितेण य, णिवारितो रायसीहेण ॥ ४१२६ ॥

कुसुमपुरे नगरे **मुरुण्डो** राया । तस्स भगिणी विहवा । सा अन्नया रायं पुच्छइ—अहं पव्वइउकामा, तो आइसह कत्थ पव्वयामि ? त्ति । तओ राया पासंडीणं वेसग्गहणेण परिक्खं करेइ । हत्थिमिंठा संदिट्ठा जहा—पासंडिमाउग्गामेसु हत्थिं सन्निज्जाह, भणिज्जाह य—पोत्तं मुयाहि, अन्नहा इमिणा हत्थिणा उवद्दवेस्सामि त्ति, एक्कम्मि य मुक्के मा ठाहिह, ताव गहग्गहावेह जाव सव्वे मुक्का । तओ एगेण मिंठेण **चरियाए** रायपहे तहा कयं जाव नग्गीभूया । रन्ना सव्वं दिट्ठं । नवरं **अज्जा** विहीए पविट्ठा । रायपहोत्तिण्णाए हत्थी सन्निओ—मुयसु पुत्तं त्ति । तीए पढमं मुहपोत्तिया मुक्का, ततो निसिज्जा, एवं जाणि जाणि बाहिरिल्लाणि चीवराणि ताणि ताणि पढमं मुयइ, जाव बहूहिं वि मुक्केहिं नडी विव कंचुकादीहिं सुप्पाउया दीसइ ताहे लोगेण अक्कंदो कओ—हा पाव ! किमेवं महासइतवस्सिणिं अभिद्दवेसि ? त्ति । रन्ना वि आलोयणट्ठिएण वारिओ, चिंतियं च—एस धम्मो सव्वन्नुदिट्ठो । अन्नेण य बहुजणेण कया सासणस्स पसंसा ॥

विभागः ४ पत्रम् ११२३

(१३) सिद्धसेनाचार्याः

तत्र ***योनिप्राभृता****दिना यदेकेन्द्रियादिशरीराणि निर्वर्तयति, यथा* **सिद्धसेनाचार्यै**णाश्वा उत्पादिताः ।

विभागः ३ पत्रम् ७५३

(१४) लाटाचार्याः

असइ वसहीय वीसुं, वसमाणाणं तरा तु भयितव्वा ।
तत्थऽण्णतथ व वासे, छत्तच्छायं तु वज्जेंति ॥ ३५३१ ॥

यत्र सङ्कीर्णायां वसतौ सर्वेऽपि साधवो न मान्ति तत्र 'विष्वग्' अन्यस्यां वसतौ वसतां साधूनां शय्यातरा भक्तव्याः, तत्र हि यदि साधवः पृथग्वसतावुषित्वा द्वितीयदिने सूत्रपौरुषीं कृत्वा समागच्छन्ति ततो द्वावपि शय्यातरौ, अथ मूलवसतिमागम्य सूत्रपौरुषीं कुर्वन्ति तत एक एव मूलवसतिदाता शय्यातरः । **लाटाचार्या**भिप्रायः पुनरयम्—शेषाः साधवः 'तत्र वा' मूलवसतौ 'अन्यत्र वा' प्रतिवसतौ वसन्तु, न तेषां सम्बन्धिना सागारिकेणेहाधिकारः, किन्तु सकलगच्छस्य च्छत्रकल्पत्वात् छत्रः—आचार्यस्तस्य च्छायां वर्जयन्ति, मौलशय्यातरगृहमित्यर्थः इति **विशेषचूर्णि-निशीथचूर्ण्यो**रभिप्रायः । **विभागः ४ पत्रम् ९८३**

"अहवा **लाडाचार्यानामादेशेन** जत्थ आयरिओ वसति सो सेज्जायरो । छत्तो आयरिओ ।" **कल्पविशेषचूर्णौ** ॥ **विभागः ४ पत्रम् ९८३ टि० २**

[६ वारिखलादिपरिव्राजकादयः]

(१) वारिखलपरिव्राजकाः वानप्रस्थतापसाश्च

वारिखलाणं बारस, मट्टीया छ च्च वाणपत्थाणं । ॥ १७३८ ॥

वारिखलाः–परिव्राजकास्तेषां द्वादश मृत्तिकालेपाः भोजनशोधनका भवन्ति । षट् च मृत्तिकालेपा **वानप्रस्थानां** तापसानां शौचसाधकाः सञ्जायन्ते । **विभागः २ पत्रम् ५१३**

(२) चक्रचरः

चक्रचरादिसम्बन्धिपरलिङ्गेन वा भक्त-पानग्रहणे प्राप्ते सिक्केन पर्यटितव्यम् ।

विभागः ३ पत्रम् ८१८

(३) कर्मकारभिक्षुकाः

'कर्मकारभिक्षुकाणां' देवद्रोणीवाहकभिक्षुविशेषाणां **विभागः ४ पत्रम् ११७०**

(४) उडङ्कर्षिः ब्रह्महत्याया व्यवस्था च

इंदेण **उडंकरिसि**पत्ती रूववती दिट्ठा । तओ अज्झोववन्नो तीए समं अहिगमं गतो । सो तओ निग्गच्छंतो रिसिणा दिट्ठो । रुट्ठेण रिसिणा तस्स सावो दिन्नो—जम्हा तुमे अगम्मा रिसिपत्ती अभिगया तम्हा ते **बंभवज्झा** उवट्ठिया । सो तीए भीओ **कुरुखेत्तं** पविट्ठो । सा **बंभवज्झा कुरुखेत्तस्स** पासओ भमइ । सो वि तओ तब्भया न नीति । इंदेण विणा सुन्नं इंदट्ठाणं । ततो सव्वे देवा इंदं मग्गमाणा जाणिऊण **कुरुखेत्ते** उवट्ठिया, भणितं—एहि, सणाहं कुरु देवलोगं । सो भणइ—मम इओ निग्गच्छंतस्स **बंभवज्झा** लग्गइ । **तओ सा देवेहिं बंभवज्झा चउहा विहत्ता—एको विभागो इत्थीणं रिउकाले ठिओ, बिइओ उदगे काइयं निसिरंतस्स, तइओ बंभणस्स सुरापाणे, चउत्थो गुरुपत्तीए अभिगमे ।** सा **बंभवज्झा** एएसु ठिया । इंदो वि देवलोगं गओ । एवं तुब्भं पि पुरेकम्मकओ कम्मबंधदोसो **ब्रह्महत्यावद्** वेगलो भवति ॥ १८५६ ॥ **विभागः २ पत्रम् ५४३-४४**

[७ वानमन्तर-यक्षादि]

(१) ऋषिपालो वानमन्तरः

उज्जेणी रायगिहं, तोसलिनगरे इसी य इसिवालो ।० ॥ ४२१९ ॥

उज्जयिनी राजगृहं च नगरं **कुत्रिकापण**युक्तमासीत् । **तोसलि**नगरवास्तव्येन च वणिजा **ऋषिपालो** नाम वानमन्तरः **उज्जयिनीकुत्रिकापणात्** क्रीता स्वबुद्धिमाहात्म्येन सम्यगाराधितः । ततस्तेन **ऋषितडागं** नाम सरः कृतम् । × × ×

एमेव तोसलीए, इसिवालो वाणमंतरो तत्थ ।
णिज्जित इसीतलागे,०   ॥ ४२२३ ॥

'एवमेव' **तोसलि**नगरवास्तव्येन वणिजा **उज्जयिनी**मागम्य **कुत्रिकापणाद् ऋषिपालो** नाम वानमन्तरः क्रीतः । तेनापि तथैव निर्जितेन **ऋषितडागं** नाम सरश्चक्रे । **विभागः ४ पत्रम् ११४५-४६**

(२) कुण्डलमेण्ठो वानमन्तरः

कोंडलमेंढ पभासे,०   ॥ ३१५० ॥

तथा **कुण्डलमेण्ठ**नाम्नो वानमन्तरस्य यात्रायां **भरुकच्छ**परिसरवर्ती भूयान् लोकः सङ्खडिं करोति । **विभागः ३ पत्रम् ८८३-८४**

"अहवा **कोंडलमिंढे कोंडलमिंढो** वाणमंतरो, देवद्रोणी **भरुयच्छा**हरणीए, तत्थ **यात्राए** बहुजणो संखडिं करेइ × × ×" इति **चूर्णौ विशेषचूर्णौ** च ॥ **विभागः ३ पत्रम् ८८३ टि० ७**

(३) घण्टिकयक्षः

पसिणापसिणं सुमिणे, विज्जासिट्ठं कहेइ अन्नस्स ।
अहवा आइंखिणिआ, घंटियसिट्ठं परिकहेइ ॥ १३१२ ॥

× × × अथवा **"आइंखिणिआ" डोम्बी,** तस्याः कुलदैवतं **घण्टिकयक्षो** नाम, स पृष्टः सन् कर्णे कथयति, सा च तेन शिष्टं कथितं सद् अन्यस्मै पृच्छकाय शुभाशुभादि यत् परिकथयति एष प्रश्नप्रश्नः ॥ १३१२ ॥ **विभागः २ पत्रम् ४०३-४**

(४) भण्डीरयक्षः

मथुरायां भण्डीरयक्षयात्रायां कम्बल-शबलौ वृषभौ घाटिकेन-मित्रेण **जिनदास**स्यानापृच्छया वाहितौ, तन्निमित्तं सञ्जातवैराग्यौ श्रावकेणानुशिष्टौ भक्तं प्रत्याख्याय कालगतौ **नागकुमारे**षूपपन्नौ ॥ ५६२७ ॥ **विभागः ५ पत्रम् १४८९**

(५) सीता हलपद्धतिदेवता

सीताइ जन्नो पहुगादिगा वा, जे कप्पणिज्जा जतिणो भवंति ।
साली-फलादीण व णिक्कयम्मि, पडेज्ज तेल्लं लवणं गुलो वा ॥ ३६४७ ॥

सागारिकस्यान्येषां च साधारणे क्षेत्रे **'सीतायाः' हलपद्धतिदेवतायाः** 'यज्ञः' पूजा भवेत् तत्र शाल्यादि द्रव्यं यद् उपस्कृतं, पृथुकादयो वा ये तत्र क्षेत्रे यतीनां कल्पनीया भवन्ति, यद् वा तत्र शालीनां-कलमादीनां फलानां-चिर्भटादीनाम् आदिशब्दाद् योवारिप्रभृतीनां धान्यानां विक्रीयमाणानां निष्क्रये तैलं वा लवणं वा गुडो वा पतेत्, एषा सर्वाऽपि क्षेत्रविषया सागारिकापिण्डिका ॥ ३६४७ ॥ **विभागः ४ पत्रम् १०१३**

[८ विद्यादि]

(१) आभोगिनी विद्या

आभोगिनी नाम विद्या सा भण्यते या परिजपिता सती मानसं परिच्छेदमुत्पादयति ।

विभागः ४ पत्रम् १२५०

(२) अश्व-महिष-दृष्टिविषसर्पोत्पादनादि

तत्र **योनिप्राभृता**दिना यदेकेन्द्रियादिशरीराणि निर्वर्त्तयति, यथा **सिद्धसेनाचार्येणाश्वा उत्पादिताः।**
जहा वा एगेणायरिएण सीसस्स जोगो उवदिट्ठो **जहा महिसो भवति** । तं च सुतं आयरियाणं भाइणिज्जेण । सो निद्धम्मो उन्निक्खंतो महिसं उप्पाएउं सोयरियाण हत्थे विक्किणइ । आयरिएण सुतं । तत्थ गतो भणेइ—किं एतेणं ? अहं ते रयणजोगं पयच्छामि, दव्वे आहराहि । ते अ आहरिया । आयरिएण संजोइया । एगंते निक्खित्ता भणितो—एत्तिएण कालेण उक्खणिज्जासि, अहं गच्छामि । तेण उक्खतो **दिट्ठीविसो सप्पो जातो** । सो तेण मारितो । एवं अहिगरणच्छेदो । सो वि सप्पो अंतोमुहुत्तेण मओ त्ति ॥

विभागः ३ पत्रम् ७५३-५४

(३) यन्त्रप्रतिमा

एमेव य आगंतुं, पालित्तयचेट्टिया जवणे ॥ ४९१५ ॥

××× आगन्तुकं नाम यदन्यत आगतम् । ××× तथा चात्र **पादलिप्ताचार्य**कृता 'चेटिक' त्ति **राजकन्यका** दृष्टान्तः । स चायम्—

पालित्तायरिएहिं रन्नो भगिणीसरिसिया **जंतपडिमा** कया । चंकमणुम्मेस-निमेसमयी तालविंटहत्था आयरियाणं पुरतो चिट्ठइ । राया वि अईव **पालित्तगस्स** सिणेहं करेइ । धिज्जाइएहिं पउट्ठेहिं रन्नो कहियं—भगिणी ते समणएणं अभिओगिआ । राया न पत्तियति । भणिओ य—पेच्छ, दंसेमु ते । राया आगतो । पासित्ता **पालित्तयाणं** रुट्ठो पच्चोसरिओ य । तओ सा आयरिएहिं चड त्ति विकरणी कया । राया सुट्ठुतरं आउट्टो ॥

एवमागन्तुका अपि स्त्रीप्रतिमा भवन्ति । **'जवणे' त्ति यवनविषये ईदृशानि स्त्रीरूपाणि प्राचुर्येण क्रियन्ते** ॥ ४९१५ ॥

विभागः ५ पत्रम् १३१५-१६

[९ जनपद-ग्राम-नगरादिविभागः]

(१) आर्या-ऽनार्यजनपद-जात्यादि

कप्पइ निग्गंथाण वा निग्गंथीण वा पुरत्थिमेणं जाव अंग-मगहाओ एत्तए, दक्खिणेणं जाव कोसंबीओ, पच्चत्थिमेणं जाव थूणाविसयाओ, उत्तरेणं जाव कुणालाविसयाओ एत्तए । एताव ताव कप्पइ । एताव ताव आरिए खेत्ते णो से कप्पइ एत्तो बाहिं । तेण परं जत्थ नाण-दंसण-चरित्ताइं उस्सप्पंति त्ति बेमि ॥

(उद्देशः १ सूत्रम् ५०)

अस्य व्याख्या—कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा पूर्वस्यां दिशि यावद् **अङ्ग-मगधान्** 'एतुं' विहर्त्तुम् । **अङ्गा** नाम **चम्पा**प्रतिबद्धो जनपदः, **मगधा राजगृह**प्रतिबद्धो देशः । दक्षिणस्यां दिशि यावत् **कौशाम्बी**मेतुम् । प्रतीच्यां दिशि **स्थूणा**विषयं यावदेतुम् । उत्तरस्यां दिशि **कुणाला**विषयं यावदेतुम् । सूत्रे पूर्व-दक्षिणादिपदेभ्यस्तृतीयानिर्देशो लिङ्गव्यत्ययश्च प्राकृतत्वात् । एतावत् तावत् क्षेत्रमवधीकृत्य विहर्तुं कल्पते ।

कुतः ? इत्याह—एतावत् तावद् यस्मादार्यं क्षेत्रम्, नो "से" तस्य निर्ग्रन्थस्य निर्ग्रन्थ्या वा कल्पते 'अतः' एवंविधाद् आर्यक्षेत्राद् बहिर्विहर्तुम्। 'ततः परं' बहिर्देशेषु अपि **सम्प्रति**नृपतिकालादारभ्य यत्र ज्ञान-दर्शन-चारित्राणि 'उत्सर्पन्ति' स्फातिमासादयन्ति तत्र विहर्त्तव्यम्। 'इतिः' परिसमाप्तौ। ब्रवीमि इति तीर्थकर-गणधरोपदेशेन, न तु स्वमनीषिकयेति सूत्रार्थः॥ **विभागः ३ पत्रम् ९०५-७**

साएयम्मि पुरवरे, सभूमिभागम्मि वद्धमाणेण।
सुत्तमिणं पण्णत्तं, पडुच्च तं चेव कालं तु॥ ३२६१॥

साकेते पुरवरे **सभूमिभागे** उद्याने समवसृतेन भगवता **वर्द्धमानस्वामि**ना सूत्रमिदं 'तमेव' वर्त्तमानं कालं प्रतीत्य निर्ग्रन्थ-निर्ग्रन्थीनां पुरतः प्रज्ञप्तम्॥ ३२६१॥ कथम् ? इत्याह—

मगहा कोसंबी या, थूणाविसओ कुणालविसओ य।
एसा विहारभूमी, एतावंताऽऽरियं खेत्तं॥ ३२६२॥

पूर्वस्यां दिशि **मगधान्** दक्षिणस्यां दिशि **कौशाम्बीं** अपरस्यां दिशि **स्थूणाविषयं** उत्तरस्यां दिशि **कुणालाविषयं** यावद् ये देशा एतावदार्यक्षेत्रं मन्तव्यम्। अत एव साधूनामेषा विहारभूमी। इतः परं निर्ग्रन्थ-निर्ग्रन्थीनां विहर्त्तुं न कल्पते॥ ३२६२॥ अथार्यपदस्य निक्षेपनिरूपणायाऽऽह—

नामं ठवणा दविए, खेत्ते जाती कुले य कम्मे य।
भासारिय सिप्पारिय, णाणे तह दंसण चरित्ते॥ ३२६३॥

नामार्याः स्थापनार्याः द्रव्यार्याः क्षेत्रार्याः जात्यार्याः कुलार्याः कर्मार्याः भाषार्याः शिल्पार्या ज्ञानार्या दर्शनार्याश्चारित्रार्याश्चेति। तत्र नाम-स्थापने सुप्रतीते। द्रव्यार्या नामनादियोग्याः तिनिशवृक्षप्रभृतयः। क्षेत्रार्या अर्द्धषड्विंशतिजनपदाः तद्वासिनो वा। ते च जनपदा **राजगृहा**दिनगरोपलक्षिता **मगधा**दयः। उक्तञ्च—

रायगिह मगह १ **चंपा,** अंगा २ तह **तामलित्ति वंगा** य ३।
कंचणपुरं कलिंगा ४, **वाणारसि** चेव **कासी** य ५॥ १॥
साकेत कोसला ६ **गयपुरं** च **कुरु** ७ **सोरियं कुसट्टा** य ८।
कंपिल्लं पंचाला ९, **अहिछत्ता जंगला** चेव १०॥ २॥
बारवई य **सुरट्ठा** ११, **विदेह मिहिला** य १२ **वच्छ कोसंबी** १३।
नंदिपुरं संडिब्भा १४, **भद्दिलपुर**मेव **मलया** य १५॥ ३॥
वेराड वच्छ १६ **वरणा, अच्छा** १७ तह **मत्तियावइ दसण्णा** १८।
सुत्तीवई य **चेदी** १९, **वीयभयं सिंधुसोवीरा** २०॥ ४॥
महुरा य **सूरसेणा** २१, **पावा भंगी** य २२ **मासपुरि वट्टा** २३।
सावत्थी य **कुणाला** २४, **कोडीवरिसं** च **लाढा** य २५॥ ५॥
सेयविया वि य नगरी, **केगइअद्धं** च आरियं भणियं।
जत्थुप्पत्ति जिणाणं, चक्कीणं राम-कण्हाणं॥ ६॥ ३२६३॥ सम्प्रति **जात्यार्या**नाह—

अंबट्ठा य कलंदा य, विदेहा विदका ति य।
हारिया तुंतुणा चेव, छ एता इब्भजातिओ॥ ३२६४॥

इह यद्यप्या**चारा**दिषु शास्त्रान्तरेषु बहवो जातिभेदा उपवर्ण्यन्ते तथापि लोके एता एवा**म्बष्ठ-कलिन्द-वैदेह-विदक-हारित-तुन्तुण**रूपाः 'इभ्यजातयः' अभ्यर्चनीया जातयः प्रसिद्धाः। तत एताभिर्जातिभिरुपेता **जात्यार्याः**, न शेषजातिभिरिति।॥ ३२६४॥ अथ **कुलार्यान्** निरूपयति—

उग्गा भोगा राइण्ण खत्तिया तह य णात कोरव्वा।
इक्खागा वि य छट्ठा, कुलारिया होंति नायव्वा॥ ३२६५॥

'उग्राः' उग्रदण्डकारित्वादारक्षिकाः। **'भोगाः'** गुरुस्थानीयाः। **'राजन्याः'** वयस्याः। 'क्षत्रियाः'

सामान्यतो राजोपजीविनः । **'ज्ञाताः'** उदारक्षत्रियाः, 'कौरवाः' **कुरुवंशोद्भवाः**, एते द्वयेऽप्येक एव भेदः । **'इक्ष्वाकवः'** ऋषभनाथवंशजाः षष्ठाः । एते **कुलार्या** ज्ञातव्याः ॥ ३२६५ ॥

'भाषार्याः' अर्धमागधभाषाभाषिणः । **'शिल्पार्याः'** तुण्णाक-तन्तुवायादयः । ज्ञानार्याः पञ्चधा—आभिनिबोधिक-श्रुता-ऽवधि-मनःपर्यय-केवलज्ञानार्यभेदात् । दर्शनार्या द्विधा—सराग-वीतरागदर्शनार्यभेदात् । तत्र सरागदर्शनार्याः क्षायोपशमिकौपशमिकसम्यग्दृष्टिभेदाद् द्विधा । वीतरागदर्शनार्या उपशान्तमोहादयः । चारित्रार्याः पञ्चविधाः—सामायिक-च्छेदोपस्थाप्य-परिहारविशुद्धिक-सूक्ष्मसम्पराय-यथाख्यातभेदात् । अत्र च क्षेत्रार्यैरधिकारः ॥

विभागः ३ पत्रम् ९१२-१४

(२) मण्डलम्

मण्डलमिति देशखण्डम्, यथा षण्णवतिमण्डलानि **सुराष्ट्र**देशः । **विभागः २ पत्रम् २९८**

(३) जनपदप्रकारौ

आणुग जंगल देसे, वासेण विणा वि तोसलिग्गहणं ।
पायं च तत्थ वासति, पउरपलंबो उ अन्नो वि ॥ १०६१ ॥

देशो द्विधा—**अनूपो जङ्गलश्च** । नद्यादिपानीयबहुलो**ऽनूपः**, तद्विपरीतो **जङ्गलः** निर्जल इत्यर्थः । यद्वा **अनूपो** अजङ्गल इति पर्यायौ । तत्रायं **तोसलिदेशो** यतोऽनूपो यतश्चास्मिन् देशे वर्षेण विनाऽपि सारणीपानीयैः सस्यनिष्पत्तिः, अपरं च 'तत्र' **तोसलिदेशे** 'प्रायः' बाहुल्येन वर्षति ततोऽतिपानीयेन विनष्टेषु सस्येषु प्रलम्बोपभोगो भवति; अन्यच्च **तोसलिः** प्रचुरप्रलम्बः, तत एतैः कारणै**स्तोसलि**ग्रहणं कृतम् । अन्योऽपि य ईदृशः प्रचुरप्रलम्बस्तत्राप्येष एव विधिः ॥ १०६१ ॥ **विभागः २ पत्रम् ३३१-३२**

(४) ग्राम-नगर-खेट-कर्बट-मडम्ब-पत्तनादि

गम्मो गमणिज्जो वा, कराण गसए व बुद्धादी ॥ १०८८ ॥

गम्यो गमनीयो वा अष्टादशानां कराणामिति व्युत्पत्त्या, ग्रसते वा बुद्ध्यादीन् गुणानिति व्युत्पत्त्या वा पृषोदरादित्वाद् निरुक्तविधिना **ग्राम** उच्यते ॥ १०८८ ॥

नत्थेत्थ करो नगरं, खेडं पुण होइ धूलिपागारं ।
कब्बडगं तु कुनगरं, मडंबगं सव्वतो छिन्नं ॥ १०८९ ॥

'नास्ति' न विद्यतेऽत्राष्टादशकराणामेकोऽपि कर इति **नकरम्**, नखादित्वाद् नञोऽकाराभावः । **खेटं** पुनर्धूलीप्राकारपरिक्षिप्तम् । **कर्बटं** तु कुनगरमुच्यते । **मडम्बं** नाम यत् 'सर्वतः' सर्वासु दिक्षु छिन्नम्, अर्द्धतृतीयगव्यूतमर्यादायामविद्यमानग्रामादिकमिति भावः । **अन्ये तु** व्याचक्षते—यस्य पार्श्वतो अर्धतृतीययोजनान्तर्ग्रामादिकं न प्राप्यते तद् **मडम्बम्** ॥ १०८९ ॥

जलपट्टणं च थलपट्टणं च इति पट्टणं भवे दुविहं ।
अयमाइ आगरा खलु, दोणमुहं जल-थलपहेणं ॥ १०९० ॥

पत्तनं द्विधा—**जलपत्तनं** च **स्थलपत्तनं** च । यत्र जलपथेन नावादिवाहनारूढं भाण्डमुपैति तद् **जलपत्तनम्**, यथा **द्वीपम्** । यत्र तु स्थलपथेन शकटादौ स्थापितं भाण्डमायाति तत् **स्थलपत्तनम्**, यथा **आनन्दपुरम्** । अयः-लोहं तदादय **आकरा** उच्यन्ते । यत्र पाषाणधातुधमनादिना लोहमुत्पाद्यते स अयआकरः, आदिशब्दात् ताम्र-रूप्याद्याकरपरिग्रहः । यस्य तु जलपथेन स्थलपथेन च द्वाभ्यामपि प्रकाराभ्यां भाण्डमागच्छति तद् द्वयोः पथोर्मुखमिति निरुक्त्या **द्रोणमुख**मुच्यते, तच्च **भृगुकच्छं ताम्रलिप्ती** वा ॥ १०९० ॥

निगमं नेगमवग्गो, वसइ जहिं रायहाणि जहि राया ।
तावसमाई आसम, निवेसो सत्थाइजत्ता वा ॥ १०९१ ॥

निगमं नाम यत्र नैगमाः–वाणिजकविशेषास्तेषां वर्गः–समूहो वसति, अत एव निगमे भवा नैगमा इति व्यपदिश्यन्ते । यत्र नगरादौ राजा परिवसति सा **राजधानी** । **आश्रमो** यः प्रथमतस्तापसादिभिरावासितः, पश्चादपरोऽपि लोकस्तत्र गत्वा वसति । **निवेशो** नाम यत्र सार्थ आवासितः, आदिग्रहणेन ग्रामो वा अन्यत्र प्रस्थितः सन् यत्रान्तरावासमधिवसति, यात्रायां वा गतो लोको यत्र तिष्ठति, एष सर्वोऽपि **निवेश** उच्यते ॥ १०९१ ॥

संबाहो संवोढुं, वसति जहिं पव्वयाइविसमेसु ।
घोसो उ गोउलं अंसिया उ गामद्धमाईया ॥ १०९२ ॥

सम्बाधो नाम यत्र कृषीवललोकोऽन्यत्र कर्षणं कृत्वा वणिग्वर्गो वा वाणिज्यं कृत्वाऽन्यत्र पर्वतादिषु विषमेषु स्थानेषु "संवोढुं" इति कणादिकं समुह्य कोष्ठागारादौ च प्रक्षिप्य वसति । तथा **घोषस्तु** गोकुलमभिधीयते । **अंशिका** तु यत्र ग्रामस्यार्धम् आदिशब्दात् त्रिभागो वा चतुर्भागो वा गत्वा स्थितः सा ग्रामस्यांश एवांशिका ॥ १०९२ ॥

नाणादिसागयाणं, भिज्जंति पुडा उ जत्थ भंडाणं ।
पुडभेयणं तगं संकरो य केसिंचि कायव्वो ॥ १०९३ ॥

नानाप्रकाराभ्यो दिग्भ्य आगतानां 'भाण्डानां' कुङ्कुमादीनां पुटा यत्र विक्रयार्थं भिद्यन्ते तत् **पुटभेदन**मुच्यते । **केषाञ्चिदाचार्याणां** मतेन **सङ्करश्च** कर्तव्यः, "संकरंमि वा" इत्यधिकं पदं पठितव्यमित्यर्थः । **सङ्करो** नाम–किञ्चिद् ग्रामोऽपि खेटमपि आश्रमोऽपीत्यादि ॥ १०९३ ॥

विभागः २ पत्रम् ३४२-४३

(५) सूत्रपातानुसारेण ग्रामस्य प्रकाराः

उत्ताणग ओमंथिय, संपुडए खंडमल्लए तिविहे ।
भित्ती पडालि वलभी, अक्खाडग रुयग कासवए ॥ ११०३ ॥

अस्ति ग्राम **उत्तानकमल्लकाकारः**, अस्ति ग्रामोऽ**वाङ्मुखमल्लकाकारः**, एवं **सम्पुटकमल्लकाकारः** । **खण्डमल्लक**मपि त्रिविधं वाच्यम् । तद्यथा—**उत्तानकखण्डमल्लक**संस्थितः **अवाङ्मुखखण्डमल्लक**संस्थितः **सम्पुटकखण्डमल्लक**संस्थितश्च । तथा **भित्तिसंस्थितः पडालिकासंस्थितः वलभीसंस्थितः अक्षपाटकसंस्थितः रुचकसंस्थितः काश्यपसंस्थित**श्चेति ॥ ११०३ ॥

अथैषामेव संस्थानानां यथाक्रमं व्याख्यानमाह—

मज्झे गामस्सऽगडो, बुद्धिच्छेदा ततो उ रज्जूओ ।
निक्खम्म मूलपादे, गिण्हंतीओ वइं पत्ता ॥ ११०४ ॥

इह यस्य ग्रामस्य मध्यभागे 'अगडः' कूपस्तस्य बुद्ध्या पूर्वादिषु दिक्षु च्छेदः परिकल्प्यते, ततश्च कूपस्याधस्तनतलाद् बुद्धिच्छेदेन रज्जवो दिक्षु विदिक्षु च निष्काम्य गृहाणां मूलपादान् उपरि कृत्वा गृह्णन्त्यस्तिर्यक् तावद् विस्तार्यन्ते यावद् ग्रामपर्यन्तवर्तिनीं वृतिं प्राप्ता भवन्ति, तत उपर्यभिमुखीभूय तावद् गता यावद् उच्छ्रयेण हर्म्यतलानां समीभूताः तत्र च पटहच्छेदेनोपरताः, एष ईदृश **उत्तानमल्लकसंस्थितो ग्राम** उच्यते, ऊर्द्ध्वाभिमुखस्य शरावस्यैवमाकारत्वात् ॥ ११०४ ॥

ओमंथिए वि एवं, देउल रुक्खो व जस्स मज्झम्मि ।
कूवस्सुवरिं रुक्खो, अह संपुडमल्लओ नाम ॥ ११०५ ॥

अवाङ्मुखमल्लकाकारेऽप्येवमेव वाच्यम्, नवरं यस्य ग्रामस्य मध्ये देवकुलं वृक्षो वा उच्चैस्तरस्तस्य देवकुलादेः शिखराद् रज्जवोऽवतार्य तिर्यक् तावद् नीयन्ते यावद् वृतिं प्राप्ताः, ततोऽधोमुखीभूय गृहाणां मूलपादान् गृहीत्वा पटहच्छेदेनोपरताः, एषो**ऽवाङ्मुखमल्लकसंस्थितः** । तथा यस्य ग्रामस्य मध्यभागे कूपः, तस्य चोपर्युच्चतरो वृक्षः, ततः कूपस्याधस्तलाद् रज्जवो निर्गत्य मूलपादानधोऽधस्तावद् गता यावद् वृतिं

प्राप्ताः, तत ऊर्द्ध्वाभिमुखीभूय गत्वा हर्म्यतलानां समश्रेणीभूताः, वृक्षशिखरादप्यवतीर्य रज्जवस्तथैव तिर्यग् वृतिं प्राप्नुवन्ति, ततोऽधोमुखीभूय कूपसम्बन्धिनीनां रज्जूनामग्रभागैः समं सङ्घटन्ते, अथैष **सम्पुटकमल्लकाकारो नाम ग्रामः** ॥ ११०५ ॥

जइ कूवाई पासम्मि होंति तो खंडमल्लओ होइ।
पुव्वावररुक्खेहिं, समसेढीहिं भवे भित्ती ॥ ११०६ ॥

यदि 'कूपादीनि' कूप-वृक्ष-तदुभयानि 'पार्श्वे' एकस्यां दिशि भवन्ति ततः **खण्डमल्लकाकार**स्त्रिविधोऽपि ग्रामो यथाक्रमं मन्तव्यः। तत्र यस्य ग्रामस्य बहिरेकस्यां दिशि कूपः तामेवैकां दिशं मुक्त्वा शेषासु सप्तसु दिक्षु रज्जवो निर्गत्य वृतिं प्राप्योपरिहर्म्यतलान्यासाद्य पटहच्छेदेनोपरमन्ते, एष **उत्तानकखण्डमल्लकाकारः। अवाङ्मुखखण्डमल्लकाकारो**ऽप्येवमेव, नवरं यस्यैकस्यां दिशि देवकुलमुच्चैस्तरो वा वृक्षः । **सम्पुटकखण्डमल्लकाकार**स्तु यस्यैकस्यां दिशि कूपस्तदुपरिष्टाच्च वृक्षः, शेषं प्राग्वत्। "पुव्वावर" इत्यादि, पूर्वस्यामपरस्यां च दिशि समश्रेणिव्यवस्थितैर्वृक्षै**र्भित्तिसंस्थितो ग्रामो** भवेत् ॥ ११०६ ॥

पासट्टिए पडाली, वलभी चउकोण ईसि दीहा उ।
चउकोणेसु जइ दुमा, हवंति अक्खाडतो तम्हा ॥ ११०७ ॥

पडालिकासंस्थितोऽप्येवमेव, नवरमेकस्मिन् पार्श्वे वृक्षयुगलं समश्रेण्या व्यवस्थितम्। तथा यस्य ग्रामस्य चतुर्ष्वपि कोणेषु ईषद्दीर्घा वृक्षा व्यवस्थिताः स **वलभीसंस्थितः**। 'अक्षवाटः' मल्लानां युद्धाभ्यासस्थानम्, तद् यथा समचतुरस्रं भवति एवं यदि ग्रामस्यापि चतुर्षु कोणेषु द्रुमा भवन्ति ततोऽसौ चतुर्विदिग्वर्तिभिर्वृक्षैः समचतुरस्रतया परिच्छिद्यमानत्वा**दक्षपाटकसंस्थितः** ॥ ११०७ ॥

वट्टागारठिएहिं, रुयगो पुण वेढिओ तरुवरेहिं।
तिक्कोणो कासवओ, छुरघरगं कासवं बिंती ॥ ११०८ ॥

यद्यपि ग्रामः स्वयं न समस्तथापि यदि रुचकवलयशैलवद् वृत्ताकारव्यवस्थितैर्वृक्षैर्वेष्टितस्तदा **रुचकसंस्थितः**। यस्तु ग्राम एव त्रिकोणतया निविष्टो वृक्षा वा त्रयो यस्य बहिस्त्र्यस्राः स्थिताः, एकतो द्वावन्यतस्त्वेक इत्यर्थः, एष उभयथाऽपि **काश्यपसंस्थितः**। काश्यपं पुनर्नापितस्य सम्बन्धि क्षुरगृहं ब्रुवते, तद् यथा त्र्यस्रं भवत्येवमयमपि ग्राम इति ॥ ११०८ ॥ **विभागः २ पत्रम् ३४५-४६-४७**

(६) प्राकारभेदास्तत्स्थानानि च

पासाणिट्टग-मट्टिय-खोड-कडग-कंटिगा भवे दव्वे।
खाइय-सर-नइ-गड्डा-पव्वय-दुग्गाणि खेत्तम्मि ॥ ११२३ ॥

पाषाणमयः प्राकारो यथा **द्वारिकायाम्**, **इष्टकामयः** प्राकारो यथाऽऽ**नन्दपुरे**, **मृत्तिकामयो** यथा **सुमनोमुखनगरे**, "खोड" त्ति **काष्ठमयः** प्राकारः कस्यापि नगरादेर्भवति, **कटकाः**-वंशदलादिमयाः **कण्टिकाः**-बुब्बूलादिसम्बन्धिन्यः तन्मयो वा परिक्षेपो ग्रामादेर्भवति, एष सर्वोऽपि द्रव्यपरिक्षेपः। **क्षेत्रपरिक्षेप**स्तु खातिका वा सरो वा नदी वा गर्त्ता वा पर्वतो वा दुर्गाणि वा-जलदुर्गादीनि पर्वता एव दुर्गाणि वा, एतानि नगरादिकं परिक्षिप्य व्यवस्थितानि क्षेत्रपरिक्षेप उच्यते ॥ ११२३ ॥

विभागः २ पत्रम् ३५१

(७) भिन्नभिन्नजनपदेषु धान्यनिष्पत्तिप्रकाराः

तत्रायं **तोसलिदेशो** यतोऽनूपो यतश्चास्मिन् देशे वर्षेण विनाऽपि सारणीपानीयैः सस्यनिष्पत्तिः।

विभागः २ पत्रम् ३३२

अब्भे नदी तलाए, कूवे अइपूरए य नाव वणी।
मंस-फल-पुप्फभोगी, वित्थिन्ने खेत्त कप्प विही ॥ १२३९ ॥

स देशदर्शनं कुर्वन् जनपदानां परीक्षां करोति—कस्मिन् देशे कथं धान्यनिष्पत्तिः? । तत्र क्वचिद् देशेऽभ्रैः सस्यं निष्पद्यते, वृष्टिपानीयैरित्यर्थः, यथा **लाटविषये**। क्वापि नदीपानीयैः, यथा **सिन्धुदेशे**।

क्वचित्तु तडागजलैः, यथा **द्रविडविषये**। क्वापि कूपपानीयैः, यथा **उत्तरापथे**। क्वचिदतिपूरकेण, यथा **बन्नासायां** पूरादवरिच्यमानायां तत्पूरपानीयभावितायां क्षेत्रभूमौ धान्यानि प्रकीर्यन्ते; यथा वा **डिम्भरेलके महिरावणपूरेण** धान्यानि वपन्ति। "नाव" इति यत्र नावमारोप्य धान्यमानीतमुपभुज्यते, यथा **काननद्वीपे**। "वणि" त्ति यत्र वाणिज्येनैव वृत्तिरुपजायते न कर्षणेन, यथा **मथुरायाम्**। 'मंस' त्ति यत्र दुर्भिक्षे समापतिते मांसेन कालोऽतिवाह्यते। तथा यत्र पुष्प-फलभोगी प्राचुर्येण लोकः, यथा **कोङ्कणादिषु**। तथा कानि निर्स्तीर्णानि क्षेत्राणि? कानि वा सङ्क्षिप्तानि?। 'कप्पे' त्ति कस्मिन् क्षेत्रे कः कल्पः?, यथा **सिन्धुविषये** निर्मिषाद्याहारोऽगर्हितः। 'विहि' त्ति कस्मिन् देशे कीदृशः समाचारः? यथा **सिन्धुषु** रजकाः सम्भोज्याः, **महाराष्ट्रविषये** कल्पपाला अपि सम्भोज्या इति ॥ १२३९ ॥

विभागः २ पत्रम् ३८३-८४

"**उत्तरापधे** अरघट्टेहिं" इति **चूर्णौ** ॥ **विभागः २ पत्रम् ३८३ टि० १**

(८) पणित-भाण्ड-कर्म-पचन-इन्धनशालाः व्याघरणशाला च

कोलालियावणो खलु, पणिसाला भंडसाल जहिं भंडं।
कुंभारकुडी कम्मे, पयणे वासासु आवाओ ॥ ३४४५ ॥
तोसलिए वग्घरणा, अग्गीकुंडं तहिं जलति निच्चं।
तत्थ सयंवरहेउं, चेडा चेडी य छुब्भंति ॥ ३४४६ ॥

कौलालिकाः-कुलालक्रय-विक्रयिणः तेषामापणः **पणितशाला** मन्तव्या। किमुक्तं भवति? यत्र कुम्भकारा भाजनानि विक्रीणते, वणिजो वा कुम्भकारहस्ताद् भाजनानि क्रीत्वा यत्रापणे विक्रीणन्ति सा **पणितशाला**। **भाण्डशाला** यत्र घट-करकादिभाण्डजातं संगोपितमास्ते। **कर्मशाला** कुम्भकारकुटी, यत्र कुम्भकारो घटादिभाजनानि करोतीत्यर्थः। **पचनशाला** नाम यत्राऽऽपाकस्थाने वर्षासु भाजनानि पच्यन्ते। **इन्धनशाला** तु यत्र तृण-करीष-कचवरादिनिष्ठन्ति ॥ ३४४५ ॥

व्याघरणशाला नाम-**तोसलिविषये** ग्राममध्ये शाला क्रियते, तत्राग्निकुण्डं स्वयंवरहेतोर्नित्यमेव प्रज्वलति, तत्र च बहवश्चेटकाः एका च स्वयंवरा चेटिका पक्षिप्यन्ते प्रवेश्यन्ते इत्यर्थः। यस्तेषां मध्ये तस्यै प्रतिभाति तमसौ वृणीते एषा **व्याघरणशाला**। **विभागः ४ पत्रम् ९६३**

[१० विशिष्टग्राम-नगर-जनपदादि]

(१) अन्ध्रजनपदः

'देशतः' नानादेशानाश्रित्यानेकविधम्, यथा—**मगधानां** ओदनः, **लाटानां** कूरः **द्रमिलानां** चोरः, **अन्ध्राणां** इडाकुरिति। **विभागः १ पत्रम् २०**

(२) अवन्तीजनपदः

पज्जोए णरसीहे, णव उज्जेणीए कुत्तिया आसी ॥ ४२२० ॥

××× **चण्डप्रद्योत**नाम्नि नरसिंहे **अवन्ती**जनपदाधिपत्यमनुभवति नव **कुत्रिकापणाः उज्जयिन्या**मासीरन्। **विभागः ४ पत्रम् ११४५**

(३) आनन्दपुरम्

यत्र तु स्थलपथेन शकटादौ स्थापितं भाण्डमायाति तत् स्थलपत्तनम्, यथा **आनन्दपुरम्**।
विभागः २ पत्रम् ३४२

इष्टकामयः प्राकारो यथाऽऽ**नन्दपुरे**,। **विभागः २ पत्रम् ३५१**

अब्बुय पादीणवाहम्मि ॥ ३१५० ॥

'प्राचीनवाहः' सरस्वत्याः सम्बन्धी पूर्वदिगभिमुखः प्रवाहः, तत्राऽऽ**नन्दपुर**वास्तव्यो लोको गत्वा यथाविभवं शरदि सङ्खडिं करोति ॥ ३१५० ॥ **विभागः ३ पत्रम् ८८३-८४**

"पाईणवाहो **सरस्सतीए,** तत्थ **आणंदपुरगा** जधाविभवेणं वच्चंति सरए" इति **चूर्णौ विशेषचूर्णौ** च । **विभागः ३ पत्रम् ८८३ टि० ७**

(४) उज्जयिनीनगरी

जीवन्तस्वामिप्रतिमावन्दनार्थ**मुज्जयिन्यामार्यसुहस्तिन** आगमनम् । तत्र च रथयात्रायां राजाङ्गणप्रदेशे रथपुरतः स्थितान् **आर्यसुहस्ति**गुरून् दृष्ट्वा नृपतेर्जातिस्मरणम् । **विभागः ३ पत्रम् ९१८**

तोसलिनगरे इसी य इसिवालो ।० ॥ ४२१९ ॥

तोसलिनगरवास्तव्येन च **वणिजा ऋषिपालो** नाम वानमन्तर **उज्जयिनीकुत्रिकापणात्** क्रीत्वा स्वबुद्धिमाहात्म्येन सम्यगाराधितः, ततस्तेन **ऋषितडागं** नाम सरः कृतम् । × × ×

एमेव तोसलीए, इसिवालो वाणमंतरो तत्थ ।
णिज्जित इसीतलागे,० ॥ ४२२३ ॥

'एवमेव' **तोसलि**नगरवास्तव्येन वणिजा **उज्जयिनी**मागम्य कुत्रिकापणाद् **ऋषिपालो** नाम वानमन्तरः क्रीतः । तेनापि तथैव निर्जितेन **ऋषितडागं** नाम सरश्चक्रे । **विभागः ४ पत्रम् ११४५-४६**

पज्जोए णरसीहे, णव उज्जेणीए कुत्तिया आसी ।० ॥ ४२२० ॥

चण्डप्रद्योतनाम्नि नरसिंहे **अवन्तिजनपदा**धिपत्यमनुभवति नव **कुत्रिकापणाः उज्जयिन्या**मासीरन् । **विभागः ४ पत्रम् ११४५**

(५) उत्तरापथः

क्वापि कूपपानीयैः सस्यं निष्पद्यते, यथा **उत्तरापथे** । **विभागः २ पत्रम् ३८३**

"**उत्तरापधे** अरघट्टेहिं" इति **चूर्णौ** । **विभागः २ पत्रम् ३८३ टि० ४**

छन्नउइगामअद्धेसु ॥ १७७६ ॥

इह**ोत्तरापथानां** ग्रामस्य गामार्ध इति संज्ञा । आह च **चूर्णिकृत्**—गामद्धेसु त्ति देसभणिती, छन्नउइगामेसु त्ति भणियं होइ, **उत्तरावहाणं** एसा भणिइ त्ति ॥ १७७६ ॥ **विभागः २ पत्रम् ५२४**

दो साभरगा दीविच्चगा तु सो उत्तरापथे एक्को ।
दो उत्तरापहा पुण, पाडलिपुत्तो हवति एक्को ॥ ३८९१ ॥

द्वीपं नाम **सुराष्ट्राया** दक्षिणस्यां दिशि समुद्रमवगाह्य यद् वर्त्तते तदीयौ द्वौ 'साभरकौ' रूपकौ स **उत्तरापथे** एको रूपको भवति । द्वौ च **उत्तरापथ**रूपकौ **पाटलिपुत्रक** एको रूपको भवति ॥ ३८९१ ॥ **विभागः ४ पत्रम् १०६९**

चक्के थूभाइता इतरे ॥ ५८२४ ॥

ये पुनरु**त्तरापथे धर्मचक्रं मथुरायां देवनिर्मितस्तूप** आदिशब्दात् **कोशलायां जीवन्तस्वामिप्रतिमा** तीर्थकृतां वा जन्मादिभूमयः एवमादिदर्शनार्थं व्रजन्तो निष्कारणिकाः ॥ ५८२४ ॥ **विभागः ५ पत्रम् १५३६**

(६) कच्छदेशः

"विहि त्ति जम्मि देसे जो जारिसो आयारो, जधा **सिंधुविसए** वियडभायणेसु पाणयं अगरहितं भवति, **कच्छविसए** गिहत्थसंसट्ठे वि उवस्सए वसंताणं नत्थि दोसो" इति **विशेषचूर्णौ** । **विभागः २ पत्रम् ३८४ टि० २**

(७) काञ्चीनगरी

> दो दक्खिणावहा तु, कंचीए णेलओ स दुगुणो य ।
> एगो कुसुमणगरगो,०   ॥ ३८९२ ॥

दक्षिणापथौ द्वौ रूपकौ 'काञ्चीपुर्याः' द्रविडविषयप्रतिबद्धाया एकः 'नेलकः' रूपको भवति । 'सः' काञ्चीपुरीरूपको द्विगुणितः सन् कुसुमनगरसत्क एको रूपको भवति ।   विभागः ४ पत्रम् १०६९

(८) काननद्वीपः

"नाव" इति यत्र नावमारोप्य धान्यमानीतमुपभुज्यते, यथा काननद्वीपे ।
विभागः २ पत्रम् ३८३-८४

(९) कुणालाजनपदः

या ऐरावती नदी कुणालाजनपदे योजनार्धविस्तीर्णा जङ्घार्धमानमुदकं वहति तस्याः केचित् प्रदेशाः शुष्काः न तत्रोदकं वहति ॥   विभागः ५ पत्रम् १४९५

(१०) कुणालानगरी

ऐरावती नाम नदी कुणालाया नगर्याः समीपे जङ्घार्धप्रमाणेनोद्वेधेन वहति ।
विभागः ५ पत्रम् १४९१

(११) कुसुमनगरम्

> दो दक्खिणावहा तु, कंचीए णेलओ स दुगुणो य ।
> एगो कुसुमनगरगो,०   ॥ ३८९२ ॥

दक्षिणापथौ द्वौ रूपकौ 'काञ्चीपुर्याः' द्रविडविषयप्रतिबद्धाया एकः 'नेलकः' रूपको भवति । 'सः' काञ्चीपुरीरूपको द्विगुणितः सन् कुसुमनगरसत्क एको रूपको भवति । विभागः ४ पत्रम् १०६९

(१२) कोङ्कणदेशः

तथा यत्र पुष्प-फलभोगी प्राचुर्येण लोकः, यथा कोङ्कणादिषु ।   विभागः २ पत्रम् ३८४

"पुप्फ त्ति जधा पुप्फविक्कएणं वित्ती भवति, एवं फलविक्कएण वि; अधवा पुप्फ-फलभोयणं जत्थ, जधा तोसलि-कोङ्कणेसु" इति चूर्णौ ।   विभागः २ पत्रम् ३८४ टि० १

> गिरिजन्नगमाईसु व, संखडि उक्कोसलंभे बिइओ उ ।
> अग्गिाहि मंगलट्ठी, पंथिगवइगाइसू तइओ ॥ २८५५ ॥

गिरियज्ञो नाम-कोङ्कणादिदेशेषु सायाह्नकालभावी प्रकरणविशेषः । आह च चूर्णिकृत्—गिरियज्ञः कोङ्कणादिषु भवति उस्सूरे त्ति । विशेषचूर्णिकारः पुनराह—गिरिजन्नो मत्तवालसंखडी भण्णइ, सा लाडविसए वरिसारत्ते भवइ त्ति ।   विभागः ३ पत्रम् ८०७

(१३) कोण्डलमिण्ढपुरम्

"अहवा कोंडलमिंढे कोंडलमेंढो वाणमंतरो, देवद्रोणी भरुयच्छाहरणीए, तत्थ यात्राए बहुजणो संखडिं करेइ ।" इति चूर्णौ विशेषचूर्णौ च ।   विभागः ३ पत्रम् ८८३ टि० ७

(१४) कोशलापुरी

चक्के थूभाइला इत्तो ॥ ५८२४ ॥

ये पुनरुत्तरापथे **धर्मचक्रं मथुरायां देवनिर्मितस्तूप** आदिशब्दात् **कोशलायां जीवन्तस्वामिप्रतिमा** तीर्थकृतां वा जन्मादिभूमय एवमादिदर्शनार्थं व्रजन्तो निष्कारणिकाः ॥ ५८२४ ॥

विभागः ५ पत्रम् १५३६

(१५) गोल्लविषयः

पालक्कशाकं **महाराष्ट्रे गोल्लविषये** च प्रसिद्धम्। "पालकं **मरहट्ठविसए गोल्लविसए** य सागो जायइ" इति **विशेषचूर्णौ**। **विभागः २ पत्रम् ६०३ टि० ४**

(१६) चीनाजनपदः

पट्ट सुवन्ने मलए, अंसुग चीणंसुके च विगलेंदी ।० ॥ ३६६२ ॥

चीनांशुको नाम–कोशिकाराख्यः कृमिः तस्माद् जातं चीनांशुकम्, यद्वा **चीना** नाम जनपदः तत्र यः श्लक्ष्णतरः पट्टः तस्माद् जातं चीनांशुकम्। **विभागः ४ पत्रम् १०१८**

(१७) डिम्भरेलकम्

कश्चिदतिपूरकेण सस्यं निष्पद्यते, यथा **बन्नासायां** पूरादवरिच्यमानायां तत्पूरपानीयभावितायां क्षेत्रभूमौ धान्यानि प्रकीर्यन्ते; यथा वा **डिम्भरेलके महिरावण**पूरेण धान्यानि वपन्ति।

विभागः २ पत्रम् ३८३

(१८) ताम्रलिप्तीनगरी

यस्य तु जलपथेन स्थलपथेन च द्वाभ्यामपि प्रकाराभ्यां भाण्डमागच्छति तद् द्वयोः पथोर्मुखमिति निरुक्त्या द्रोणमुखमुच्यते, तच्च **भृगुकच्छं ताम्रलिप्ती** वा। **विभागः २ पत्रम् ३४२**

नेमालि तामलित्तीय, सिंधूसोवीरमादिसु।
सव्वलोकोवभोज्जाइं, धरिज्ज कसिणाइँ वि ॥ ३९१२ ॥

नेपालविषये **ताम्रलिप्त्यां** नगर्यां **सिन्धुसौवीरादिषु** च विषयेषु सर्वलोकोपभोज्यानि कृत्स्नान्यपि वस्त्राणि धारयेत् ॥ ३९१२ ॥ **विभागः ४ पत्रम् १०७३-७४**

(१९) तोसलिदेशः

आणुग जंगल देसे, वासेण विणा वि तोसलिग्गहणं।
पायं च तत्थ वासति, पउरपलंबो उ अन्नो वि ॥ १०६१ ॥

देशो द्विधा—अनूपो जङ्गलश्च। नद्यादिपानीयबहुलोऽनूपः, तद्विपरीतो जङ्गलः निर्जल इत्यर्थः। यद्वा अनूपो अजङ्गल इति पर्यायौ। तत्रायं **तोसलिदेशो** यतोऽनूपो यतश्चास्मिन् देशे वर्षेण विनाऽपि सारणीपानीयैः सस्यनिष्पत्तिः, अपरं च 'तत्र' **तोसलिदेशे** 'प्रायः' बाहुल्येन वर्षति ततोऽतिपानीयेन विनष्टेषु सस्येषु प्रलम्बोपभोगो भवति, अन्यच्च **तोसलिः** प्रचुरप्रलम्बः, तत एतैः कारणै**स्तोसलि**ग्रहणं कृतम्। अन्योऽपि य ईदृशः प्रचुरप्रलम्बस्तत्राप्येष एव विधिः ॥ १०६१ ॥ **विभागः २ पत्रम् ३३१-३२**

"पुप्फ" त्ति जधा पुप्फविक्कएणं वित्ती भवति, एवं फलविक्कएण वि; अधवा पुप्फ-फलभोयणं जत्थ, जधा **तोसलि-कोङ्कणेसु**" इति **चूर्णौ**। **विभागः २ पत्रम् ३८४ टि० १**

आदेसो सेलपुरे, आदाणऽट्टाहियाए महिमाए।
तोसलिविसए विण्णवणट्ठा तह होति गमणं वा ॥ ३१४९ ॥

'आदेशः' संखडिविषये दृष्टान्तोऽयम्—**तोसलिविषये शैलपुरे** नगरे **ऋषितडागं** नाम सरः। तत्र **वर्षे वर्षे भूयान् लोकोऽष्टाहिकामहिमां करोति**। × × × ॥ ३१४९ ॥

सेलपुरे इसितलागम्मि होति अट्ठाहिया महामहिमा । ० ॥ ३१५० ॥

तोसलिदेशे शैलपुरे नगरे **ऋषितडागे** सरसि प्रतिवर्षं महता विच्छर्देनाष्टाहिकामहामहिमा भवति ।

विभागः ३ पत्रम् ८८३

तोसलिए वग्घरणा, अग्गीकुंडं तहिं जलति निच्चं ।
तत्थ सयंवरहेउं, चेडा चेडी य छुब्भंति ॥ ३४४६ ॥

व्याघरणशाला नाम **तोसलिविषये** ग्राममध्ये शाला क्रियते, तत्राग्निकुण्डं स्वयंवरहेतोर्नित्यमेव प्रज्वलति, तत्र च बहवश्चेटका एका च स्वयंवरा चेटिका 'प्रक्षिप्यन्ते' प्रवेश्यन्ते इत्यर्थः । यस्तेषां मध्ये तस्यै प्रतिभाति तमसौ वृणीते, एषा व्याघरणशाला । एतासु तिष्ठतां चत्वारो लघुकाः ॥ ३४४६ ॥ **विभागः ४ पत्रम् ९६३**

(२०) तोसलिनगरम्

उज्जेणी रायगिहं, तोसलिनगरे इसी य इसिवालो । ० ॥ ४२१९ ॥

उज्जयिनी राजगृहं च नगरं कुत्रिकापणयुक्तमासीत् । **तोसलिनगर**वास्तव्येन च वणिजा **ऋषिपालो** नाम वानमन्तर **उज्जयिनी**कुत्रिकापणात् क्रीत्वा स्वबुद्धिमाहात्म्येन सम्यगाराधितः, ततस्तेन **ऋषितडागं** नाम सरः कृतम् । **विभागः ४ पत्रम् ११४५**

(२१) दक्षिणापथः

कपर्दकादयो मार्गयित्वा तस्य दीयन्ते, ताम्रमयं वा नाणकं यद् व्यवह्रियते, यथा **दक्षिणापथे** काकिणी ।

विभागः २ पत्रम् ५७३

यथा **दक्षिणापथे** कुडवार्द्धमात्रया समितया महाप्रमाणो मण्डकः क्रियते, स हेमन्तकालेऽरुणोदयवेलायां अग्निष्टिकायां पक्त्वा धूलीजङ्घाय दीयते, तं गृहीत्वा भुञ्जानस्य तृतीयो भङ्गः । श्राद्धो वा प्रातर्गन्तुकामः साधुं विचारभूमौ गच्छन्तं दृष्ट्वा मङ्गलार्थी अनुद्गते सूर्ये निमन्त्रयेत्, पथिका वा पन्थानं व्यतिव्रजन्तो निमन्त्रयेयुः व्रजिकायां वाऽनुद्गते सूर्ये उच्चलितुकामाः साधुं प्रतिलाभयेयुः, एवमादिषु गृहीत्वा भुञ्जानस्य तृतीयो भङ्गो भवति ॥ २८५५ ॥ **विभागः ३ पत्रम् ८०८**

दो दक्खिणावहा तु, कंचीए णेलओ स दुगुणो य ।

दक्षिणापथौ द्वौ रूपकौ **काञ्चीपुर्याः द्रविडविषय**प्रतिबद्धायाः एकः 'नेलकः' रूपको भवति ।

विभागः ४ पत्रम् १०६९

(२२) द्रविडजनपदः

'देशतः' नानादेशानाश्रित्यानेकविधम् । यथा—**मगधानामोदनः, लाटानां** कूरः, **द्रमिलानां** चौरः, **अन्ध्राणा**मिडाकुरिति । **विभागः १ पत्रम् २०**

क्वचित्तु तडागजलैः [सस्यं निष्पद्यते,] यथा **द्रविडविषये ।** **विभागः २ पत्रम् ३८३**

दो दक्खिणावहा तु, कंचीए णेलओ स दुगुणो य ।

दक्षिणापथौ द्वौ रूपकौ **काञ्चीपुर्याः द्रविड**विषयप्रतिबद्धायाः एकः 'नेलकः' रूपको भवति ।

विभागः ४ पत्रम् १०६९

(२३) द्वारिकापुरी

पाषाणमयः प्राकारो यथा **द्वारिकायाम्,** **विभागः २ पत्रम् ३५१**

(२४) द्वीपवेलाकूलम्

यत्र जलपथेन नावादिवाहनारूढं भाण्डमुपैति तज्जलपत्तनम्, यथा **द्वीपम् ।** **विभागः २ पत्रम् ३४२**

'द्वीपं नाम' सुराष्ट्राया दक्षिणस्यां दिशि समुद्रमवगाह्य यद् वर्तते तदीयौ द्वौ 'साभरकौ' रूपकौ स उत्तरापथे एको रूपको भवति। विभागः ४ पत्रम् १०६९

(२५) धर्मचक्रभूमिका

क्वचिद् धर्मचक्रभूमिकादौ देशे 'वच्चकं' दर्भाकारं तृणविशेषं 'मुञ्जं च' शरस्तम्बं प्रथमं 'चिप्पित्वा' कुट्टयित्वा तदीयो यः क्षोदः तं कर्तयन्ति। ततः तैः वच्चकसूत्रैर्मुञ्जसूत्रैश्च 'गोणी' बोरको व्यूयते। प्रावरणा-ऽऽस्तरणानि च 'देशीं' देशविशेषं समासाद्य कुर्वन्ति। विभागः ४ पत्रम् १०२२

(२६) नेपालविषयः

नेमालि तामलित्तीय, सिंधूसोवीरमादिसु।
सव्वलोकोवभोज्जाइं, धरिज्ज कसिणाइँ वि॥ ३९१२॥

नेपालविषये ताम्रलिप्त्यां नगर्यां **सिन्धुसौवीरा**दिषु च विषयेषु सर्वलोकोपभोज्यानि कृत्स्नान्यपि वस्त्राणि धारयेत्॥ ३९१२॥ कुतः? इत्याह—

आइन्नता ण चोरादी, भयं णेव य गारवो।
उज्झाइवत्थवं चेव, सिंधूमादीसु गरहितो॥ ३९१३॥

नेपालादौ देशे सर्वलोकेनापि तादृग्वस्त्राणामाचीर्णता, न च तत्र चौरादिभयम्, नैव च 'गौरवम्' 'अहो! अहमीदृशानि वस्त्राणि प्रावृणोमि' इत्येवंलक्षणम्, अपि च उज्झाइतं–विरूपं यद् वस्त्रं तद्वान् **सिन्धुसौवी-रकादिषु** गर्हितो भवति, अतस्तत्र कृत्स्नान्यपि परिभोक्तव्यानि॥ ३९१३॥

विभागः ४ पत्रम् १०७३-७४

(२७) पाटलिपुत्रनगरम्

पाडलिपुत्ते नयरे **चंदगुत्तपुत्तस्स विंदुसारस्स** पुत्तो **असोगो** नाम राया। तस्स **असोगस्स** पुत्तो **कुणालो उज्जेणीए**। सा से कुमारभुत्तीए दिन्ना। विभागः १ पत्रम् ८८

पाडलिपुत्ते नयरे **चंदगुत्तो** राया। सो य **मोरपोसगपुत्तो** त्ति जे खत्तिया अभिजाणंति ते तस्स आणं परिभवन्ति॥ विभागः ३ पत्रम् ७०४

को **कुणालो?** कहं वा अंधो? त्ति—**पाडलिपुत्ते असोगसिरी** राया। तस्स पुत्तो **कुणालो**। तस्स कुमारभुत्तीए **उज्जेणी** दिन्ना। सो य अट्ठवरिसो। रन्ना लेहो विसज्जितो—शीघ्रमधीयतां कुमारः। असंवत्तिए लेहे रण्णो उट्ठितस्स माइसवत्तीए कतं 'अन्धीयतां कुमारः' सयमेव तत्तसलागाए अच्छीणि अंजियाणि। सुतं रण्णा। गामो से दिण्णो। गंधव्वकलासिक्खणं। पुत्तस्स रज्जत्थी आगतो **पाडलिपुत्तं असोगसिरिणो** जवणियंतरिओ गंधव्वं करेइ। विभागः ३ पत्रम् ९१७

दो साभरगा दीविच्चगा तु सो उत्तरापथे एको।
दो उत्तरापहा पुण, पाडलिपुत्तो हवति एको॥ ३८९१॥

'द्वीपं नाम' सुराष्ट्राया दक्षिणस्यां दिशि समुद्रमवगाह्य यद् वर्त्तते तदीयौ द्वौ 'साभरकौ' रूपकौ स **उत्तरापथे** एको रूपको भवति। द्वौ च **उत्तरापथ**रूपकौ **पाटलिपुत्रक** एको रूपको भवति॥ ३८९१॥ अथवा—

दो दक्खिणावहा तु, कंचीए णेलओ स दुगुणो य।
एगो कुसुमणगरगो, तेण पमाणं इमं होति॥ ३८९२॥

दक्षिणापथौ द्वौ रूपकौ **काञ्चीपुर्या द्रविड**विषयप्रतिबद्धाया एकः 'नेलकः' रूपको भवति। 'सः' **काञ्चीपुरी**रूपको द्विगुणितः सन् **कुसुमनगर**सत्क एको रूपको भवति। **कुसुमपुरं पाटलिपुत्रम-भिधीयते।** विभागः ४ पत्रम् १०६९

(२८) पाण्डुमथुरा पाश्चात्यजनपदश्च

अत्थस्स दरिसणम्मि वि, लद्धी एगंततो न संभवइ ।
दट्टुं पि न याणंते, बोहिय पंडा फणस सत्तू ॥ ४७ ॥

अर्थस्य दर्शनेऽपि कस्यचित् तदर्थविषया 'लब्धिः' अक्षराणां लब्धिरेकान्ततो न सम्भवति । तथा च 'बोधिकाः' **पश्चिमदिग्वर्त्तिनो म्लेच्छाः** पनसं दृष्ट्वाऽपि 'पनसः' इत्येवं न जानते, तेषां पनसस्यात्यन्तपरोक्षत्वात्, नहि तद्देशे पनसः सम्भवति । तथा **'पाण्डाः' पाण्डुमथुरावासिनः** सक्तून् दृष्ट्वाऽपि 'सक्तवोऽमी' इति न जानते, तेषां हि सक्तवोऽत्यन्तपरोक्षाः ततो न तद्दर्शनेऽपि तदक्षरलाभः ॥ ४७ ॥

विभागः १ पत्रम् १८

(२९) पूर्वदेशः

कवड्डगमादी तंबे, रुप्पे पीते तहेव केवडिए ।० ॥ १९६९ ॥

कपर्दकादयो मार्गयित्वा तस्य दीयन्ते । ताम्रमयं वा नाणकं यद् व्यवह्रियते, यथा—**दक्षिणापथे** काकिणी । रूपमयं वा नाणकं भवति, यथा—**भिल्लमाले** द्रम्मः । पीतं नाम–सुवर्णं तन्मयं वा नाणकं भवति, यथा—**पूर्वदेशे** दीनारः । 'केवडिको नाम' यथा तत्रैव **पूर्वदेशे** केतराभिधानो नाणकविशेषः ।

विभागः २ पत्रम् ५७३-७४

पूर्वदेशजं वस्त्रं **लाटविषयं** प्राप्य महार्घ्यम् । **विभागः ४ पत्रम् १०६८**

(३०) प्रतिष्ठानपुरम्

पइट्ठाणं नयरं । **सालवाहणो** राया । सो वरिसे वरिसे **भरुयच्छे नहवाहणं (नरवाहणं** प्रत्य० **)** रोहेइ । जाहे य वरिसारत्तो भवति ताहे सयं नयरं पडियाइ । एवं कालो वच्चइ । **विभागः १ पत्रम् ५२**

(३१) प्रभासतीर्थम्

कोंडलमेंढ पभासे, अब्बुय० ॥ ३१५० ॥

प्रभासे वा तीर्थे **अर्बुदे** वा पर्वते यात्रायां सङ्खडिः क्रियते । **विभागः ३ पत्रम् ८८३-८४**

"**पभासे** अब्बुए य पव्वए जत्ताए संखडी कीरति" इति **चूर्णौ विशेषचूर्णौ** च ।

विभागः ३ पत्रम् ८८३-८४ टि० ७

(३२) भिल्लमालदेशः

कवड्डगमादी तंबे, रुप्पे पीते तहेव केवडिए ।० ॥ १९६९ ॥

कपर्दकादयो मार्गयित्वा तस्य दीयन्ते । ताम्रमयं वा नाणकं यद् व्यवह्रियते, यथा—**दक्षिणापथे** काकिणी । रूपमयं वा नाणकं भवति, यथा—**भिल्लमाले** द्रम्मः । पीतं नाम–सुवर्णं तन्मयं वा नाणकं **भवति**, यथा—**पूर्वदेशे** दीनारः । 'केवडिको नाम' यथा तत्रैव **पूर्वदेशे** केतराभिधानो नाणकविशेषः ।

विभागः २ पत्रम् ५७३-७४

(३३) भृगुकच्छपुरम्

यस्य तु जलपथेन स्थलपथेन च द्वाभ्यामपि प्रकाराभ्यां भाण्डमागच्छति तद् द्वयोः पथोर्मुखमिति निरुक्त्या द्रोणमुखमुच्यते, तच्च **भृगुकच्छं ताम्रलिप्ती** वा । **विभागः २ पत्रम् ३४२**

कोंडलमेंढ पभासे,० ॥ ३१५० ॥

तथा **कुण्डलमेण्ठ**नाम्नो वानमन्तरस्य यात्रायां **भरुकच्छ**परिसरवर्ती भूयान् लोकः सङ्खडिं करोति ।

विभागः ३ पत्रम् ८८३-८४

"अहवा **कोंडलमिंढे कोंडलमेंढो** वाणमंतरो, देवद्रोणी **भरुयच्छा**हरणीए, तत्थ यात्राए बहुजणो संखडिं करेइ ।" इति **चूर्णौ विशेषचूर्णौ** च । **विभागः ३ पत्रम् ८८३ टि० ७**

पज्जोए णरसीहे, णव उज्जेणीय कुत्तिया आसी ।
भरुयच्छवणियऽसद्दह, भूयऽट्ठम सयसहस्सेणं ॥ ४२२० ॥
कम्ममि अदिज्जंते, रुट्ठो मारेइ सो य तं घेत्तुं ।
भरुयच्छाऽऽगम वावारदाण खिप्पं च सो कुणति ॥ ४२२१ ॥
भीएण खंभकरणं, एत्थुस्सर जा ण देमि वावारं ।
णिज्जित भूततलागं, आसेण ण पेहसी जाव ॥ ४२२२ ॥

चण्डप्रद्योतनाम्नि नरसिंहे **अवन्तिजनपदा**धिपत्यमनुभवति नव कुत्रिकापणा **उज्जयिन्या**मासीरन् ।

तदा किल **भयरुच्छा**ओ एगो वाणियओ असद्दहंतो **उज्जेणी**ए आगंतूण कुत्तियावणाओ भूयं मग्गइ । तेण कुत्तियावणवाणिएण चिंतियं—'एस ताव मं पवंचेइ ता एयं मोल्लेण वारेमि' त्ति भणियं—जइ सयसहस्सं देसि तो देमि भूयं । तेणं तं पि पडिवन्नं ताहे तेण भन्नइ—पंचरत्तं उदिक्खाहि तओ दाहामि । तेण अट्ठमं काऊण देवो पुच्छिओ । सो भणइ—देहि, इमं च भणिहिज्ज—जइ कम्मं न देसि तो भूओ तुमं उच्छाएहिइ । 'एवं भवउ' त्ति भणित्ता गहिओ तेण भूओ भणइ—कम्मं मे देहि । दिन्नं, तं खिप्पमेव कयं । पुणो मग्गइ, अन्नं दिन्नं । एवं सव्वम्मि कम्मे निट्ठिए पुणो भणइ—देहि कम्मं । तेण भन्नइ—एयं खंभे चडुत्तरं करेहि जाव अन्नं किंचि कम्मं न देमि । भूओ भणइ—अलाहि, पराजितो मि, चिंधं ते करेमि, जाव नावलोएसि तत्थ तलागं भविस्सइ । तेण अस्से विलग्गिऊण बारस जोयणाइं गंतूण पलोइयं जाव तक्खणमेव कयं तेण **भरुयच्छ**स्स उत्तरे पासे **भूयतलागं** नाम तलागं । **विभागः ४ पत्रम् ११४५**

(३४) मगधाजनपदः

'देशतः' नानादेशानाश्रित्यानेकविधम्, यथा—**मगधानां** ओदनः, **लाटानां** कूरः, **द्रमिलानां** चोरः, **अन्ध्राणाम्** इडाकुरिति । **विभागः १ पत्रम् २०**

(३५) मथुरानगरी

"वणि" त्ति यत्र वाणिज्येनैव वृत्तिरुपजायते न कर्षणेन, यथा **मथुरायाम्** । **विभागः २ पत्रम् ३८४**
तथा **मथुरापुर्यां** गृहेषु कृतेषु मङ्गलनिमित्तं यद् निवेश्यते तद् मङ्गलचैत्यम् । × × ×

अरहंतपइट्ठाए, महुरानयरीए मंगलाइं तु ।
गेहेसु चच्चरेसु य, छन्नउईगामअद्धेसु ॥ १७७६ ॥

मथुरानगर्यां गृहे कृते मङ्गलनिमित्तमुत्तरङ्गेषु प्रथममर्हत्प्रतिमाः प्रतिष्ठाप्यन्ते, अन्यथा तद् गृहं पतति, तानि मङ्गलचैत्यानि । तानि च तस्यां नगर्यां गेहेषु चत्वरेषु च भवन्ति । न केवलं तस्यामेव किन्तु तत्पुरीप्रतिबद्धा ये षण्णवतिसङ्ख्याका ग्रामार्द्धास्तेष्वपि भवन्ति । इह**ोत्तरापथानां** ग्रामस्य ग्रामार्द्ध इति संज्ञा । आह च **चूर्णिकृत्**—गामद्धेसु त्ति देसभणिती, छन्नउईगामेसु त्ति भणियं होइ, **उत्तरावहाणं** एसा भणिइ त्ति ॥
विभागः २ पत्रम् ५२४

मथुरायां भण्डीरयक्षयात्रायां कम्बल-शबलौ वृषभौ घाटिकेन-मित्रेण **जिनदास**स्यानापृच्छया वाहितौ, तन्निमित्तं सञ्जातवैराग्यौ श्रावकेणानुशिष्टौ भक्तं प्रत्याख्याय कालगतौ **नागकुमारे**षूपपन्नौ ॥ ५६२७ ॥
विभागः ५ पत्रम् १४८९

चक्के थूभाइता इतरे ॥ ५८२४ ॥

ये पुन**रुत्तरापथे धर्मचक्रं मथुरायां देवनिर्मितस्तूप** आदिशब्दात् **कोशलायां जीवन्तस्वामि**प्रतिमा तीर्थकृतां वा जन्मादिभूमय एवमादिदर्शनार्थं व्रजन्तो निष्कारणिकाः ॥ ५८२४ ॥
विभागः ५ पत्रम् १५३६

महुराणत्ती दंडे, सहसा णिग्गम अपुच्छिउं कयरं।
तस्स य तिक्खा आणा, दुहा गता दो वि पाडेउं ॥ ६२४४ ॥

गोयावरीए णदीए तडे **पतिट्ठाणं** नगरं। तत्थ **सालवाहणो** राया। तस्स **खरओ** अमच्चो। अन्नया सो **सालवाहणो** राया दंडनायगमाणवेइ—**महुरं** घेत्तूणं सिग्घमागच्छ। सो य सहसा अपुच्छिऊण दंडेहिं सह निग्गओ। तओ चिन्ता जाया—का **महुरा** घेत्तव्वा? **दक्खिणमहुरा उत्तरमहुरा** वा?। तस्स आणा तिक्खा, पुणो पुच्छिउं न तीरति। तओ दंडा दुहा काऊण दोसु वि पेसिया। गहियाओ दो वि **महुराओ**। **विभागः ६ पत्रम् १६४७**

थूभमह सड्ढिसमणी, बोहियहरणं तु णिवसुताऽऽतावे।
मज्झेण य अक्कंदे, कयम्मि जुद्धेण मोएति ॥ ६२७५ ॥

महुरानयरीए थूभो देवनिम्मितो। तस्स महिमानिमित्तं सड्ढीतो समणीहिं समं निग्गयातो। रायपुत्तो य तत्थ अदूरे आयावंतो चिट्ठइ। ताओ सड्ढी-समणीओ बोहिएहिं गहियाओ तेणंतेणं आणियाओ। ताहिं तं साहुं दट्ठूणं अक्कंदो कओ। तओ रायपुत्तेण साहुणा जुद्धं दाऊण मोइयाओ ॥ **विभागः ६ पत्रम् १६५६**

(३६) मलयदेशः

पट्ट सुवन्ने मलए,० ॥ ३६६२ ॥

मलयो नाम देशः, तत्सम्भवं मलयजम्। **विभागः ४ पत्रम् १०१८**

(३७) महाराष्ट्रदेशः

अथ प्रभूतमुपकरणं न शक्नोति सर्वमेकवारं नेतुं तदा त्रिषु चतुर्षु वा कल्पेषु बद्ध्वा 'कोलुकपरम्परकेण' **महाराष्ट्र**प्रसिद्धकोलुकचक्रपरम्परन्यायेन निष्काशयति। **विभागः १ पत्रम् १६७**

"विहि" त्ति कस्मिन् देशे कीदृशः समाचारः? यथा **सिन्धुषु** रजकाः सम्भोज्याः, **महाराष्ट्र**विषये कल्पपाला अपि सम्भोज्या इति ॥ १२३९ ॥ **विभागः २ पत्रम् ३८४**

पालङ्कशाकं **महाराष्ट्रादौ** प्रसिद्धम्, **विभागः २ पत्रम् ६०३**

"पालक्कं **मढ्ढरट्ठविसए गोल्लविसए** य सागो जायइ" इति **विशेषचूर्णौ।**
विभागः २ पत्रम् ६०३ टि० ४

अथवा विकुर्वितं नाम—**महाराष्ट्र**विषये सागारिकं विद्ध्वा तत्र विण्टकः प्रक्षिप्यते, **विभागः ३ पत्रम् ७३०**

कस्यापि **महाराष्ट्रा**दिविषयोत्पन्नस्य साधोरङ्गादानं वेण्टकविद्धम्। **विभागः ३ पत्रम् ७४१**

रसावणो तत्थ दिट्ठंतो ॥ ३५३९ ॥

अत्र 'रसापणः' मद्यहट्टो दृष्टान्तः। यथा—**महाराष्ट्र**देशे रसापणे मद्यं भवतु वा मा वा तथापि तत्परिज्ञानार्थं तत्र ध्वजो बध्यते, तं ध्वजं दृष्ट्वा सर्वे भिक्षाचरादयः परिहरन्ति। **विभागः ४ पत्रम् ९८५**

नीलकंबलमादी तु, उण्णियं होति अच्चियं।
सिसिरे तं पि धारेज्जा, सीतं नऽण्णेण रुब्भति ॥ ३९१४ ॥

नीलकम्बलादिकमौर्णिकं **महाराष्ट्र**विषये 'अर्चितं' महार्घ्यं भवति, तदपि तत्र प्राप्तः '**शिशिरे**' शीतकाले 'धारयेत्' प्रावृणुयादित्यर्थः, शीतं यतो नान्येन वस्त्रेण निरुध्यते ॥ ३९१४ ॥ **विभागः ४ पत्रम् १०७४**

(३८) यवनविषयः

एमेव य आगन्तुं, पालित्तयबेट्टिया जवणे ॥ ४९१५ ॥

××× आगन्तुकं नाम यद् अन्यत आगतम्। ××× तथा चात्र **पादलिप्ताचार्य**कृता 'बेट्टिक' त्ति राजकन्यका दृष्टान्तः। स चायम्—

पालित्तायरिएहिं रन्नो भगिणिसरिसिया जंतपडिमा कया । चंकमुम्मेसनिम्मेसमयी तालविंटहत्था आयरियाणं पुरतो चिट्ठइ । राया वि अइव **पालित्तगस्स** सिणेहं करेइ । धिज्जाइएहिं पउट्ठेहिं रन्नो कहियं—भगिणी ते समणएणं अभिओगिया । राया न पत्तियति । भणिओ य—पेच्छ, दंसेमु ते । राया आगतो । पासित्ता **पालित्तयाणं** रुट्ठो पच्चोसरिओ य । तओ सा आयरिएहिं चड त्ति विकरणीकया । राया सुट्ठुतरं आउट्टो ॥

एवमामन्तुका अपि स्त्रीप्रतिमा भवन्ति । **'जवणे'** त्ति **यवनविषये** ईदृशानि स्त्रीरूपाणि प्राचुर्येण क्रियन्ते ॥ ४९१९ ॥ **विभागः ५ पत्रम् १३१९-१६**

(३९) राजगृहनगरम्

दिक्खा य सालिभद्दे, उवकरणं सयसहस्सेहिं ॥ ४२१९ ॥

तथा **राजगृहे श्रेणिके** राज्यमनुशासति **शालिभद्रस्य** सुप्रसिद्धचरितस्य दीक्षायां शतसहस्राभ्याम् 'उपकरणं' रजोहरण-प्रतिग्रहलक्षणमानीतम्, अतो ज्ञायते यथा **राजगृहे** कुत्रिकापण आसीदिति **पुरातन-गाथासमासार्थः** ॥ ४२१९ ॥ × × × ×

रायगिहे सालिभद्दस्स ॥ ४२२३ ॥

तथा **राजगृहे शालिभद्रस्य** रजोहरणं प्रतिग्रहश्च कुत्रिकापणात् प्रत्येकं शतसहस्रेण क्रीतः ॥ ४२२३ ॥

विभागः ४ पत्रम् ११४५-४६

(४०) लाटविषयः

'देशतः नानादेशानाश्रित्यानेकविधम्, यथा—**मगधानां** ओदनः, **लाटानां** कूरः, **द्रमिलानां** चौरः **अन्ध्राणाम्** इडाकुरिति । **विभागः १ पत्रम् २०**

तत्र क्वचिद् देशोऽभ्रैः सस्यं निष्पद्यते, वृष्टिपानीयैरित्यर्थः, यथा **लाटविषये** ।

विभागः २ पत्रम् ३८३

गिरिजन्नगमाईसु व, संखडि उक्कोसलंभे बिइओ उ ।
अग्गिम्मि मंगलट्ठी, पंथिग-वइगाइसू तइओ ॥ २८५५ ॥

गिरियज्ञो नाम—**कोङ्कणादिदेशेषु** सायाह्नकालभावी प्रकरणविशेषः । आह च **चूर्णिकृत्**—गिरियज्ञः **कोङ्कणादिषु** भवति उस्सूरे त्ति । **विशेषचूर्णिकारः** पुनराह—गिरिजन्नो मतवालसंखडी भन्नइ, सा **लाडविसए** वरिसारत्ते भवइ त्ति । **विभागः ३ पत्रम् ८०७**

"कंजुसिणोदेहिं" त्ति इह च **लाटदेशे**ऽवश्रावणं काञ्जिकं भण्यते । यदाह **चूर्णिकृत्**—

अवसावणं **लाडाणं** कंजियं भण्णइ त्ति । **विभागः ३ पत्रम् ८७१**

पूर्वदेशजं वस्त्रं **लाटविषयं** प्राप्य महार्घ्यम् । **विभागः ४ पत्रम् १०६८**

(४१) शैलपुरम्

आदेसो सेलपुरे,० ॥ ३१४९ ॥

आदेशः सङ्खडिविषये दृष्टान्तोऽयम्—**तोसलिविषये शैलपुरे नगरे ऋषितडागं** नाम सरः । तत्र वर्षे वर्षे भूयान् लोकोऽष्टाह्निकामहिमां करोति । × × ×

सेलपुरे इसितलागम्मि होति अट्ठाहियामहामहिमा ।० ॥ ३१५० ॥

तोसलिदेशे शैलपुरे नगरे **ऋषितडागे** सरसि प्रतिवर्षं महता विच्छर्देनाष्टाह्निकामहामहिमा भवति ।

विभागः ३ पत्रम् ८८३

(४२) सिन्धुदेशः

क्वापि नदीपानीयैः [सस्यं निष्पद्यते,] यथा **सिन्धुदेशे** । **विभागः २ पत्रम् ३८३**

"कप्पे" त्ति कस्मिन् क्षेत्रे कः कल्पः ?, यथा **सिन्धु**विषयेऽनिमिषाद्याहारोऽगर्हितः । "विहिं" त्ति कस्मिन् देशे कीदृशः समाचारः ? यथा **सिन्धुषु** रजकाः सम्भोज्याः, **महाराष्ट्र**विषये कल्पपाला अपि सम्भोज्या इति ॥ १२३९ ॥ **विभागः २ पत्रम् ३८४**

"मंस त्ति जत्थ मंसेण दुब्भिक्खे लंघिज्जति कालो, जधा **सिंधूए** सुभिक्खे वि ।" इति **चूर्णौ** ।
विभागः २ पत्रम् ३८४ टि० १

"विहिं त्ति कम्मि देसे केरिसो आयारो ? जधा **सिंधूए** णिल्लेवगा संभोइया" इति **चूर्णौ** । "विहिं त्ति जम्मि देसे जो जारिसो आयारो, जधा **सिंधु**विसए वियडभायणेसु पाणयं अगरहितं भवति, **कच्छ**विसए गिहत्थसंसट्ठे वि उवस्सए वसंताणं नत्थि दोसो" इति **विशेषचूर्णौ** । **विभागः २ पत्रम् ३८४ टि० २**

गोरसधातुको वा कश्चित् **सिन्धुदेशीयः** प्रव्रजितः । **विभागः ३ पत्रम् ७७५**

पडिकुट्ठ देस कारणगया उ तदुवरमि निंति चरणट्ठा ।० ॥ २८८१ ॥

सिन्धुदेशप्रभृतिको योऽसंयमविषयः स भगवता 'प्रतिक्रुष्टः' न तत्र विहर्त्तव्यम् । परं तं प्रतिषिद्धदेश-मशिवादिभिः कारणैर्गताः ततो यदा तेषां कारणानाम् 'उपरमः' परिसमाप्तिर्भवति तदा चारित्रार्थं ततोऽसंयम-विषयाद् निर्गच्छन्ति, निर्गत्य च संयमविषयं गच्छन्ति । **विभागः ३ पत्रम् ८१६**

किञ्चिद् वस्त्रं प्रथमत एव दुर्बलम् ततः पार्श्वा-ऽन्तेषु दशिकाभिर्बद्धेषु 'दृढं' चिरकालवहनक्षमं भविष्यतीति कृत्वा तेन कारणेन दशिकास्तस्य न कल्पयेत् । यद्वा 'देशीतः' **सिन्ध्वादि**देशमाश्रित्य यत्रातिदीर्घदशाकं वस्त्रं तत्र छिन्द्यात्, तस्य दशिका न कल्पयितव्या इति भावः ॥ ३९०६ ॥ **विभागः ४ पत्रम् १०७२**

(४३) सिन्धुसौवीरदेशः

यदा भगवान् श्रीमन्**महावीरस्वामी राजगृह**नगराद् **उदायन**नरेन्द्रप्रव्राजनार्थं **सिन्धुसौवीर**देश-वतंसं **वीतभयं** नगरं प्रस्थितस्तदा किलापान्तराले बहवः साधवः क्षुधार्त्तास्तृषार्दिताः संज्ञाबाधिताश्च बभूवुः । यत्र च भगवानावासितस्तत्र तिलभृतानि शकटानि पानीयपूर्णश्च ह्रदः 'समभौमं च' गर्त्ता-बिलादिवर्जितं स्थण्डिलमभवत् । अपि च विशेषेण तत् तिलोदकस्थण्डिलजातं 'विरहिततरं' अतिशयेनाऽऽगन्तुकैस्तदुत्थैश्च जीवैर्वर्जितमित्यर्थः । **विभागः २ पत्रम् ३१४**

नेमालि तामलित्तीय, सिंधूसोवीरमादिसु ।
सव्वलोकोवभोज्जाइं, धरिज्ज कसिणाइँ वि ॥ ३९१२ ॥

नेपालविषये ताम्रलिप्त्यां नगर्यां **सिन्धुसौवीरा**दिषु च विषयेषु सर्वलोकोपभोज्यानि कृत्स्नान्यपि वस्त्राणि धारयेत् ॥ ३९१२ ॥ × × × ×

उज्झाइवत्थवं चेव, सिंधूमादीसु गरहितो ॥ ३९१३ ॥

अपि च उज्झाइतं-विरूपं यद् वस्त्रं तद्वान् **सिन्धुसौवीरका**दिषु गर्हितो भवति, अतस्तत्र कृत्स्नान्यपि परिभोक्तव्यानि ॥ ३९१३ ॥ **विभागः ४ पत्रम् १०७३-७४**

(४४) सुमनोमुखनगरम्

पाषाणमयः प्राकारो यथा **द्वारिकायाम्**, इष्टकामयः प्राकारो यथाऽऽ**नन्दपुरे**, मृत्तिकामयो यथा **सुमनोमुख**नगरे, "खोड" त्ति काष्ठमयः प्राकारः कस्यापि नगरादेर्भवति, कटकाः-वंशदलादिमयाः कण्टिकाः-बुब्बूलादिसम्बन्धिन्यः तन्मयो वा परिक्षेपो ग्रामादेर्भवति, एष सर्वोऽपि द्रव्यपरिक्षेपः ।
विभागः २ पत्रम् ३५१

(४५) सुराष्ट्रादेशः

मण्डलमिति देशखण्डम्, यथा—षण्णवतिमण्डलानि **सुराष्ट्रादेशः** । **विभागः २ पत्रम् २९८**

दो साभरगा दीविच्चगा तु सो उत्तरापथे एक्को ।

'**द्वीपं** नाम' **सुराष्ट्राया** दक्षिणस्यां दिशि समुद्रमवगाह्य यद् वर्त्तते तदीयौ द्वौ 'साभरकौ' रूपकौ स **उत्तरापथे** एको रूपको भवति । **विभागः ४ पत्रम् १०६९**

(४६) स्थूणानगरी

न पारदोच्चा गरिहा व लोए, थूणाइएसुं विहरिज्ज एवं ।
भोगाऽइरित्ताऽऽरभडा विभूसा, कप्पेज्जमिच्चेव दसाउ तत्थ ॥ ३९०५ ॥

'पारदोच' त्ति चौरभयं तद् यत्र नास्ति, यत्र च तथाविधे वस्त्रे प्रावियमाणे लोके गर्हा नोपजायते तत्र **स्थूणा**दिविषयेषु 'एवं' सकलकृत्स्नमपि वस्त्रं प्रावृत्य विहरेत्, परं तस्य दशाश्छेत्तव्याः । कुतः ? इत्याह— "भोग" त्ति तासां दशानां शुषिरतया परिभोगः कर्तुं न कल्पते, अतिरिक्तश्चोपधिर्भवति, प्रत्युपेक्ष्यमाणे च दशिकाभिरारभडादोषाः, विभूषा च सदशाके वस्त्रे प्राव्रियमाणे भवति । 'इत्येवम्' एभिः कारणैस्तत्र दशाः 'कल्पयेत्' छिन्द्यात् ॥ ३९०५ ॥ **विभागः ४ पत्रम् १०७२**

[११ गिरि-नदी-सरः-तडागादि]

(१) अर्बुदपर्वतः

कोंडलमेंढ पभासे, अब्बुय० ॥ ३१५० ॥

प्रभासे वा तीर्थे **अर्बुदे** वा पर्वते यात्रायां संखडिः क्रियते । **विभागः ३ पत्रम् ८८४**

"**पभासे अब्बुए** य पव्वए जत्ताए संखडी कीरति" इति **चूर्णौ विशेषचूर्णौ** च ।

विभागः ३ पत्रम् ८८३ टि० ७

(२) इन्द्रपदः—गजाग्रपदगिरिः

इन्द्रपदो नाम—**गजाग्रपदगिरिः**, तत्र ह्युपरिष्टाद् ग्रामो विद्यते अधोऽपि ग्रामो मध्यमश्रेण्यामपि ग्रामः । तस्याश्च मध्यमश्रेण्याश्चतसृष्वपि दिक्षु ग्रामाः सन्ति, ततो मध्यमश्रेणिग्रामे स्थितानां षट्सु दिक्षु क्षेत्रं भवति । **विभागः ४ पत्रम् १२९९**

(३) उज्जयन्तगिरिः सिद्धिशिला च

उज्जेंत णायसंडे, सिद्धिसिलादीण चेव जत्तासु ।
सम्मत्तभाविएसुं, ण हुंति मिच्छत्तदोसा उ ॥ ३१९२ ॥

उज्जयन्ते ज्ञातखण्डे सिद्धिशिलायामेवमादिषु सम्यक्त्वभावितेषु तीर्थेषु याः प्रतिवर्षं यात्राः—संखडयो भवन्ति तासु गच्छतो मिथ्यात्वस्थिरीकरणादयो दोषा न भवन्ति ॥ **विभागः ३ पत्रम् ८९३**

'धारोदकं नाम' गिरिनिर्झरजलम्, यथा **उज्जयन्तादौ** । **विभागः ४ पत्रम् ९५७**

(४) ऐरावती नदी

एरवइ कुणालाए **(उद्देशः ४ सूत्रम् ३३)**

ऐरावती नाम नदी **कुणालाया** नगर्याः समीपे जङ्घार्द्धप्रमाणेनोद्वेधेन वहति तस्यामन्यस्यां वा यत्रैवं "चक्किया" शक्नुयात् उत्तरीतुमिति शेषः । × × ×

एरवइ जम्हि चक्किय, जल-थलकरणे इमं तु णाणत्तं ।
एगो जलम्मि एगो, थलम्मि इहइं थलाऽऽगासं ॥ ५६३८ ॥

ऐरावती नाम नदी, यस्यां जल-स्थलयोः पादकरणेनोत्तरीतुं शक्यम् ॥ **विभागः ५ पत्रम् १४९१**

या **ऐरावती** नदी **कुणाला**जनपदे योजनार्धविस्तीर्णा जङ्घार्धमानमुदकं वहति तस्याः केचित् प्रदेशाः शुष्काः न तत्रोदकमस्ति ॥ **विभागः ५ पत्रम् १४९५**

(५) गङ्गा-सिन्धू नद्यौ

तथा महासलिलाः—**गङ्गा-सिन्धु**प्रभृतयो महानद्यः तासां जलं महासलिलाजलम् ॥
विभागः ४ पत्रम् ९५७

(६) प्राचीनवाहः सरस्वती च

अब्बुय पादीणवाहम्मि ॥ ३१५० ॥

'प्राचीनवाहः' सरस्वत्याः सम्बन्धी पूर्वदिगभिमुखः प्रवाहः, तत्राऽऽ**नन्दपुर**वास्तव्यो लोको गत्वा यथाविभवं शरदि सङ्खडिं करोति ॥ ३१५० ॥ **विभागः ३ पत्रम् ८८४**

(७) बन्नासा-महिरावणनद्यौ

क्वचिदतिपूरकेण सस्यं निष्पद्यते, यथा **बन्नासायां** पूरादवरिच्यमानायां तत्पूरपानीयभावितायां क्षेत्रभूमौ धान्यानि प्रकीर्यन्ते; यथा वा **डिम्भरेलके महिरावण**पूरेण धान्यानि वपन्ति ।
विभागः २ पत्रम् ३८३

(८) ऋषितडागं सरः

आदेसो सेलपुरे, आदाणऽट्ठाहियाए महिमाए ।
तोसलिविसए विण्णवणट्ठा तह होंति गमणं वा ॥ ३१४९ ॥

'आदेशः' सङ्खडिविषये दृष्टान्तोऽयम्—**तोसलि**विषये **शैलपुरे** नगरे **ऋषितडागं** नाम सरः । तत्र वर्षे वर्षे भूयान् लोकोऽष्टाहिकामहिमां करोति । × × ×

सेलपुरे इसितलागम्मि होति अट्ठाहिया महामहिमा ।० ॥ ३१५० ॥

तोसलिदेशे **शैलपुरे** नगरे **ऋषितडागे** सरसि प्रतिवर्षं महता विच्छर्देनाष्टाहिकामहामहिमा भवति ।
विभागः ३ पत्रम् ८८३

एमेव तोसलीए, इसिवालो वाणमंतरो तत्थ ।
णिज्जित इसीतलागे,० ॥ ४२२३ ॥

'एवमेव' **तोसलि**नगरवास्तव्येन वणिजा **उज्जयिनी**मागम्य कुत्रिकापणाद् **ऋषिपालो** नाम वानमन्तरः क्रीतः । तेनापि तथैव निर्जितेन **ऋषितडागं** नाम सरश्चक्रे । **विभागः ४ पत्रम् ११४६**

(९) भूततडागं

णिज्जित भूततलागं,० ॥ ४२२२ ॥

भूओ भणइ—अलाहि, पराजितो मि, चिंधं ते करेमि—जाव नावलोएसि तत्थ तलागं भविस्सइ । तेण अस्से विलग्गिऊण बारस जोयणाइं गंतूण पलोइयं जाव तक्खणमेव कयं तेण **भरुयच्छस्स** उत्तरे पासे **भूयतलागं** नाम तलागं ॥ **विभागः ४ पत्रम् ११४५**

(१०) ज्ञातखण्डम्

उज्जेंत णायसंडे, सिद्धिसिलादीण चेव जत्तासु ।
सम्मत्तभाविएसुं, ण इंति मिच्छत्तदोसा उ ॥ ३१९२ ॥

उज्जयन्ते ज्ञातखण्डे सिद्धिशिलायामेवमादिषु सम्यक्त्वभावितेषु तीर्थेषु याः प्रतिवर्षं यात्राः-सङ्खड्यो भवन्ति तासु गच्छतो मिथ्यात्वस्थिरीकरणादयो दोषा न भवन्ति ॥ ३१९२ ॥

विभागः ३ पत्रम् ८९३

[१२ सङ्खडी-यात्रा-अष्टाह्निकामहादि]

(१) सङ्खडिशब्दस्यार्थः

"भोज्यं" **सङ्खडी** भवति । आह च **चूर्णिकृत्**—"भोज्जं ति वा **संखडि** त्ति वा एगट्ठं ।"

विभागः ३ पत्रम् ८९०

(२) देशविदेशेषु जैनेतरसङ्खडियात्रादि

गिरिजन्नगमाईसु व, संखडि उक्कोसलंभे बिइओ उ ।
अग्गिट्ठि मंगलट्ठी, पंथिग-वइगाइसू तइओ ॥ २८५५ ॥

गिरियज्ञो नाम-**कोङ्कणादिदेशेषु** सायाह्नकालभावी **प्रकरण**विशेषः । आह च **चूर्णिकृत्**—"**गिरियज्ञः कोङ्कणा**दिषु भवति उस्सूरे" त्ति । **विशेषचूर्णिकारः** पुनराह—"**गिरिजन्नो** मत्तबाल-**संखडी** भन्नइ, सा **लाडविसए** वरिसारत्ते भवइ त्ति । [गिरिक (ज) न्न त्ति भूमिदाहो त्ति भणितं होइ ।"] तदादिषु **सङ्खडिषु** वाशब्दादन्यत्र वा क्वापि सूर्ये ध्रियमाणे उत्कृष्टम्-अवगाहिमादि द्रव्यं लब्ध्वा यावत् प्रतिश्रयमागच्छति तावदस्तमुपगतो रविः ततो रात्रौ भुङ्क्ते इति द्वितीयो भङ्गः । तथा **दक्षिणापथे** कुडवार्द्धमात्रया समितया महाप्रमाणो मण्डकः क्रियते, स हेमन्तकालेऽरुणोदयवेलायां अग्निष्टिकायां पक्त्वा धूलीजङ्घाय दीयते, (स गुडघृतोन्मिश्रोऽरुणोदयवेलायां धूलीजङ्घाय दीयते एषोऽग्निष्टिका ब्राह्मण उच्यते, **प्रत्यन्तरे**) तं गृहीत्वा भुञ्जानस्य तृतीयो भङ्गः । श्राद्धो वा प्रातर्गन्तुकामः साधुं विचारभूमौ गच्छन्तं दृष्ट्वा मङ्गलार्थी अनुद्गते सूर्ये निमन्त्रयेत्, पथिका वा पन्थानं व्यतिव्रजन्तो निमन्त्रयेयुः, व्रजिकायां वाऽनुद्गते सूर्ये उच्चलितुकामाः साधुं प्रतिलाभयेयुः, एवमादिषु गृहीत्वा भुञ्जानस्य तृतीयो भङ्गो भवति ॥ २८५५ ॥ **विभागः ३ पत्रम् ८०७**

अथ **सङ्खडी** कथं कुत्र वा भवति ? इत्युच्यते—

आदेसो सेलपुरे, आदाणऽट्ठाहियाए महिमाए ।
तोसलिविसए विण्णवणट्ठा तह होति गमणं वा ॥ ३१४९ ॥

"**आदेशः**" **सङ्खडि**विषये दृष्टान्तोऽयम्—

तोसलिविषये शैलपुरे नगरे **ऋषितडागं** नाम सरः । तत्र वर्षे वर्षे भूयान् लोको**ऽष्टाह्निकामहिमां** करोति । तत्रोत्कृष्टावगाहिमादिद्रव्यस्यादानं-ग्रहणं तदर्थं कोऽपि लुब्धो गन्तुमिच्छति । ततः स गुरूणां विज्ञपनां **सङ्खडि**गमनार्थं करोति । आचार्या वारयन्ति । तथापि यदि गमनं करोति ततस्तस्य प्रायश्चित्तं दोषाश्च वक्तव्या इति **पुरातनगाथा**समासार्थः ॥ ३१४९ ॥ अथैनामेव विवृणोति— •

सेलपुरे इसितलागम्मि होति अट्ठाहियामहामहिमा ।
कोंडलमेंढ पभासे, अब्बुय पादीणवाहम्मि ॥ ३१५० ॥

तोसलिदेशे शैलपुरे नगरे **ऋषितडागे** सरसि प्रतिवर्षं महता विच्छर्देना**ऽष्टाह्निकामहामहिमा** भवति । तथा **कुण्डलमेण्ठनाम्नो** वानमन्तरस्य यात्रायां **भरुकच्छ**परिसरवर्ती भूयान् लोकः **सङ्खडिं** करोति । **प्रभासे** वा तीर्थे **अर्बुदे** वा पर्वते यात्रायां **सङ्खडिः** क्रियते । **'प्राचीनवाहः' सरस्वत्याः** सम्बन्धी पूर्वदिगभिमुखः प्रवाहः, तत्रा**ऽऽनन्दपुर**वास्तव्यो लोको गत्वा यथाविभवं शरदि **सङ्खडिं** करोति ॥ ३१५० ॥ **विभागः ३ पत्रम् ८८३-८४**

"अहवा **कोंडलमिंढे कोंडलमेंढो** वाणमंतरो । देवद्रोणी **भरुयच्छा**हरणीए, तत्थ **यात्राए** बहुजणो

संखडिं करेइ । **पभासे अब्बुए** य पव्वए **जत्ताए संखडी** कीरति । **पायीणवाहो सरस्सतीए**, तत्थ **आणंदपुरगा** जधाविभवेणं वच्चंति **सरए** ।" इति **चूर्णौ विशेषचूर्णौ** च ॥

विभागः ३ पत्रम् ८८३ टि० ७

(३) देशविदेशेषु जैनदर्शनसङ्खडियात्रादि

ताश्च **सङ्खडयो** द्विधा—सम्यग्दर्शनभाविततीर्थविषया मिथ्यादर्शनभाविततीर्थविषयाश्च । तत्र प्रथममाद्यासु गन्तव्यम्, यत आह—

उज्जेंत णायसंडे, सिद्धसिलादीण चेव जत्तासु ।
सम्मत्तभाविएसुं, ण हुंति मिच्छत्तदोसा उ ॥ ३१९२ ॥

उज्जयन्ते ज्ञातखण्डे सिद्धशिलायामेवमादिषु सम्यक्त्वभावितेषु तीर्थेषु याः प्रतिवर्षं **यात्राः-सङ्खडयो** भवन्ति तासु गच्छतो मिथ्यात्वस्थिरीकरणादयो दोषा न भवन्ति ॥ ३१९२ ॥

विभागः ३ पत्रम् ८९३

(४) आवाहमहादि

होहिंति णवग्गाइं, आवाह-विवाह-पव्वयमहादी ।० ॥ ४७१६ ॥

आवाह-विवाह-पर्वतमहादीनि **प्रकरणानि** 'नवाग्राणि' प्रत्यासन्नानि भविष्यन्ति । आवाहः-वध्वा वरगृहानयनम्, विवाहः-पाणिग्रहणम्, **पर्वतमहः** प्रतीतः, आदिशब्दात् **तडाग-नदीमहा**दिपरिग्रहः ।

विभागः ४ पत्रम् १२६९

मथुरायां भण्डीरयक्षयात्रायां कम्बल-शबलौ वृषभौ घाटिकेन-मित्रेण **जिनदास**स्यानापृच्छया वाहितौ, तन्निमित्तं सञ्जातवैराग्यौ श्रावकेणानुशिष्टौ भक्तं प्रत्याख्याय कालगतौ **नागकुमारे**षूपपन्नौ ॥५६२७॥

विभागः ५ पत्रम् १४८९

थूभमह सड्ढिसमणी, बोहियहरणं तु निवसुताऽऽतावे ।
मज्झेण य अक्कंदे, कयम्मि जुद्धेण मोएति ॥ ६२७५ ॥

महुरानयरीए थूभो देवनिम्मितो, तस्स **महिमानिमित्तं** सड्ढीतो समणीहिं समं निग्गयातो । रायपुत्तो य तत्थ अदूरे आयावंतो चिट्ठइ । ताओ सड्ढी-समणीओ बोहिएहिं गहियातो तेणंतेणं आणियाओ । ताहिं तं साहुं दट्ठूणं अक्कंदो कओ । तओ रायपुत्तेण साहुणा जुद्धं दाऊण मोइयाओ ॥

विभागः ६ पत्रम् १६५६

[१३ आपणाः-हट्टाः]

(१) पणि-विपणी

दाणे वणि-विवणि दारसंलोए ।० ॥ ३२७८ ॥

"वणि-विवणि" त्ति इह ये बृहत्तरा आपणास्ते **पणय** इत्युच्यन्ते, ये तु दरिद्रापणास्ते विपणयः; यद्वा ये आपणस्थिता व्यवहरन्ति ते **वणिजः**, ये पुनरापणेन विनाऽप्यूर्द्धस्थिता वाणिज्यं कुर्वन्ति ते विवणिजः ।

विभागः ३ पत्रम् ९१८

(२) कुत्रिकापणाः तत्र च मूल्यविभागादि

कु त्ति पुढवीय सण्णा, जं विज्जति तत्थ चेदणमचेयं ।
गहणुवभोगे य खमं, न तं तहिं आवणे णत्थि ॥ ४२१४ ॥

'कुः' इति पृथिव्याः संज्ञा, तस्याः त्रिकं कुत्रिकं—स्वर्ग-मर्त्य-पाताललक्षणं तस्यापणः—हट्टः **कुत्रिकापणः** । किमुक्तं भवति ? इत्याह—'तत्र' पृथिवीत्रये यत् किमपि चेतनमचेतनं वा द्रव्यं सर्वस्यापि लोकस्य ग्रहणो-

पभोगक्षमं विद्यते तत् 'तत्र' आपणे न नास्ति, "द्वौ नञौ प्रकृत्यर्थं गमयतः" इति वचनाद् अस्त्येवेति भावः ॥ ४२१४ ॥ अथोत्कृष्ट-मध्यम-जघन्यमूल्यस्थानानि प्रतिपादयति—

पणतो पागतियाणं, साहस्सो होति इब्भमादीणं ।
उक्कोस सतसहस्सं, उत्तमपुरिसाण उवधी उ ॥ ४२१५ ॥

प्राकृतपुरुषाणां प्रव्रजतामुपधिः **कुत्रिकापण**सत्कः 'पञ्चकः' पञ्चरूपकमूल्यो भवति । 'इभ्यादीनां' इभ्य-श्रेष्ठि-सार्थवाहादीनां मध्यमपुरुषाणां 'साहस्रः' सहस्रमूल्य उपधिः । 'उत्तमपुरुषाणां' चक्रवर्त्ति-माण्डलीक-प्रभृतीनामुपधिः शतसहस्रमूल्यो भवति । एतच्च मूल्यमानं जघन्यतो मन्तव्यम् । उत्कर्षतः पुनस्त्रयाणामप्य-नियतम् । अत्र च पञ्चकं जघन्यम्, सहस्रं मध्यमम्, शतसहस्रमुत्कृष्टम् ॥ ४२१५ ॥

कथं पुनरेकस्यापि रजोहरणादिवस्तुन इत्थं विचित्रं मूल्यं भवति ? इत्युच्यते—

विक्किंतगं जधा पप्प, होइ रयणस्स तव्विधं मुल्लं ।
कायगमासज्ज तधा, कुत्तियमुल्लस्स निक्कं ति ॥ ४२१६ ॥

यथा 'रत्नस्य' मरकत-पद्मरागादेर्विक्रेतारं 'प्राप्य' प्रतीत्य तद्विधं मूल्यं भवति, यादृशो मुग्धः प्रबुद्धो वा विक्रेता तादृशमेव स्वल्पं बहु वा मूल्यं भवतीति भावः । एवं 'कायकं' ग्राहकमासाद्य **कुत्रिकापणे** भाण्ड-मूल्यस्य 'निष्कं' परिमाणं भवति, न प्रतिनियतं किमपीति भावः । इतिशब्दः स्वरूपोपदर्शने ॥ ४२१६ ॥

एवं ता तिविह जणे, मोल्लं इच्छाए दिज्ज बहुयं पि ।
सिद्धमिदं लोगम्मि वि, समणस्स वि पंचगं भंडं ॥ ४२१७ ॥

एवं तावत् 'त्रिविधे' प्राकृत-मध्यमोत्तमभेदभिन्ने जने 'मूल्यं' पञ्चकादिरूपकपरिमाणं जघन्यतो मन्तव्यम् । इच्छया तु 'बह्वपि' यथोक्तपरिमाणादधिकमपि प्राकृतादयो दद्युः, न कोऽप्यत्र प्रतिनियमः । न चैतदत्रैवोच्यते किन्तु लोकेऽपि 'सिद्धं' प्रतीतमिदम्, यथा—श्रमणस्यापि 'पञ्चकं' पञ्चरूपकमूल्यं भाण्डं भवति । इह च रूपको यस्मिन् देशे यद् नाणकं व्यवह्रियते तेन प्रमाणेन प्रतिपत्तव्यः ॥ ४२१७ ॥

अथ **कुत्रिकापणः** कथमुत्पद्यते ? इत्याह—

पुव्वभविगा उ देवा, मणुयाण करिंति पाडिहेराइं ।
लोगच्छेरयभूया, जह चक्कीणं महाणिहयो ॥ ४२१८ ॥

'पूर्वभविकाः' भवान्तरसङ्गतिका देवाः पुण्यवतां मनुजानां 'प्रातिहार्याणि' यथाभिलषितार्थोपढौकनलक्षणानि कुर्वन्ति । यथा लोकाश्चर्यभूताः 'महानिधयः' नैसर्पप्रभृतयः 'चक्रिणां' भरतादीनां प्रातिहार्याणि कुर्वन्ति । वर्तमाननिर्देशस्तत्कालमङ्गीकृत्याविरुद्धः । एवं **कुत्रिकापणा** उत्पद्यन्ते ॥ ४२१८ ॥

ते चैतेषु स्थानेषु पुरा बभूवुः इति दर्शयति—

उज्जेणी रायगिहं, तोसलिनगरे इसी य इसिवालो ।
दिक्खा य सालिभद्दे, उवकरणं सयसहस्सेहिं ॥ ४२१९ ॥

उज्जयिनी राजगृहं च नगरं कुत्रिकापणयुक्तमासीत् । **तोसलिनगरवास्तव्येन** च वणिजा **ऋषिपालो** नाम वानमन्तर **उज्जयिनीकुत्रिकापणात्** क्रीत्वा स्वबुद्धिमाहात्म्येन सम्यगाराधितः, ततस्तेन **ऋषितडागं** नाम सरः कृतम् । तथा **राजगृहे श्रेणिके** राज्यमनुशासति **शालिभद्रस्य** सुप्रसिद्धचरितस्य दीक्षायां शतसहस्राभ्याम् 'उपकरणं' रजोहरण-प्रतिग्रहलक्षणमानीतम्, अतो ज्ञायते यथा **राजगृहे कुत्रिकापण** आसीदिति **पुरातनगाथा**समासार्थः ॥ ४२१९ ॥ साम्प्रतमेनामेव विवृणोति—

पज्जोए णरसीहे, णव उज्जेणीय कुत्तिया आसी ।
भरुयच्छवणियऽसद्दह, भूयऽट्ठम सयसहस्सेणं ॥ ४२२० ॥
कम्मम्मि अदिज्जंते, रुट्ठो मारेइ सो य तं घेत्तुं ।
भरुयच्छाऽऽगम, वावारदाण खिप्पं च सो कुणति ॥ ४२२१ ॥

भीएण खंभकरणं, एत्थुस्सर जा ण देमि वावारं।
णिज्जित भूततलागं, आसेण ण पेहसी जाव ॥ ४२२२ ॥

चण्डप्रद्योतनाम्नि नरसिंहे **अवन्तिजनपदा**धिपत्यमनुभवति नव **कुत्रिकापणा उज्जयिन्या**मासीरन्। तदा किल **भरुयच्छा**ओ एगो वाणियओ असद्दहंतो **उज्जेणी**ए आगंतूण **कुत्तियावणा**ओ भूयं मग्गइ। तेण **कुत्तियावण**वाणिएण चिंतियं—'एस ताव मं पवंचेइ ता एयं मोल्लेण वारेमि' त्ति भणियं—जइ सयसहस्से देसि तो देमि भूयं। तेण तं पि पडिवन्नं ताहे तेण भन्नइ—पंचरत्तं उदिक्खाहि तओ दाहामि। तेण अट्ठमं काऊण देवो पुच्छिओ। सो भणइ—देहि, इमं च भणिहिज्ज—जइ कम्मं न देसि तो भूओ तुमं उच्छाएहिइ। 'एवं भवउ' त्ति भणित्ता गहिओ तेण भूओ भणइ—कम्मं मे देहि। दिन्नं, तं खिप्पमेव कयं। पुणो मग्गइ, अन्नं दिन्नं। एवं सव्वम्मि कम्मे निट्ठिए पुणो भणइ—देहि कम्मं। तेण भन्नइ—एत्थं खंभे चडुत्तरं करेहि जाव अन्नं किंचि कम्मं न देमि। भूओ भणइ—अलाहि, पराजितो मि, चिंधं ते करेमि—जाव नावलोएसि तत्थ तलागं भविस्सइ। तेण अस्से विलग्गिऊण बारस जोयणाइं गंतूण पलोइयं जाव तक्खणमेव कयं तेण **भरुयच्छ**स्स उत्तरे पासे **भूयतलागं** नाम तलागं ॥

अमुमेवार्थमभिधित्सुराह—"भरुयच्छ" इत्यादि। **भरुकच्छ**वणिजा अश्रद्दधता 'भूतः' पिशाचविशेषः **कुत्रिकापणे** मार्गितः। ततोऽष्टमं कृत्वा शतसहस्रेण भूतः प्रदत्तः, इदं च भणितम्—**कर्मण्यदीयमाने** अयं 'रुष्टः' कुपितो मारयतीति। स च भूतं गृहीत्वा **भरुकच्छे** आगमनं कृत्वा व्यापारदानं तस्य कृतवान्। स भूतस्तं व्यापारं क्षिप्रमेव करोति। ततः सर्वकर्मपरिसमाप्तौ वणिजा भीतेन भूतस्य पार्श्वात् **स्तम्भ** एकः कारयाञ्चक्रे। ततस्तं भूतमभिहितवान्—यावदपरं व्यापारं न ददामि तावद् 'अत्र' स्तम्भे 'उत्सर' आरोहाऽवरोहक्रियां कुरु इति भावः। ततः स भूत उक्तवान्—निर्जितोऽहं भवता, अत आत्मनः पराजयचिह्नं करोमि। अश्वेन गच्छन् यावद् 'न प्रेक्षसे' न पश्चादवलोकसे तत्र प्रदेशे तडागं करिष्यामि इति भणित्वा तथैव कृते **भूततडागं** कृतवान् ॥ ४२२० ॥ ४२२१ ॥ ४२२२ ॥

एमेव तोसलीए, इसिवालो वाणमंतरो तत्थ।
णिज्जित इसीतलागो, रायगिहे सालिभद्दस्स ॥ ४२२३ ॥

"एवमेव" **तोसलिनगर**वास्तव्येन वणिजा **उज्जयिनी**मागम्य **कुत्रिकापणाद् ऋषिपालो** नाम **वानमन्तरः** क्रीतः। तेनापि तथैव निर्जितेन **ऋषितडागं** नाम सरश्चक्रे। तथा **राजगृहे शालिभद्रस्य** रजोहरणं प्रतिग्रहश्च **कुत्रिकापणात्** प्रत्येकं शतसहस्रेण क्रीतः ॥ ४२२३ ॥

विभागः ४ पत्रम् ११४४-४६

(३) कौलालिकापणः–पणितशाला

कोलालियावणो खलु, पणिसाला० ॥ ३४४५ ॥

कौलालिकाः-कुलालक्रय-विक्रयिणस्तेषा**मापणः पणितशाला** मन्तव्या। किमुक्तं भवति?—यत्र कुम्भकारा भाजनानि विक्रीणते, वणिजो वा कुम्भकारहस्ताद् भाजनानि क्रीत्वा यत्रापणे विक्रीणन्ति सा **पणितशाला**। **विभागः ४ पत्रम् ९६३**

(४) रसापणः

रसावणो तत्थ दिट्ठंतो ॥ ३५३९ ॥

अत्र **'रसापणः'** मद्यहट्टो दृष्टान्तः। यथा—**महाराष्ट्रदेशे रसापणे** मद्यं भवतु वा मा वा तथापि तत्परिज्ञानार्थं तत्र ध्वजो बध्यते, तं ध्वजं दृष्ट्वा सर्वे भिक्षाचरादयः परिहरन्ति। **विभागः ४ पत्रम् ९८५**

(५) कोट्टकम्

'जनः' लोकः प्रचुरफलायामटव्यां गत्वा फलानि यावत्पर्याप्तं गृहीत्वा यत्र गत्वा शोषयति, पश्चाद् **गन्त्री-पोट्टलका**दिभिरानीय नगरादौ विक्रीणाति तत् **कोट्टक**मुच्यते। **विभागः २ पत्रम् २७९**

[१४ नाणकानि-सिक्काः]

कवड्डगमादी तंबे, रुप्पे पीते तहेव केवडिए ।० ॥ १९६९ ॥

कपर्दकादयो मार्गयित्वा तस्य दीयन्ते । **ताम्रमयं वा नाणकं** यद् व्यवह्रियते, यथा—**दक्षिणापथे काकिणी । रूपमयं वा नाणकं** भवति, यथा—**भिल्लमाले द्रम्मः** । पीतं नाम—**सुवर्णं तन्मयं वा नाणकं** *भवति, यथा*—**पूर्वदेशे दीनारः** । '**केवडिको** *नाम' यथा तत्रैव* **पूर्वदेशे केतराभिधानो नाणकविशेषः** । विभागः २ पत्रम् ५७३

अथ कतमेन रूपकेणेदं प्रमाणं निरूप्यते ? इत्याह—

दो साभरगा दीविच्चगा तु सो उत्तरापथे एक्को ।
दो उत्तरापहा पुण, पाडलिपुत्तो हवति एक्को ॥ ३८९१ ॥

'**द्वीपं** *नाम*' **सुराष्ट्रा**या दक्षिणस्यां दिशि समुद्रमवगाह्य यद् वर्तते तदीयौ द्वौ '**साभरकौ**' रूपकौ स **उत्तरापथे** एको रूपको भवति । द्वौ च **उत्तरापथरूपकौ पाटलिपुत्रक** एको रूपको भवति ॥ ३८९१ ॥ अथवा—

दो दक्खिणावहा तू, कंचीए णेलओ स दुगुणो य ।
एगो कुसुमणगरगो, तेण पमाणं इमं होति ॥ ३८९२ ॥

दक्षिणापथौ द्वौ रूपकौ **काञ्चीपुर्या द्रविडविषय**प्रतिबद्धाया एकः '**नेलकः**' रूपको भवति । 'सः' **काञ्चीपुरीरूपको** द्विगुणितः सन् **कुसुमनगर**सत्क एको रूपको भवति । **कुसुमपुरं पाटलिपुत्र**मभिधीयते । 'तेन च' रूपकेणेदमनन्तरोक्तमष्टादशकादिप्रमाणं प्रतिपत्तव्यं भवति ॥ ३८९२ ॥

विभागः ४ पत्रम् १०६०

[१५ वस्त्रादिसम्बद्धो विभागः]

(१) वस्त्रपञ्चकम्

कप्पइ निग्गंथाण वा निग्गंथीण वा इमाइं पंच वत्थाइं धारित्तए वा परिहरित्तए वा । तं जहा—जंगिए भंगिए साणए पोत्तए तिरीडपट्टे नामं पंचमे ॥ (उद्देशः २ सूत्रम् २४)

× × ×

कल्पते निर्ग्रन्थानां वा निर्ग्रन्थीनां वा इमानि पञ्च वस्त्राणि 'धारयितुं वा' परिग्रहे धर्त्तुं 'परिहर्तुं वा' परिभोक्तुम् । तद्यथा—जङ्गमाः—त्रसाः तदवयवनिष्पन्नं **जाङ्गमिकम्** । सूत्रे प्राकृतत्वाद् मकारलोपः । भङ्गा—अतसी तन्मयं **भाङ्गिकम्** । सनसूत्रमयं **सानकम्** । **पोतकं—कार्पासिकम्** । तिरीटः—वृक्षविशेषः तस्य यः पट्टः—वल्कलक्षणः तन्निष्पन्नं **तिरीटपट्टकं** नाम पञ्चमम् ॥ एष सूत्रसङ्क्षेपार्थः । अथ विस्तरार्थं भाष्यकृद् बिभणिषुराह—

जंगमजायं जंगिय, तं पुण विगलिंदियं च पंचिंदी ।
एक्केक्कं पि य एत्तो, होति विभागेणऽणेगविहं ॥ ३६६१ ॥

जङ्गमेभ्यो जातं **जङ्गिकम्**, तत् पुनर्विकलेन्द्रियनिष्पन्नं पञ्चेन्द्रियनिष्पन्नं वा । अनयोर्मध्ये **एकैकमपि** विभागेन चिन्त्यमानमनेकविधं भवति ॥ ३६६१ ॥ तद्यथा—

पट्ट सुवण्णे मलए, अंसुग चीणंसुके च विगलेंदी ।
उण्णोट्टिय मियलोमे, कुतवे किट्टे त पंचेंदी ॥ ३६६२ ॥

"पट्ट" त्ति **पट्टसूत्रजम्**, "सुवन्ने" त्ति सुवर्णवर्णं सूत्रं केषाञ्चित् कृमीणां भवति तन्निष्पन्नं **सुवर्णसूत्रजम्**, **मलयो** नाम देशस्तत्सम्भवं **मलयजम्**, अंशुकः–श्लक्ष्णपट्टः तन्निष्पन्नम**ंशुकम्**, चीनांशुको नाम–कोशिकाराख्यः कृमिः तस्माद् जातं **चीनांशुकम्**, यद्वा **चीना** नाम जनपदः तत्र यः श्लक्ष्णतरः पट्टस्तस्माद् जातं **चीनांशुकम्**, एतानि विकलेन्द्रियनिष्पन्नानि । तथा **और्णिकमौष्ट्रिकं मृगरोमजं** चेति प्रतीतानि, **कुतपो जीणम्**, किट्ट–तेषामेवोर्णारोमादीनामवयवाः तन्निष्पन्नं वस्त्रमपि **किट्टं**, एतानि पञ्चेन्द्रियनिष्पन्नानि द्रष्टव्यानि ॥ ३६६२ ॥ अथ भाङ्गिकादीनि चत्वार्यप्येकगाथया व्याचष्टे—

अतसी-वंसीमादी, उ भंगियं साणियं च सणवक्के ।
पोत्तय कप्पासमयं, तिरीडरुक्खा तिरिडपट्टो ॥ ३६६३ ॥

अतसीमयं वा "वंसि" त्ति वंशकरीलस्य मध्याद् यद् निष्पद्यते तद् वा, एवमादिकं **भाङ्गिकम्** । यत् पुनः सनवृक्षवल्काद् जातं तद् वस्त्रं **सानकम्** । **पोतकं** कर्पासमयम् । तिरीटवृक्षवल्काद् जातं **तिरीटपट्टकम्** ॥ ३६६३ ॥ **विभागः ४ पत्रम् १०१७–१८**

वच्चक मुंजं कत्तंति चिप्पिउं तेहि वूयए गोणी ।
पाउरणऽत्थुरणाणि य, करेंति देसिं समासज्ज ॥ ३६७५ ॥

कचिद् **धर्मचक्रभूमिकादौ** देशे 'वच्चकं' दर्भाकारं तृणविशेषं 'मुञ्जं च' शरस्तम्बं प्रथमं 'चिप्पित्वा' कुट्टयित्वा तदीयो यः क्षोदस्तं कर्त्तयन्ति । ततः 'तैः' वच्चकसूत्रैर्मुञ्जसूत्रैश्च **'गोणी' बोरको व्यूयते, प्रावरणा-ऽऽस्तरणानि च** 'देशीं' देशविशेषं समासाद्य कुर्वन्ति । अतस्तन्निष्पन्नं रजोहरणं **वच्चकचिप्पकं मुञ्जचिप्पकं** वा भण्यते ॥ ३६७५ ॥ **विभागः ४ पत्रम् १०२१–२२**

(२) सुरायाः प्रकाराः

अथ सुरा-सौवीरकपदे व्याचष्टे—

पिट्ठेण सुरा होती, सोवीरं पिट्ठवज्जियं जाणे ।
ठायंतगाण लहुगा, कास अगीयत्थ सुत्तं तु ॥ ३४०६ ॥

व्रीह्यादिसम्बन्धिना पिष्टेन यद् विकटं भवति सा **सुरा** । यत्तु पिष्टवर्जितं द्राक्षा-खर्जूरादिभिर्द्रव्यैर्निष्पाद्यते तद् मद्यं **सौवीरकविकटं** जानीयात् । एतद् द्विविधमपि यत्रोपनिक्षिप्तं भवति तत्रोपाश्रये तिष्ठतां चतुर्लघुकाः । **विभागः ४ पत्रम् ९५३**

गोडीणं पिट्ठीणं, वंसीणं चेव फलसुराणं च ।
दिट्ठ मए सन्निचया, अन्ने देसे कुडुंबीणं ॥ ३४१२ ॥

'गौडीनां' गुडनिष्पन्नानां 'पैष्टीनां' व्रीह्यादिधान्यक्षोदनिष्पन्नानां 'वांशीनां' वंशकरीलकनिष्पन्नानां 'फलसुराणां च' तालफल-द्राक्षा-खर्जूरादिनिष्पन्नानाम् एवंविधानां सुराणां सन्निचया अन्यस्मिन् देशे मया कुटुम्बिनां गृहेषु दृष्टाः ॥ ३४१२ ॥ **विभागः ४ पत्रम् ९५४**

(३) सहस्रानुपातिविषम्

सहस्रानुपातिविषं भक्ष्यमाणं सहस्रान्तरितमपि पुरुषं मारयति । **विभागः ४ पत्रम् ११४२**

[१६ प्राकृतव्याकरणविभागः]

काऊण नमोक्कारं, तित्थयराणं तिलोगमहियाणं ।० ॥ १ ॥

'कृत्वा' विधाय 'नमस्कारं' प्रणामम्, केभ्यः ? इत्याह—'तीर्थकरेभ्यः' तीर्यते संसारसमुद्रोऽनेनेति तीर्थ–द्वादशाङ्गं प्रवचनं तदाधारः सङ्घो वा, तत्करणशीलास्तीर्थकरास्तेभ्यः । **गाथायां षष्ठी चतुर्थ्यर्थे प्राकृतत्वात्** । उक्तं च—**"छट्ठिविभत्तीए भन्नइ चउत्थी"** इति । × × ×

सक्कयपाययवयणाण विभासा जत्थ जुज्जते जं तु ।० ॥ २ ॥

मलयगिरिप्रभृतिव्याकरणप्रणीतेन लक्षणेन संस्कारमापादितं वचनं संस्कृतम्, प्रकृतौ भवं प्राकृतं स्वभावसिद्धमित्यर्थः, तेषां संस्कृत-प्राकृतवचनानां 'विभाषा' वैविक्त्येन भाषणं कर्त्तव्यम्। तच्चैवम्—

ए-ओकारपराइं, अंकारपरं च पायए नत्थि।
व-सगारमज्झिमाणि य, क-चवग्ग-तवग्गनिहणाइं॥

अस्या इयमक्षरगमनिका—**ए**कारपर ऐकारः, **ओ**कारपर औकारः, अंकारपर अः इति विसर्जनीयाख्यम-क्षरम्, तथा **व**कार-**स**कारयोर्मध्यगे ये अक्षरे **श-षा**विति, यानि च **क**वर्ग-**च**वर्ग-**त**वर्गनिधनानि ङ-ञ-ना इति, एतान्यक्षराणि प्राकृते न सन्ति॥

तत एतैरक्षरैर्विहीनं यद् वचनं तत् प्राकृतमवसातव्यम्। एभिरेव ऐ औ अः श ष ङ ञ न इत्येवंरूपैरुपेतं संस्कृतम्। एषां संस्कृत-प्राकृतवचनानां विभाषा "जत्थ जुज्जते जं तु" 'यत्र' प्राकृते संस्कृते वा 'यद्' वचनम्-एकवचन-द्विवचनादि 'युज्यते' घटामटति तद् वक्तव्यम्। तत्र संस्कृते एकवचनं द्विवचनं बहुवचनं च भवति, यथा—वृक्षः वृक्षौ वृक्षाः; प्राकृते त्वेकवचनं बहुवचनं वा, न तु द्विवचनम्, तस्य बहुवचनेनाभिधानात्, "**बहुवयणेण दुवयण**" मिति वचनात्। ततः 'कप्पव्ववहाराण' मित्यदोषः॥ **विभागः १ पत्रम् ३**

सक्कय-पाययभासाविणियुत्तं देसतो अणेगविहं।
अभिहाणं अभिधेयातो होइ भिण्णं अभिण्णं च॥ ५७॥

अथवा द्विप्रकारम्—संस्कृतभाषाविनिर्युक्तम्, यथा—वृक्ष इति, प्राकृतभाषाविनिर्युक्तं च, यथा—रोक्खो इति। '**देशतः**' नानादेशानाश्रित्यानेकविधम्, यथा—**मगधा**नाम् ओदनः, **लाटा**नां कूरः, **द्रमिला**नां चौरः, **अन्ध्रा**णाम् इडाकुरिति। तथा तद् 'अभिधानं' व्यञ्जनाक्षरम् अभिधेयाद् भिन्नमभिन्नं च। तत्र भिन्नं प्रतीतम्, तादात्म्याभावात्॥ ५७॥ **विभागः १ पत्रम् २०**

[१७ मागधभाषामयानि पद्यानि]

जइ ताव दलंतऽगालिणो, धम्मा-ऽधम्मविसेसवाहिला।
बहुसंजयविंदमज्झके, उवकलणे सि किमेव मुच्छिलो॥ ४३२५॥

विभागः ४ पत्रम् ११७१

खमए लद्धूण अंबले, दाउ गुलूण य सो वलिट्ठए।
बेइ गुलुं एमेव सेसए, देह जईण गुलूहिँ वुच्चइ॥ ४३३०॥
सयमेव य देहि अंबले, तव जे लोयइ इत्थ संजए।
इइ छंदिय-पेसिओ तहिं, खमओ देइ लिसीण अंबले॥ ४३३१॥

विभागः ४ पत्रम् ११७२

वयणं न वि गव्वभालियं, एलिसयं कुसलेहिँ पूजियं।
अहवा न वि एत्थ लूसिमो, पगई एस अजाणुए जणे॥ ४३६२॥
मूलेण विणा हु केलिसे, तलु पवले य घणे य सोभई।
न य मूलविभिन्नए घडे, जलमादीणि वलेइ कण्हुई॥ ४३६३॥

विभागः ४ पत्रम् ११७९-८०

[१८ लौकिकाः न्यायाः]

(१) कोल्लुकचक्रपरम्परन्यायः

'कोल्लुकपरम्परकेण' **महाराष्ट्रप्रसिद्धकोल्लुकचक्रपरम्परन्यायेन** × × ×

कोल्लुपरंपर संकलि, आगासं नेइ वायपडिलोमं।
अच्छुल्लूढा जलणे, अक्खाई सारभंडं तु॥ ५७५॥

ज्वलने प्रवर्द्धमाने सर्वमुपकरणमेकवारमशक्नुवन् कल्पेषु चतुर्षु पञ्चसु वा बध्नाति, बद्ध्वा च **कोल्लुकचक्र-न्यायेन** परम्परया 'संकलि' त्ति तान् **पोट्टलकान्** दवरकेण सङ्कलय्य यत्र न तृणादिसम्भवस्तत आकाशं तदपि वातप्रतिलोमं तत्र नयति। अथ ज्वलनेनातिप्रसरता ते 'अच्छुल्लूढा:' स्वस्थानं त्याजितास्ततो यत् सारं भाण्डमक्षादि तद् निष्काशयन्ति ॥ ५७५ ॥ **विभागः १ पत्रम् १६७०**

(२) छागलन्यायः

किं छागलेण जंपह, किं मं होप्पेह एवऽजाणंता।
बहुएहिँ को विरोहो, सलभेहि व नागपोतस्स ॥ ६०७९ ॥

किमेवं **छागलेन न्यायेन** जल्पथ ? बोल्कटवन्मूर्खतया किमेवमेव प्रलपथ ? इत्यर्थः । किं वा मामेव-मजानन्तोऽपि "होप्पेह" गले धृत्वा प्रेरयथ ? । अथवा ममापि बहुभिः सह को विरोधः ? शलभैरिव नागपोतस्येति ॥ ६०७९ ॥ **विभागः ६ पत्रम् १६०७**

(३) वणिङ्न्यायः

स आह—कः पुन**र्वणिङ्न्यायो** येनैषा शुद्धा क्रियते ? साधवो ब्रुवते—

वत्थाणाऽऽभरणाणि य, सव्वं छड्डेउ एगवत्थेणं।
पोतम्मि विवण्णम्मि वाणितधम्मे हवति सुद्धो ॥ ६३०९ ॥

यथा कोऽपि वाणिजः प्रभूतं ऋणं कृत्वा प्रवहणेन समुद्रमवगाढः, तत्र 'पोते' प्रवहणे विपन्ने आत्मीयानि परकीयानि च प्रभूतानि वस्त्राण्याभरणानि चशब्दात् शेषमपि च नानाविधं कयाणकं सर्वं **'छर्दयित्वा'** परित्यज्य 'एकवस्त्रेण' एकेनैव परिधानवाससा उत्तीर्णः 'वणिग्धर्मे' **वणिङ्न्याये** **'शुद्धो भवति'** न ऋणं दाप्यते। एवमियमपि साध्वी तव सत्कमात्मीयं च सारं सर्वं परित्यज्य निष्क्रान्ता, संसारसमुद्रादुत्तीर्णा इति वणिग्धर्मेण शुद्धा, न धनिका ऋणमात्मीयं याचितुं लभन्ते, तस्माद् न किञ्चिदत्र तवाभाव्यमस्तीति करोति-दानीमेषा स्वेच्छया तपोवाणिज्यम्, पोतपरिभ्रष्टवणिगिव निर्ऋणो वाणिज्यमिति ॥ ६३०९ ॥

विभागः ६ पत्रम् १६६५

[१९. आयुर्वेदसम्बद्धो विभागः]

(१) महावैद्यः अष्टाङ्गायुर्वेदस्य निर्माता च

'योगीव यथा महावैद्यः' इति, 'यथा' इति दृष्टान्तोपन्यासे, 'योगी' **धन्वन्तरिः**, तेन च विभङ्गज्ञान-बलेनाऽऽगामिनि काले प्राचुर्येण रोगसम्भवं दृष्ट्वा **अष्टाङ्गायुर्वेदरूपं वैद्यकशास्त्रं** चक्रे, तच्च यथाम्नायं येनाधीतं स महावैद्य उच्यते। **विभागः २ पत्रम् ३०२**

(२) रोग-औषधादि

पउमुप्पले माउलिंगे, एरंडे चेव निंबपत्ते य।
पित्तुदय सन्निवाए, वायकोवे य सिंमे य ॥ १०२९ ॥

पित्तोदये पद्मोत्पलमौषधम्, सन्निपाते 'मातुलिङ्गं' बीजपूरकम्, वातप्रकोपे एरण्डपत्राणि **'सिंमे'त्ति** श्लेष्मोदये निम्बपत्राणि ॥ १०२९ ॥ **विभागः २ पत्रम् ३२३**

तथा श्लीपदनाम्ना रोगेण यस्य पादौ शूनौ–शिलावद् महाप्रमाणौ भवतः स एवंविधः **श्लीपदी।**

विभागः २ पत्रम् ३५८

उक्तञ्च **भिषग्वरशास्त्रे—**

उत्पद्येत हि साऽवस्था, देश-काला-ऽऽमयान् प्रति। यस्यामकार्यं कार्यं स्यात्, कर्म कार्यं च वर्जयेत् ॥

विभागः ४ पत्रम् ९३६

दन्तानामञ्जनं श्रेष्ठं, कर्णानां दन्तधावनम् । शिरोऽभ्यङ्गश्च पादानां, पादाभ्यङ्गश्च चक्षुषोः ॥

विभागः ४ पत्रम् १०६३

पूर्वाह्णे वमनं दद्यादपराह्णे विरेचनम् । वातिकेष्वपि रोगेषु, पथ्यमाहुर्विशोषणम् ॥

विभागः ४ पत्रम् ११७९

[२० शकुनशास्त्रसम्बद्धो विभागः]

चोरस्स करिसगस्स य, रित्तं कुडयं जणो पसंसेइ । गेहपवेसे मज्जइ, पुन्नो कुंभो पसत्थो उ ॥

विभागः १ पत्रम् ७

मइल कुचेले अब्भंगियल्लुए साण खुज्ज वडमे या ।
एए तु अप्पसत्था, हवंति खित्ताउ णिंतस्स ॥ १५४७ ॥

'मलिनः' शरीरेण वस्त्रैर्वा मलीमसः 'कुचेलः' जीर्णवस्त्रपरिधानः 'अभ्यङ्गितः' स्नेहाभ्यक्तशरीरः श्वा वामपार्श्वाद् दक्षिणपार्श्वगामी 'कुब्जः' वक्रशरीरः 'वडभः' वामनः । 'एते' मलिनादयोऽप्रशस्ता भवन्ति क्षेत्रान्निर्गच्छतः ॥ १५४७ ॥ तथा—

रत्तपड चरग तावस, रोगिय विगला य आउरा वेज्जा ।
कासायवत्थ उद्धूलिया य जत्तं न साहंति ॥ १५४८ ॥

'रक्तपटाः' सौगताः, 'चरकाः' काणादा धाटीवाहका वा, 'तापसाः' सरजस्काः, 'रोगिणः' कुष्ठादिरोगाक्रान्ताः, 'विकलाः' पाणि-पादाद्यवयवव्यङ्गिताः, 'आतुराः' विविधदुःखोपद्रुताः, 'वैद्याः' प्रतीताः, 'काषायवस्त्राः' कषायवस्त्रपरिधानाः, 'उद्धूलिताः' भस्मोद्धूलितगात्रा धूलीधूसरा वा । एते क्षेत्रान्निर्गच्छद्भिर्दृष्टाः सन्तो यात्रा—गमनं तत्प्रवर्त्तकं कार्यमप्युपचाराद् यात्रा तां न साधयन्ति ॥ १५४८ ॥

उक्ता अपशकुनाः । अथ शकुनानाह—

नंदीतूरं पुण्णस्स दंसणं संख-पडहसद्दो य ।
भिंगार-छत्त-चामर-वाहण-जाणा पसत्थाइं ॥ १५४९ ॥
समणं संजयं दंतं, सुमणं मोयगा दधिं ।
मीणं घंटं पडागं च, सिद्धमत्थं वियागरे ॥ १५५० ॥

'नन्दीतूर्यं' द्वादशविधतूर्यसमुदायो युगपद् वाद्यमानः, 'पूर्णस्य' पूर्णकलशस्य दर्शनम्, शङ्ख-पटहयोः शब्दश्च श्रूयमाणः, भृङ्गार-च्छत्र-चामराणि प्रतीतानि 'वाहन-यानानि' वाहनानि—हस्तितुरङ्गमादीनि यानानि—शिबिकादीनि, एतानि 'प्रशस्तानि' शुभावहानि ॥ १५४९ ॥

'श्रमणं' लिङ्गमात्रधारिणम्, 'संयतं' षट्कायरक्षणे सम्यग्यतम्, 'दान्तम्' इन्द्रिय-नोइन्द्रियदमनेन, 'सुमनसः' पुष्पाणि, मोदका दधि च प्रतीतम्, 'मीनं' मत्स्यम्, घण्टां पताकां च दृष्ट्वा श्रुत्वा वा 'सिद्धं' निष्पन्नम् 'अर्थं' प्रयोजनं व्यागृणीयादिति ॥ १५५० ॥ **विभागः २ पत्रम् ४५५-५६**

दिट्ठंतो पुरिसपुरे, मुरुंडदूतेण होइ कायव्वो ।
जह तस्स ते असउणा, तह तस्सितरा मुणेयव्वा ॥ २२९१ ॥

दृष्टान्तोऽत्र **पुरुषपुरे रक्तपटदर्शनाकीर्णे मुरुण्ड**दूतेन भवति कर्त्तव्यः । यथा 'तस्य' **मुरुण्डदूतस्य 'ते'** रक्तपटा अशकुना न भवन्ति, तथा 'तस्य' साधोः 'इतराः' पार्श्वस्थ्यादयो मुणितव्याः, ता दोषकारिण्यो न भवन्तीत्यर्थः ॥ २२९१ ॥ इदमेव भावयति—

पाडलि मुरुंडदूते, पुरिसपुरे सचिवमेलणाऽऽवासो ।
भिक्खू असउण तइए, दिणम्मि रन्नो सचिवपुच्छा ॥ २२९२ ॥

पाटलिपुत्रे नगरे **मुरुण्डो** नाम राजा । तदीयदूतस्य **पुरुषपुरे** नगरे गमनम् । तत्र सचिवेन सह मीलनं । तेन च तस्य आवासो दापितः । ततो राजानं द्रष्टुमागच्छतः **'भिक्षवः' रक्तपटा अशकुना**

भवन्ति इति कृत्वा स दूतो न राजभवनं प्रविशति । ततस्तृतीये दिने राज्ञः सचिवपार्श्वे पृच्छा–किमिति दूतो नाद्यापि प्रविशति ? ॥ २२९२ ॥ ततश्च—

निग्गमणं च अमच्चे, सब्भावाऽऽइक्खिए भणइ दूयं ।
अंतो बहिं च रच्छा, नऽरहिंति इहं पवेसणया ॥ २२९३ ॥

अमात्यस्य राजभवनान्निर्गमनम् । ततो दूतस्यावासे गत्वा सचिवो मिलितः । पृष्टश्च तेन दूतः—किं न प्रविशसि राजभवनम् ? स प्राह—**अहं प्रथमे दिवसे प्रस्थितः परं तच्चन्निकान् दृष्ट्वा प्रतिनिवृत्तः 'अपशकुना एते' इति कृत्वा, ततो द्वितीये तृतीयेऽपि दिवसे प्रस्थितः तत्रापि तथैव प्रतिनिवृत्तः** । एवं सद्भावे 'आख्याते' कथिते सति दूतममात्यो भणति—**एते इह रथ्याया अन्तर्बहिर्वा नापशकुनत्वमर्हन्ति** । ततः प्रवेशना दूतस्य राजभवने कृता । एवमस्माकमपि पार्श्वस्थादयस्त्वदीयसंयत्यश्च रथ्यादौ दृश्यमाना न दोषकारिण्यो भवन्ति ॥ २२९३ ॥ **विभागः ३ पत्रम् ६५०**

[२१ कामशास्त्रसम्बद्धो विभागः]

चीयत्त कक्कडी कोउ कंटक विसप्प समिय सत्थे य ।
पुणरवि निवेस फाडण, किमु समणि निरोह भुत्तितरा ॥ १०५१ ॥

एगस्स रन्नो महादेवी । तीसे कक्कडियाओ पियाओ । ताओ अ एगो णिउत्तपुरिसो दिणे दिणे आणेति । अण्णया तेण पुरिसेण अहापवित्तीए अंगादाणसंठिया कक्कडिया आणिता । तीसे देवीए तं कक्कडियं पासेत्ता कोतुयं जायं—पेच्छामि ताव केरिसो फासो त्ति एयाए पडिसेवियाए ? । ताहे ताए सा कक्कडिया पादे बंधिउं सागारियट्ठाणं पडिसेविउमाढत्ता । तीसे कक्कडियाए कंटओ आसी, सो तम्मि सागारिए लग्गो । विसप्पियं च तं । ताहे वेज्जस्स सिट्ठं । ताहे वेज्जेणं समिया मद्दिया, तत्थ निवेसाविया, उट्ठवेत्ता सुसियप्पदेसं चिंधियं । तम्मि पदेसे तीए अपेच्छमाणीए सत्थयं उप्परामुहधारं खोहियं । पुणो तेणेवागारेण णिवेसाविया । फोडियं । पूएण समं निग्गओ कंटओ । पउणा जाया । जति ताव तीसे देवीए दंडिएण पडिसेविज्जमाणीए कोउयं जायं, किमंग पुण समणीणं णिच्चणिरुद्धाण भुत्तभोगीणं अभुत्तभोगीण य ? ॥ **विभागः २ पत्रम् ३२९**

एक्का सीही रिउकाले मेहुणत्थी सजाइपुरिसं अलभमाणी सत्थे वहंते इक्कं पुरिसं घित्तुं गुहं पविट्ठा चाडुं काउमाढत्ता । सा य तेण पडिसेविता । तत्थ तेसिं दोण्ह वि संसाराणुभावतो अणुरागो जातो । गुहापडियस्स तस्स सा दिणे दिणे पोग्गलं आणेउं देइ । सो वि तं पडिसेवइ । जइ एवं जीवितंतकरीसु वि सणप्फईसु पुरिसो मेहुणधम्मं पडिसेवइ × × × **विभागः ३ पत्रम् ७१७**

जहा—एगा अविरइया अवाउडा काइयं वोसिरेंती विरहे साणेण दिट्ठा । सो य साणो पुच्छं लोलिंतो चाडूणि करेंतो अल्लीणो । सा अगारी चिंतेइ—पेच्छामि तावइ एस किं करेइ ? त्ति । तस्स पुरतो सागारियं अभिमुहं काउं जाणुएहिं हत्थेहि य अहोमुही ठिया । तेण सा पडिसेविया । तीए अगारीए तत्थेव साणे अणुरागो जातो । एवं मिग-छगल-वानरादी वि अगारिं अभिलसंति ॥ **विभागः ३ पत्रम् ७१८**

अथवा विकुर्वितं नाम—**महाराष्ट्रविषये** सागारिकं विद्ध्वा तत्र विण्टकः प्रक्षिप्यते ॥

विभागः ३ पत्रम् ७३०

कस्यापि **महाराष्ट्रादिविषयोत्पन्नस्य** साधोरङ्गादानं वेण्टकविद्धम् ॥ **विभागः ३ पत्रम् ७४१**

उवहय उवकरणम्मि, सेज्जायरभूणियानिमित्तेणं ।
तो कविलगस्स वेओ, ततिओ जाओ दुरहियासो ॥ १५५४ ॥

शय्यातरभ्रूणिकानिमित्तेन पूर्वम् 'उपकरणे' अङ्गादानाख्ये 'उपहते' छिन्ने सति ततः क्रमेण **कपिलस्य** दुरधिसहस्तृतीयो वेदो जात इत्यक्षरार्थः । भावार्थस्तु कथानकेनोच्यते—

सुट्ठिया आयरिया । तेसिं सीसो **कविलो** नाम खुड्डगो । सो सिज्जायरस्स भूणियाए सह खेड्डं करेति । तस्स तत्थेव अज्झोववाओ जाओ । अन्नया सा सिज्जातरभूणिया एगागिणी नातिदूरे गावीणं दोहणवाडगं गया ।

सा तओ दुद्ध-दहिं घेत्तूणाऽऽगच्छति । कविलो य तं चेव वाडगं भिक्खायरियं गच्छति । तेणंतरा असारिए अणिच्छमाणी बला भारिया उप्पाइया । तीए कव्वट्ठियाए अदूरे पिया छित्ते किसिं करेइ । तीए तस्स कहियं । तेण सा दिट्ठा जोणिब्भेए रुहिरोक्खित्ता महीए लोलिंतिया य । सो य कोहाडहत्थगओ रुट्ठो । **कविलो** य तेण कालेण भिक्खं अडितुं पडिनियत्तो, तेण य दिट्ठो । मूलाओ से सागारियं सह जलधरेहिं निकंतियं । सो य आयरियसमीवं न गओ, उन्निक्खंतो । **तस्स य उवगरणोवघाएण ततिओ वेदो उदिण्णो । सो जुन्नकोट्टिणीए संगहिओ । तत्थ से इत्थीवेओ वि उदिन्नो ॥ विभागः ५ पत्रम् १३७१**

[२२ ग्रन्थनामोल्लेखाः]

मलयगिरिप्रभृतिव्याकरणप्रणीतेन लक्षणेन संस्कारमापादितं वचनं संस्कृतम् । **विभागः १ पत्रम् ३**

शब्दानुशासनादिविश्वविद्यामयज्योतिःपुञ्जपरमाणुघटितमूर्तिभिः श्री**मलयगिरि**मुनीन्द्रर्षिपादैर्विवरण-करणमुपचक्रमे । **विभागः १ पत्रम् १७८**

संव्यूहतो यथा **मलयवती**कार इत्यादि **विभागः १ पत्रम् ९९**

जे रायसत्थकुसला, अतक्कुलीया हिता परिणया य ॥ ३८२ ॥

ये **'राजशास्त्रेषु' कौटिल्य**प्रभृतिषु कुशला राजशास्त्रकुशलाः, **विभागः १ पत्रम् ११३**

योऽपि च व्यक्तः सोऽपि यदि निद्रालुर्भवति **तरङ्गवत्या**दिकथाकथनव्यसनी वा तदा न रक्षति, प्रमाद-बहुलत्वात् ॥ ५६५ ॥ **विभागः १ पत्रम् १६५**

विशाखिल-वात्स्यायनादिपापश्रुतान्यभ्यस्यतस्तेषु बहुमानबुद्धिं कुर्वतो ज्ञानमालिन्यम् ,
विभागः १ पत्रम् २११

तत्र **योनिप्राभृता**दिना यदेकेन्द्रियादिशरीराणि निर्वर्तयति । यथा **सिद्धसेनाचार्येणा**श्वा उत्पादिताः ।
विभागः ३ पत्रम् ७५३

अक्खाइयाउ अक्खाणगाइँ गीयाइँ छलियकव्वाइं ।
कहयंता य कहाओ, तिसमुत्था काहिया होंति ॥ २५६४ ॥

तथा 'आख्यायिकाः' **तरङ्गवती-मलयवती**प्रभृतयः, 'आख्यानकानि' **धूर्त्ताख्यान**कादीनि 'गीतानि' ध्रुवकादिच्छन्दोनिबद्धानि गीतपदानि, तथा 'छलितकाव्यानि' शृङ्गारकाव्यानि, 'कथाः' **वसुदेव-चरित-चेटककथादयः,** 'त्रिसमुत्थाः' धर्म-कामा-ऽर्थलक्षणपुरुषार्थत्रयवक्तव्यताप्रभवाः सङ्कीर्णकथा इत्यर्थः । एतान्याख्यायिकादीनि कथयन्तः काथिका उच्यन्ते, कथया चरन्तीति व्युत्पत्तेः ॥ २५६४ ॥

विभागः ३ पत्रम् ७२२

दंसणजुत्ताइअत्थो वा ॥ २९९० ॥

"दंसणजुत्ताइअत्थो व" त्ति दर्शनविशुद्धिकारणीया **गोविन्दनिर्युक्तिः** आदिशब्दात् **सम्म(न्म)ति-तत्त्वार्थ**प्रभृतीनि च शास्त्राणि तदर्थः—तत्प्रयोजनः प्रमाणशास्त्रकुशलानामाचार्याणां समीपे गच्छेत् ॥

विभागः ३ पत्रम् ८१६

उक्तं च **भिषग्वरशास्त्रे**—

उत्पद्येत हि साऽवस्था, देशकालामयान् प्रति । यस्यामकार्यं कार्यं स्यात् , कर्म कार्यं च वर्जयेत् ॥

विभागः ४ पत्रम् ९३६